Published by PANDIT PANNALAL JAIN Bakaliwal
Secretary Bharatiy Jain Siddhant Prakashini Sanstha Benares C
Printed by Babu GAURI SHANKER LAL Manager
Chandraprabha Press Benares City

प्रस्तावना

आप्तमीमांसा

विद्वन्महोदया: !—

प्रथयत्तत नाम वैफल्यं पुरा स्वपरहितापादनाकुंचितशेमुषीनामार्हतमतप्रवर्तकमानिनामार्हताना। पुरस्तात् सविनयमपि कृताभ्यर्थना: श्रीमतामभ्युत्तत्त्वस्वरूपाववुभुत्सूनामवदाततया । परंतु नाद्यत्वे ते जैना: । भातिपंति कतिपयास्तेष्वार्हततत्त्वप्रवर्तनफलं । समाविरभावि तैस्तत्स्वरूपप्रकाशनाय **सनातनजैन-ग्रंथमालाभिधोऽनुपमप्रभाकर:** । रसयंतु रसिका: तत्स्वरूपसुधां निर्व्यूहतया सांप्रतमिति समभ्यर्थना ।

समुपानीयते ग्रंथरत्नद्वयमिदमस्माभिरद्य श्रीमतां पुरस्तात् । आदिमं—**आप्तमीमांसा** कृत्यष्टशतीति विशदटीकाद्वितयविभूषिता । अपरं—अमलप्रमाणस्वरूपाववोधिका **प्रमाणपरीक्षा**। आदिमस्य प्रणेता किल प्रथतस्य समजनि श्रीमत्स्वामि**समंतभद्र:** समतभद्र: । सर्वथा परहितप्राणिहितात्मायं महात्मा कदा भारतभूमिममूं विभूषयामासात्मवैदुष्येणेति नास्ति किमपि निर्णायकं गमकं ।

सांप्रतिकेतिहासवेत्तृणां मतमिदमस्य पावनात्मनो विषये यद्जनिष्टायं षष्ठायां खीष्टशताब्दी । नंदि-संघपट्टावलीतश्च व्यज्ञायीदं समपद्यतायं सपादप्रथमायां शताब्दौ । कामयांचकार च **मैसूरप्रांतस्थकांची-पुर**मवदातयात्मजन्मनिवासेन । परं नोभयत्रापि समयनिर्णये प्रत्यायकं किमपि मुनिर्णेयं प्रमाणं । किंतु नात्र संशीति: प्रयादिमहाधराशानिनानेन मुनिना भवितव्यं नियतं प्रखरविदुषा चिरंतनतमेन च । जनश्रुति-रप्येतद्विषयिणीयं—

आसीत्किल विविधमतिमन्निकरपरिपालितनिदेश: शेमुषीमथनमथितानेकागमोदधिसमवाप्तानवद्यसुधा-परिपूरितस्वांत: श्रीसमंतभद्रो भगवान् मुनिराट् । स चैकदा पुरा समुपार्जितनैकाशुभकर्मसंपातात् समुपात्त-प्रखरभस्मव्याधि: कठिनतमं मुनिव्रतं परिपालयितुमशक्नुवन् व्याधिपरिहरणाधिया विमुच्य मुनिलिंगं समियाय वाराणस्यां । तदा रे च वाराणस्यां कश्चित् स्वप्रतापपराभूतविबुधपति: शिवकोटिमहीपतिरासीत् स च परमशैवत्वात् विनिर्माय कमपि शिवालय समादिशत् बहुलमधुरसमोदकादिसामग्र्या शिवमर्चयितुं । यदा च समंतभद्र: समश्रौषीत् बहुलया सामग्र्या शिवस्य पूजां तदाधिकं मनसि मुतोष । समेत्य च नरपतिशिव-कोटिपरिषदि, उपदर्श्य कमपि लोकोत्तरातिशयं, प्रपेदे शिवपूजकपदं राजानुमत्या । भक्षंश्च सुरसपदार्थ-जातं शमयामास च स्वोदरव्याधिं सानंदं । कियता कालेन व्याधिस्तस्योपशशाम । व्याध्युपशमे च कदाचि-त्पुन: शिवकोटिपरिषदि समागत्य, आविर्भाव्य च विचित्रातिशय स्वमंत्रवचनव्याहूतचंद्रजिनचंद्रप्रभं, चकार शिवकोटिमहीपतिं दिगंबरदीक्षादीक्षितं । भगवत्समंतभद्र: स्वव्याध्युपशमनकामनया वाराणसी-प्राप्तित: पूर्वमपि बहुत्र वभ्राम । अतो यदा शिवकोटिमहीपति: स्वामिपरिचितीच्छया तदीयवृत्तमप्राक्षीत् तदा परिचायित: स पद्येनामुना स्वामिना।

> कांच्यां नग्नाटकोऽहं मलमलिनतनुर्लांवुशे पांडुपिंड:
>
> पुंड्रेंड्रे शाक्यभिक्षुर्दशपुरनगरे मिष्टभोजी परिव्राट् ।
>
> वाराणस्यामभूवं शशधरधवल: पाण्डुरांगस्तपस्वी
>
> राजन् यस्यास्ति शक्ति: स वदतु पुरतो जैननिर्ग्रंथवादी ॥१॥

नेमिचंद्र वर्णिविरचिताराधनाकथाकोशस्य पद्य ६६

मल्लिषेणप्रशस्तौ च समुल्लेखोऽयं स्वामिविषयक:—

> वंद्यो भस्मकभस्मसात्कृतिपटु: पद्मावतीदेवता—
>
> दत्तोदात्तपद: स्वमंत्रवचनव्याहूतचंद्रप्रभ

आचार्यः स समंतभद्रगणभृद्येनेह काले कलौ
जैनं वर्त्म समंतभद्रमभवद्भद्रं समंतान्मुहुः ॥ १ ॥

शिवकोटिनरपतिपुरस्तादात्मनीनपरिचयः—

पूर्वं पाटलिपुत्रमध्यनगरे भेरी मया ताडिता
पश्चान्मालवसिंधुठक्कविषये कांचीपुरे वैदिशे ।
प्राप्तोऽहं करहाटकं बहुभटं विद्योत्कटं संकटं
वादार्थी विचराम्यहं नरपते शार्दूलविक्रीडितं ॥ १ ॥

अवटुतटमटति झटिति स्फुटचटुवाचाटधूर्जटेर्जिह्वा
वादिनि समंतभद्रे स्थितवति सति का कथान्येषां ॥ २ ॥

यद्यपि परात्मनः किलैतस्य स्वामिनः न क्वापि दृष्टिपथमवतरति नि- ...
तत्कृतिव्यामुग्धप्रतिभैः प्राज्ञास्ययमनेकैर्गरीयोभिराचार्यैः—

नमः समंतभद्राय महते कविवेधसे यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः ॥ ४३ ॥
कवीनां गमकानां च वादिनां वाग्मिनामपि यशःसामंतभद्रीयं मूर्ध्नि चूडामणीयते ॥ ४४ ॥

अमोघवर्षगुरुः, महापुराणकर्ता भगवा[illegible]

सरस्वतीस्वैरविहारभूमयः समंतभद्रप्रमुखा मुनीश्वराः ।
जयंति वाग्वज्रनिपातपाटितप्रतीपराद्धांतमहीध्रकोटयः ॥

महाकविश्रीवादि

लक्ष्मीभृत्परमं निरुक्तिनिरतं निर्वाणसौख्यप्रदं
कुज्ञानातपवारणाय विधृतं छत्रं यथा भासुरं ।
सज्ज्ञानैर्नययुक्तिमौक्तिकरसैः संशोभमानं परं
वंदे तद्धतकालदोषममलं सामंतभद्रं मतं ॥

श्रीवसुनंदिसैद्धां

समंतभद्रादिकवींद्रभास्वतां स्फुरंति यत्रामलसूक्तिरश्मयः
भजंति खद्योतवदेव हास्यतां न तत्र किं ज्ञानलवोद्धता जनाः ।

श्रीज्ञानार्णवकर्ता

गुणान्विता निर्मलवृत्तमौक्तिका नरोत्तमैः कंठविभूषणीकृता
न हारयष्टिः परमेव दुर्लभा समंतभद्रादिभवा च भारती ।

महा[illegible]

शिवकोटिजैनत्वनिर्णायको वर्तते सांप्रतमपि तन्निर्मितः प्राकृतभाषायां-भगवत्याराधनासार[illegible] [illegible] ग्रंथः । निर्दिष्टं च तत्र मुनिधर्मप्रमुखवर्णनम् । शिवकोटिमहीपतिः कदा शशास भारतीं भूमिं तदागमानैतिह्यविदो निर्धारयन्तु निपुणं स्वामिसमंतभद्रसमयो निर्णीतः स्यात् ।

समंतभद्रादिवादिचूडामणेराचार्यस्य प्रतिभूर्नोत्र वर्तते [illegible] [illegible] [illegible], अत्रापि [illegible] [illegible] । [illegible] समंतभद्र [illegible] शताब्दी [illegible] [illegible] ।

स्वामिसमंतभद्रनिर्मितग्रंथाः ।

स्वयंभूस्तोत्रम् १ देवागमस्तोत्रं २ जिनशतकालंकारः ३ [illegible] ४ तत्त्वानुशासनं ५ युक्त्यनुशासनं ६ रत्नकरंडकं ७ [illegible] ।

देवागमस्तोत्रापराभिधा—आप्तमीमांसा—नाम स्वायत्ततया विरचितो ग्रंथः किंतु गंधहस्तिमहाभाष्यस्य मंगलाचरणं । भाष्यस्य चतुरशीतिसहस्रपरिमिता ८४००० श्लोकसंख्या । श्रीमदुमास्वामिविरचितस्य तत्त्वार्थाधिगमसूत्रस्य (मोक्षशास्त्रस्य) परिष्कारभूतं भाष्यं । दुर्भाग्यमेतदस्माकीनं यन्नो दृष्टिपथमायाति तद्ग्रंथरत्नं ।

एतस्याः किलाप्तमीमांसाया उपरि कृता सैद्धांतिकचक्रवर्तिना श्रीमद्वसुनंदिना पदवृत्तिः । विरचिता च श्रीमदकलंकदेवस्वामिना भाष्यभूताष्टशती स्वातंत्र्येण कारिकाणामुपरि । विरचयामास चाष्टशत्युपरि अष्टसहस्रीनाम्नी विवृतिं श्रीमद्विद्यानंदिप्रभुः । भूमंडलं यदा मंडयामास नाण्डिल्लेन श्रीमदकलंकदेवस्वामीति तु समाविर्भावसमयोऽयं श्रीमत्तत्त्वार्थराजवार्तिकप्रस्तावनोल्लिखितसमये । प्रभोर्विद्यानंदिनस्तु स्थितिसमयस्तु परीक्षाप्रस्तावनायामवदाततयास्माभिरितिवृत्तं ।

प्रमाणपरीक्षा ।

अत्रायं चेऽपरः प्रमाणपरीक्षाभिधो ग्रंथः । रचयिता किलैतद्ग्रंथरत्नस्य समजनि श्रीमद्विद्यानंदिप्रभुः महत्स्वित्रमेतद्विषयंतोऽप्यतलस्पर्शगंभीरग्रंथमिमं श्रीमद्विद्यानंदाः न प्रकटयांचक्रिरे स्वनामविवृतिं क्वापि यशोलिप्सया तथापि—

जयंति निर्जिताशेषसर्वथैकांतनीतयः ।
सत्यवाक्याधिपाः शश्वद्विद्यानंदा जिनेश्वराः ॥ १ ॥

इत्यत्र जिनेश्वरविशेषणीभूतेन विद्यानंदपदेन—

७७ तमेपृष्ठे—वक्ष्यमाणादेरेकस्येश्वरस्याप्तपरीक्षायामुपासितत्वादिति वाक्ये आप्तपरीक्षापदोल्लेखेन—आप्तपरीक्षाप्रमाणपरीक्षेतिग्रंथद्वयस्य समानकर्तृकत्वप्रतिभासकत्वात्—अंत्यमंगले च विद्यापदस्यानाम्नि-यत विज्ञायतेऽस्माभिरयमेव श्रीविद्यानंदप्रभुः प्रमाणपरीक्षायाः कर्ता ।

प्रथमपादनसमये भट्टारकाः पुस्तकद्वयं मया मोहमयीतः समुपलब्धं तत्र क. पुस्तकस्य शुद्धतरत्वेऽपि ख. पुस्तकमतीवाशुद्धमासीत् । ततोऽन्वभूवं बहुल कष्टं काठिनतमाप्तमीमांसाग्रंथसंपादनकाले ।

प्रमाणपरीक्षायाः क. पुस्तकं जैनहितैषिसंपादकश्रीमत्पंडितनाथूरामप्रेमीमहानुभावैः—

ख. पुस्तकं च स्याद्वादमहाविद्यालयप्रधानाध्यापकैः श्रीमत्पंडित-उमरावसिंहजीमहोदयैः प्रहितमिति विहितानुग्रहोऽस्म्युक्तविदुषोः । यद्यपि पंडितंमन्याधुनिकलेखकतदनुयायिमहोदयानुकंपया प्रमाणपरीक्षायाः पुस्तकद्वयमप्यतीवाशुद्धं तदपि—एकतः सजातशंकाया अपरतः समाधानात् समपादि महता प्रयासेनेयं प्रमाणपरीक्षा । तथापि प्रमत्तयोगादजनिष्ट क्वापि स्खलनं मामकीनं क्षमयंतु तद्वाक्यपरिमार्जनस्खलनं साक्षरवरा इति सनतिमभ्यर्थना । लेखकादिमहानुभावकरकमलखचितग्रंथमाहात्म्यात्—असामयिकवैकल्यतश्च विनिश्चाय्य कुतोऽपि मामकीनं स्खलनं कठिनतमसंपादनकृत्यानुभवबहिर्भूतत्वात् वेधयंति केचित्स्वरतरकुवचनसायकैः संपादकं । शिक्षयितृत्वे तेषामनुगृहीतोऽस्मि ।

प्रियमित्रवर देवराज ! पठिष्यामीति तावकाग्रहवशंवदतया महतायासेन संपादितापीयं प्रमाणपरीक्षा—असामयिकभवन्निधनतो दुनोति मामकीनं मनो बहुलतया ।

अवदातहृदय ! न तावकीनोपकारविनिमये किमपि मत्पार्श्वे समीचीनं वस्तु येन विगतोपकारभारः स्यां—ततस्त्वद्गुणस्मृतिसमीहया समर्पयामि तव **करकमलयोः** श्रीप्रमाणपरीक्षामिमां सविनयं—एहि परमनिश्रेयसं त्वमिति मे कामना ।

विद्वत्कृपाभिलाषी

गजाधरलालः

आचार्यः स समन्तभद्रगणभृद्येनेह काले कलौ
जैनं वर्त्म समन्तभद्रमभवद्भद्रं समन्तान्मुहुः ॥ १ ॥

शिवकोटिनृपतिपुरस्तात्समंतभद्रभाषितः:—

पूर्वं पाटलिपुत्रमध्यनगरे भेरी मया ताडिता
पश्चान्मालवसिन्धुठक्कविषये काञ्चीपुरे वैदिशे ।
प्राप्तोऽहं करहाटकं बहुभटं विद्योत्कटं संकटं
वादार्थी विचराम्यहं नरपते शार्दूलविक्रीडितं ॥ १ ॥
अवटुतटमटति झटिति स्फुटपटुवाचाटधूर्जटेर्जिह्वा
वादिनि समंतभद्रे स्थितवति सति का कथान्येषां ॥ २ ॥

यद्यपि एतादृशः कीर्तिशालिनः स्वामिनः न क्वापि इतिहासग्रन्थेषु निर्णीतसमयादिप्रमुखोल्लेखस्तथापि तत्कृतिव्याप्तगुणप्रतिभैः प्राशस्त्यमनेकैर्गीतोऽनेकाचार्यैः—

नमः समंतभद्राय महते कविवेधसे यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः ॥ ४३ ॥
कवीनां गमकानां च वादिनां वाग्मिनामपि यशः सामन्तभद्रीयं मूर्ध्नि चूडामणीयते ॥ ४४ ॥

अमोघवर्षगुरुः, महापुराणकर्ता भगवज्जिनसेनाचार्यः

सरस्वतीस्वैरविहारभूमयः समंतभद्रप्रमुखा मुनीश्वराः ।
जयंति वाग्वज्रनिपातपाटितप्रतीपराद्धांतमहीध्रकोटयः ॥

महाकविश्रीवादीभसिंहः

लक्ष्मीभृत्परमं निरुक्तिनिरतं निर्वाणसौख्यप्रदं
कुज्ञानातपवारणाय विधृतं छत्रं यथा भासुरं ।
सज्ज्ञानैर्नययुक्तिमौक्तिकरसैः संशोभमानं परं
वंदे तद्धतकालदोषममलं सामंतभद्रं मतं ॥

श्रीवसुनंदिसैद्धांतिकचक्रवर्ती

समंतभद्रादिकवींद्रभास्वतां स्फुरंति यत्रामलसूक्तिरश्मयः
व्रजंति खद्योतवदेव हास्यतां न तत्र किं ज्ञानलवोद्धता जनाः ।

श्रीज्ञानार्णवकर्ता श्रीशुभचंद्राचार्यः

गुणान्विता निर्मलवृत्तिमौक्तिका नरोत्तमैः कंठविभूषणीकृता
न हारयष्टिः परमेव दुर्लभाः समंतभद्रादिभवा च भारती ।

महाकविश्रीवीरनंदी

शिवकोटिजैनत्वनिर्णायको वरीवर्ति सांप्रतमपि तन्निर्मितः प्राकृतभाषायां—**भगवत्याराधनासाराभिधः** परमग्रंथः । श्रियते च यत्र मुनिधर्मसमुपवर्णना । शिवकोटिमहीपतिः कदा शशास भारतीविभूषितां वाराणसीमिति निश्चितौ तु नियतं स्वामिसमतभद्रसमयो निर्णीतःस्यात् ।

समंतभद्राभिधयाऽपरोऽप्याचार्यः प्रतिश्रुतो वर्तते यस्य चिंतामणिव्याकरणस्य टिप्पणी, अष्टसहस्री विषमपदव्याख्येतिग्रंथद्वयमुपलभ्यते । यद्ययमपरः समंतभद्रः षष्ठतमायां शताब्दौ भवेदितिनिर्णीतस्तदा न कापि क्षतिः ।

स्वामिसमंतभद्रनिर्मितग्रंथाः ।

गंधहस्तिमहाभाष्य १ देवागमस्तोत्र २ जिनसत्तालंकार ३ विजयधवलटीका ४ तत्त्वानुशासन ५ युक्त्यनुशासनं ६ बृहत्स्वयंभूस्तोत्र ७ जिनशतकमित्यादयः ।

देवागमस्तोत्रापरनामधेया—आप्तमीमांसा—नायं स्वातन्त्र्येण विरचितो ग्रंथः किंतु गंधहस्तिमहाभाष्यस्य मंगलाचरणं । भाष्यस्य चतुरशीतिसहस्रपरिमिता ८४००० श्लोकसंख्या । श्रीमदुमास्वामिशिष्यकुलोत्तंसविरचिततत्त्वार्थाधिगमसूत्रस्य (मोक्षशास्त्रस्य) परिष्कारात्मकं भाष्यं । दुर्भाग्यमेतदस्मदीयं यन्नो दृष्टिपथमायाति तत्संप्रति ।

एतस्या आप्तमीमांसाया उपरि कृता सैद्धांतिकचक्रवर्तिना श्रीमद्वसुनंदिना पदवृत्तिः । विरचिता च श्रीमदकलंकदेवस्वामिना भाष्यभूताष्टशती स्वातंत्र्येण कारिकाणामुपरि । निरमायामास चाष्टशत्युपरि अष्टसहस्रीनाम्नीं विवृतिं श्रीमद्विद्यानंदिप्रभुः । भूमंडले कदा मंडयामासुरस्मद्भूमंडलं श्रीमदकलंकदेवस्वामीति तु समाविर्भावयामो वयं श्रीमत्तत्त्वार्थराजवार्तिकप्रस्तावनोद्दिष्टसमये । प्रभोर्विद्यानंदिनस्तु स्थितिसमयोऽस्याः परीक्षाप्रस्तावनायामत्र दास्यामोऽस्माभिरितिवृत्तं ।

प्रमाणपरीक्षा ।

अत्रोक्तोऽपरः प्रमाणपरीक्षाभिधो ग्रंथः । रचयिता किलैतद्ग्रंथरत्नस्य समजनि श्रीमद्विद्यानंदिप्रभुः महर्षिप्रमेतादृशग्रंथतोऽप्येतत्परमार्गगभीरमथमिमं श्रीमद्विद्यानंदाः न प्रकटयांचक्रिरे स्वनामविवृतिं क्वापि यशोलिप्सया तथापि—

> जयंति निर्जिताशेषसर्वथैकांतनीतयः ।
> सत्यवाक्याधिपाः शश्वद्विद्यानंदा जिनेश्वराः ॥ १ ॥

इत्यत्र जिनेश्वरविशेषणीभूतेन विद्यानंदपदेन—

७७ तमेपृष्ठे–तस्यानादेरेकस्येश्वरस्याप्तपरीक्षायामुपक्षिप्तत्वादिति वाक्ये आप्तपरीक्षापदोल्लेखेन–आप्तपरीक्षाप्रमाणपरीक्षेतिग्रंथद्वयस्य समानकर्तृकत्वप्रतिभासकत्वात्—अन्त्यमंगले च विद्यापददानाल्लिपत विज्ञायतेऽस्माभिरयमेव श्रीविद्यानंदप्रभुः प्रमाणपरीक्षायाः कर्ता ।

ग्रंथसंपादनसमये अष्टशत्याः पुस्तकद्वयं मया मोहमयीतः समुपलब्धं तत्र क. पुस्तकस्य शुद्धतरत्वेऽपि ख. पुस्तकमतीवाशुद्धमासीत् । ततोऽन्वभूवं बहुलं कष्टं कठिनतमाप्तमीमांसाग्रंथसंपादनकाले ।

प्रमाणपरीक्षायाः क. पुस्तकं जैनहितैषिसंपादकश्रीमत्पंडितनाथूरामजीमहानुभावैः—

ख. पुस्तकं च स्याद्वादमहाविद्यालयप्रधानाध्यापकं श्रीमत्पंडित–उमरावसिंहजीमहोदयैः प्रहितमिति विहितानुग्रहोऽस्म्युक्तविदुषोः । यद्यपि पंडितंमन्याधुनिकलेखकतदनुयायिमहोदयानुकंपया प्रमाणपरीक्षायाः पुस्तकद्वयमप्यतीवाशुद्धं तदपि–एकतः सजातशंकाया अपरतः समाधानात् समपादि महता प्रयासेनेयं प्रमाणपरीक्षा । तथापि प्रमादयोगादजनिष्ट क्वापि स्खलनं मामकीनं क्षमयंतु तदशक्यपरिमार्जनस्खलनं साक्षरवरा इति सनतिमभ्यर्थना । लेखकादिमहानुभावकरकमलखचितग्रंथमाहात्म्यात्—असामयिकवैकल्यतश्च विनिश्चाय्य कुतोऽपि मामकीनं स्खलनं कठिनतमसंपादनकृत्यानुभवबहिर्भूतत्वात् वेधयति केचिन्मत्सरकुवचनसायकैः संपादकं । शिक्षयितृत्वे तेषामनुगृहीतोऽस्मि ।

प्रियमित्रवर देवराज ! पठिष्यामीति तावकाग्रहवशंवदतया महतायासेन संपादितापीयं प्रमाणपरीक्षा—असामयिकभवन्निधनतो दुनोति मामकीनं मनो बहुलतया ।

अवदातहृदय ! न तावकीनोपकारविनिमये किमपि मत्पार्श्वे समीचीनं वस्तु येन विगतोपकारभारः स्यां—ततस्त्वद्गुणस्मृतिसमीहया समर्पयामि तव **करकमलयोः** श्रीप्रमाणपरीक्षामिमां सविनयं—एहि परमनिःश्रेयसं त्वमिति मे कामना ।

विद्वत्कृपाभिलाषी

गजाधरलालः

द्वितीयः परिच्छेदः

वंदित्वा परमार्हतां समुदयं गां सप्तभंगीविधिं स्याद्वादामृतगर्भिणीं प्रतिहतैकांतांधकारोदयाम् ॥ ।।
तीर्थं सर्वपदार्थतत्त्वविषयस्याद्वादपुण्योदधेर्भव्यानामकलंकभावकृतये प्राभावि काले कलौ ॥
येनाचार्यसमंतभद्रयतिना तस्मै नमः संततं कृत्वा विव्रियते स्तवो भगवतां देवागमस्तत्कृतिः ॥

देवागमेत्यादिमंगलपुरस्सरस्तवविषयपरमाप्तगुणातिशयपरीक्षामुपक्षिपतैव स्वयं श्रद्धागुणज्ञतालक्षण प्रयोजनमाक्षिप्तं लक्ष्यते तदन्यतरापायेऽर्थस्यानुपपत्तेः । शास्त्रन्यायानुसारितया तथैवोपन्यासात्-।

आज्ञाप्रधाना हि त्रिदशागमादिकं परमेष्ठिनः परमात्मचिह्नं प्रतिपद्येरन् नास्मदादयः तादृशो मायाविष्वपि भावात्, इत्यागमाश्रयः ॥ १ ॥

अध्यात्मं बहिरप्येष विग्रहादिमहोदयः ।
दिव्यः सत्यो दिवौकस्स्वप्यस्ति रागादिमत्सु सः ॥ २ ॥

वृत्तिः—आत्मनि अधि अध्यात्मं । सः अंतः । क्षुत्पिपासाजरारुजापमृत्य्वाद्यभाव इत्यर्थः । बहिरिति बाह्योऽपि । एषः प्रत्यक्षनिर्देशः । विग्रहो दिव्यशरीरमादिर्येषां निःस्वेदत्व-निर्मलत्व-[illegible]दीनां तानि विग्रहादीनि तेषां तान्येव वा महोदयः, विभूतेः पूर्णावस्थाया अतिशये [illegible] इत्यर्थो वा विग्रहादिमहोदय, अमानुषातिशय इत्यर्थः । दिवि भवो दिव्यः । सत्यः [illegible] [illegible] न भवति । दिवि द्यौ दिवि ओकः अवस्थानं येषां ते दिवौकसः नाकसदनाः, तेष्वपि दि[illegible] [illegible] । अथवा दिवाकर्षोयं तेनेदम् । रागो लोभमायेत्यादिर्येषां द्वेषादीनां ते रागादयः तेषां [illegible] ते रागादिमंतः, तेषु रागादिमत्सु अक्षीणकषायेष्वित्यर्थः । स महोदय इति । अयं महोदयो भ[illegible] [illegible] अध्यात्ममहोदय इति संबंधः कर्तव्यः अंत्यस्य श्रुतत्वात् । अथवा बहिरपि [illegible] [illegible] च । [illegible] भवति । योऽपि विग्रहादिमहोदयो मायाविष्वसंभवी हेतुनेतरस्य [illegible] [illegible] । [illegible] ॥ २ ॥

[illegible] प्रदर्श्य अन्यैर्व्यभिचारित्वेनोपन्यस्तस्य हेतोरसाधकत्वं स[illegible] [illegible]—

अनुवृत्तिः—[illegible] [illegible]ऽपि [illegible] व्यभिचारी, [illegible] [illegible] ॥ २ ॥

तीर्थकृत्समयानां च परस्परविरोधतः ।
सर्वेषामाप्तता नास्ति कश्चिदेव भवेद्गुरुः ॥ ३ ॥

वृत्तिः—[illegible] [illegible] तीर्थकृत् । [illegible] भवत् [illegible] । [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] । [illegible] [illegible] । [illegible]

[illegible]

किमुक्तं स्यात् । न सर्वेषामाप्तता परस्परविरोधात्समयानामागमानां । एकोऽपि न भवति प्रमाणाभावात् । अतः केन चिदेव भवितव्यं । एवमन्यन्ताभावाभावः कृतः । यदि परस्परविरोधात्सर्वेषामभावो न भवति तर्हि येषां सर्वज्ञविच्छेदकः संप्रदायस्तेषामाप्तता स्यात् ? अत आह—तीर्थकृदित्यादि । तीर्थं सर्वज्ञं छिनत्ति छिदंति इति तीर्थकृतः समया आम्नायाः सम्प्रदाया येषां ते. तीर्थकृत्समयास्तेषां. अन्योऽन्यविरोधात् । सर्वं निरवशेषं अवगतं अगम्यावगमनं वा इच्छंति अभ्युपगच्छंति इति सर्वेषः तेषां सर्वेषां आप्तता परमार्थ-वादित्वं नास्ति न विद्यते । अतः कः आत्मजीवः चिद्चेतनोऽचेतनो भवत्येव । एवकारः अवधारणार्थः ॥ भवं संसारं यांति गच्छंति इति भवेतः तेषां भवेतां शक्रचक्रधरादीनामित्यर्थः । गुरुर्नाथः । भवेद्गुरुः भवेतां गुरुः । न च लब्धात्मस्वरूपाणां । किमुक्तं भवति—तीर्थकृच्छेदकाम्नायानामपि सर्वमेकेन प्रमाणेन. षड्भिरभ्युपगच्छतां आप्तता नास्ति परस्परविरोधात् । अतो मतिमतिरेव स्यादान्यः ॥ ३ ॥

पूर्वकारिकोपात्तमर्थं समर्थयन्नपुष्कलहेतुमाह—

अष्टशती—न हि तीर्थकरत्वमाप्ततां साधयति शक्रादिष्वसंभवि, सुगतादिषु दर्शनात् । न च सर्वे सर्वदर्शिनः परस्परविरुद्धसमयाभिधायिनः । ततोऽनैकांतिको हेतुः । अत एव न कश्चित् सर्वज्ञः—इत्ययुक्तं प्रमाणविशेषा-प्रमाणानुपपत्तेः । तथेष्टत्वाददोष इत्येकेषामप्रामाणिकैवेष्टिः, न खलु प्रत्यक्षं सर्वज्ञप्रमाणांतरा(?)विषय अनि-यमगात् । नानुमानमसिद्धेः । प्रमाणतः सिद्धं नानात्ममिदं नाम—अन्यथा परस्यापि न सिध्येत् । तद्विनि-श्चयमेकेन प्रमाणेन सर्वं सर्वज्ञरहितं पुरुषसमूहं संविदंतः एवात्मानं निरस्यंतीति व्याहतमेतत् । तीर्थच्छेद-संप्रदायानां तथा सर्वमप्यातमिच्छतामाप्तता नास्ति परस्परविरुद्धाभिधानात् । एकानेकप्रमाणवादिनां अप्रमाण्यापत्तेरन्यथानैकांतिकत्वात् । सर्वप्रमाणविनिवृत्तेरितरथासंप्रतिपत्तेः । यागमस्युदीर्णाशुभस्यादिकं कचिदनाविलज्ञानं निराकरोति न पुनस्तत्प्रतिषेधवादिषु तथेति परमगहनमेतत् । तदित्थं सिद्धं सुनिश्चितास-म्भवद्बाधकप्रमाणत्वं । तेन कः परमात्मा ? चिदेव कर्मभूभृतां भेत्तारं मोक्षमार्गस्य नेतारं ज्ञातारं भवभूभृतां प्रभुः, न हि सर्वज्ञस्य निराकृतेः प्राक् सुनिश्चितासंभवद्बाधकप्रमाणत्वं सिद्धं येन परैः प्रत्यवस्थीयेत । नापि बाधकासंभवात्, परं प्रत्यक्षादेरपि विषयनिबंधनमपि कल्पकेनऽपि सिद्धं, यदि समस्तां न साधयेत् सर्वे प्यविशेषात् । तदभावे दर्शनं नादर्शनमातिशेतेऽनाश्वासाद्विभ्रमवत् । साधकबाधकप्रमाणयोर्निर्णयात्तद्भावाभावयो-र्विप्रतिपत्तिरनिर्णयाद्वा शंका स्यात् । न खलु स्वभावस्य कश्चिदगोचरोऽस्ति यन्न क्रमेत तत्स्वभावान्तरप्रतिषे-धात् । चेतनस्य सतः संबंध्यन्तरं मोहोदयकारणं मदिरादिवत्, तदभावे साकल्येन विरतमोहः सर्वं पश्यति स्वासातिविप्रकर्षेऽपि किंचित्करत्वात् अत एवाक्षानपेक्षा । अञ्जनादिसंस्कृतचक्षुरो यथालोकानपेक्षा ॥ ३ ॥

दोषावरणयोर्हानिर्निःशेषाऽस्त्यतिशायनात् ।
क्वचिद्यथा स्वहेतुभ्यो बहिरन्तर्मलक्षयः ॥ ४ ॥

वृत्तिः—दोषः अज्ञानादि, कार्यरूपं । आवरणं कारणभूतं कर्म । अथवा मोहादिकाः दोषाः । ज्ञानदर्शनावरणे आवरणं । तयोर्हानिर्विनाशो विश्लेषो दोषावरणयोर्हानिः । निःशेषा साकल्येन निरवशेषा समस्ता समूलतलप्रहाणिः इत्युक्तं । अस्ति भवति । अतिशायनात् प्रकृष्यमाणहानित्वात् वृद्धिव्यतिरेकात् । क्वचित् कस्मिंश्चित्पुरुषविशेषे । यथा शब्दो दृष्टान्तप्रदर्शनपरः । स्वस्य आत्मनो हेतवः कारणानि ते तथाभूतास्तेभ्यः स्वहेतुभ्यः । बहिः किट्टकादिकं, अभ्यन्तरं कालिमादि तत्र सन्नत्व च (?)

१ अविनाभावेनास्ति (?) ... लिखितपुस्तके । २ लिखितपुस्तके ... ३ः । ३ भाषांतरं । ४ जैनत्वसि । ५ जैनशिक्षा । ६ ... प्रयोगः । ७ प्रत्यासत्तः । ८ सिद्धसाधनेपि लिखितपुस्तके पाठः ।

क्षयो निजक निमित्त. बहिरन्तर्मलक्षय । एतदुक्तं भवति । कस्मिंश्चिद्दर्शनावरणादीनामत्यन्तहानिरस्ति । यथा धातुपाषाणस्य अन्तर्मलक्षयः । स कर्दिशब्दवाच्यैर गुणैरिति गम्यते । एकत्र स्वहेतवः सम्यग्दर्शना-दयः । अन्यत्र पिण्डीकरणप्रयोगादयः । तथा एकत्र बहिर्मलः शरीरेन्द्रियादिकं । अन्तर्मलः कर्म । अन्यत्र बाह्यमलः किट्टकालिकं । अन्तर्मलः कालिमादि ॥ ४ ॥

ननु निरस्तदोषोऽप्यात्मा कथं विप्रकर्षिणमर्थं प्रत्यक्षीकुर्यात् ? । (इति शङ्कायां) साधनान्तरस्य बाधकाभावस्य भावनिरूपणमाह–

अष्टशती–वचनसामर्थ्यादज्ञानादिदोषः स्वपरपरिणामहेतुः, अत एव दोषाद्यो निःशेषदोषावरणनिर्हृतेः सिद्धा-न्तस्यसमीक्षितानिधानं साध्यापरिज्ञानात् । दोषावरणयोर्हानिरतिशायनात् । निःशेषतया साध्यायां बुद्ध्यादि-भिः न परिक्षयः स्यादिनाशाभावात् । अतोऽनैकान्तिको हेतुरित्यपरीक्षितलक्षितं चेतनगुणव्यावृत्तेः सर्वात्मना पृथिव्यादेरभिमतत्वात् । अदृश्यानुपलम्भादभावासिद्धिरित्ययुक्तं परचैतन्यनिवृत्तावारेकापत्तेः संस्कर्तॄणां पातकित्वप्रसंगात् । बहुलमप्रत्यक्षस्यापि रोगादेर्विनिवृत्तिनिर्णयात् । व्यापारव्याहाराकारविशेषव्यावृत्तिनिमय-वतास्मादृशं लौकिको विवेचयति । व्यापारव्याहाराकारविशेषव्यावृत्तेरिति सयवशात्तत्सिद्धान्तविद्धोको विवेच-यते । यदि पुनरयं निर्बंध सर्वत्र विप्रकर्षिणामभावासिद्धेः, तदा कनकत्वचूर्णादेर्विनाशानवाप्त्या व्यामोहसिद्धे न कश्चिद्धेतुः । ततः शब्दादिनिशिष्टकाणामनाश्वतीनमेतत्, अनुमानोच्छेदप्रसंगात् । तथाहि, यस्य हानिरतिश-यवती तस्य कुतश्चित्सर्वात्मना व्यावृत्तिर्यथा बुद्ध्यादिगुणस्यात्मनः । तथा च दोषादेर्हानिरतिशयवती कुतश्चिन्नि-वर्तयितुमर्हति, सकलं कलङ्कमिति कथमकलङ्कसिद्धिर्न भवेत् । मणेर्मलादेर्व्यावृत्तिः क्षयः सतोऽत्यन्तविनाशानु-पपत्तेः, तादृगात्मनोऽपि कर्मणां निवृत्तौ परिशुद्धिः, । कर्मणोऽपि वैकल्यमात्मैकत्वसमस्त्येव ततो नातिप्रसज्यते । प्रतिपक्ष एवात्मनामागुन्तुको मलः परिक्षयी स्वनिर्ह्रासनिमित्तविवर्द्धनवशात् ॥ ४ ॥

ननु निरस्तोपद्रवः सन् आत्मा कथमकलङ्कोऽपि विप्रकर्षिणमर्थं प्रत्यक्षीकुर्यात् ?—

सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्य चिद्यथा ।
अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः ॥ ५ ॥

वृत्तिः–सूक्ष्माः स्वभावविप्रकृष्टाः । अंतरिताः कालविप्रकृष्टाः । दूराः देशविप्रकृष्टाः । ते च ते अर्थाश्च सूक्ष्मान्तरितदूरार्थाः । तथा च स्वभावविप्रकृष्टा मन्त्रौषधिशक्तिचित्तादयः । कालविप्रकृष्टा रामा-द्याः भसुखदुःखग्रहोपरागादयः । देशविप्रकृष्टा मुष्टिस्थादिद्रव्यम् । दूरा हिमवन्मंदरमकराकरादयः । प्रत्यक्षाः अध्यक्षाः प्रत्यक्षज्ञानगोचरा कस्यचित् । सामान्यकथनमेतत् । अनिर्दिष्टनामधेयस्य–यथा दृष्टान्तप्रदर्शकः अनुमेयाः अनुमानगम्याः । अथवा अनुगतं मेय मानं येषां ते अनुमेयाः प्रमेया इत्यर्थः । तेषां भावस्तस्मा-दनुमेयत्वतः । अग्निः पावकः आदिर्यस्यासावग्न्यादिः । इत्येवमनेन प्रकारेण सर्वज्ञस्य विश्वदर्शिनः संस्थि-तिर्व्यवस्था सर्वज्ञसंस्थितिः सर्वज्ञास्तित्वमित्यर्थः । भागासिद्धानैकांतिकविरुद्धहेत्वाभासाभावात् । ये ये प्रमेयास्ते ते प्रत्यक्षाः । यथा अग्न्यादयः । प्रमेयाश्च स्वभावकालदेशविप्रकृष्टा अर्थाः कस्य चित्पुरुषविशे-षस्य तस्मात्तेऽपि प्रत्यक्षाः । अथवा ये अनुमानगम्यास्ते प्रत्यक्षाः कस्य चित् । यथा अग्न्यादयः । अनुमानगम्याश्च सूक्ष्मान्तरितदूरार्थास्तस्मात्तेऽपि प्रत्यक्षाः । सुनिश्चितासंभवद्बाधकप्रमाणस्य समर्थनमेतत् ।

विगतकर्मकलङ्कोऽपि विप्रकृष्टार्थदर्शी सामान्येन यः प्ररूपितः स कः ? इति विशेषं दर्शयन्नाह–

अष्टशती–स्वभावकालदेशविप्रकर्षिणां अनुमेयत्वमसिद्धमिति—अनुमानमुत्सारयति । यावान् कश्चिद्भावः स सर्वः क्षणिकः–इत्यादिव्याप्तेरसिद्धौ प्रकृतोपसंहारायोगात् । अविप्रकर्षिणामनुमेयत्वानर्थक्यात् । सत्त्वादे-र्गनत्यत्वादिव्याप्तिसिद्धौ सिद्धमनुमेयत्वमनवयवेनेति न किंचिद्व्याहतं पश्यामः । तेऽनुमेयाः—न कस्य चि-

१ विप्रकर्षेण लि. पु. पाठः । २ आप्तह ।

अत्यक्षश्च स्तुः किं नाहत्यर्थे इति समानमन्यादीनां तथा चानुमानोच्छेदः स्यात् । तदभ्युपगमे-अत्यन्तचे-दविज्ञानशक्तिभिरत्यर्थं किं न स्यात् प्रमाणतया परमप्रमाणतयेति न किंचिदेतत्तथा नैतत्तथा वा समभ्यु-पगन्तुमर्हति । तदेवं प्रमेयत्वगमत्वादिर्हेतुरुभयं पुष्णाति स कथं चेतनः प्रतिपत्तुमर्हति, संशयितुं वा । धर्मिण्यसिद्धसत्ताके भावाभावोभयधर्माणामसिद्धविरुद्धानैकान्तिकत्वात् कथं सकलविदि सत्त्वसिद्धिः ? इति मुग्धमति देवानांप्रियः-तदर्पितस्वभावं न लक्षयति । शब्दानित्यत्वसाधनेऽपि कृतकत्वादावयं विकल्पः किं न स्यात् ? । विनाशाधिकरणभावापन्नविनाशधर्मिधर्मत्वे कार्यत्वादेरसम्भवद्बाधकत्वादेरपि संदिग्धसद्भावधर्मि-धर्मत्वं सिद्धं बोद्धव्यं । यदि विप्रकृष्टार्थप्रत्यक्षत्वमर्हतः साध्यते पक्षदोषः-अप्रसिद्धविशेषणश्च तत एव व्याप्तिर्न सिद्ध्येत् । अनर्हतश्चेत्-अनिष्टानुषंगोऽपि कः पुनः सामान्यात्मा तदुभयव्यतिरेकेण, यस्य विव-क्षितार्थप्रत्यक्षत्वं ?, इत्येतद्विकल्पजालं शब्दनित्यत्वेऽपि समानं न केवलं सूक्ष्मादिसाक्षात्करणस्य प्रतिपित्सने संशीतौ वा, तदयमनुमानमुद्रां भिनत्ति । वर्णानां नित्यत्वमकृतकत्वादिना सर्वगतानां यदि साधयति ? । स्यादप्रसिद्धविशेषणः पक्षः । इतरथाऽनिष्टानुषंगः । कीदृक् पुनः सामान्यं नाम यदुभयदोषपरिहाराय प्रकल्प्येत, सर्वगतसाधनेऽपि समानं अविवक्षितविशेषस्य पक्षीकरणे समः समाधिः, इत्यलमप्रतिष्ठितमि-थ्याविकल्पोपाधेः ॥ ५ ॥

स त्वमेवासि निर्दोषो युक्तिशास्त्राविरोधिवाक् ।
अविरोधो यदिष्टं ते प्रसिद्धेन न बाध्यते ॥ ६ ॥

वृत्तिः—स (पूर्वप्रकान्त तच्छब्द.) पूर्वप्रकान्तपरामर्शी त्वमेव-भवानेव नान्य । अन्ययोगव्य-वच्छेदफल एवकार. । असि-भवसि । निर्दोषः-अविद्यारागादिविरहितः क्षुधादिविरहितो वा अनन्तज्ञाना-दिसंबंधेन इत्यर्थः ! कुत एतत् । युक्तिशास्त्राविरोधिवाक् यत. । युक्ति-अनुमानं न्याय तैत्सहचरित मप्यक्षमपि । शास्त्रं आगमः स्याद्वादः ताभ्या अविरोधिनी अविसंवादिनी वाक् वाणी वचनं यस्यासौ युक्ति-शास्त्राविरोधिवाक् । बहिर्व्याप्तिमन्तरेणान्तर्व्याप्त्या सिद्धं । यतः इयमेवान्यत्रापि प्रधाना । ननु वचन स्याऽविरोधः कुतः यावता यत्र वचनं तत्र विरोधो दृश्यते ! अत आह अविरोधः अविसंवादः । यत्-यस्मात् । इष्टं-मतं प्रवचनं । कुतो वीतरागस्य इच्छा ? उपचारेण, सयोगिध्यानवत् । इष्टशब्दस्यापि जहत्स्वार्थे वृत्तित्वात् कुशलशब्दवत् । ते-तव । प्रसिद्धेन परमतापेक्षं विशेषणमेतत् (परमतेन) अनेकांतवस्तुत्वेन । अथवा व्यवहिताव्यवहितप्रसिद्धलक्षणवता प्रमाणेन । न बाध्यते अन्यथा न क्रियते, तेनैव स्वरूपेण दृश्यत इत्यर्थ. । किमुक्तं भवति-यो निर्दोषो विप्रकृष्टदर्शी स च त्वमेव भवसि । न्यायागमाविसंवादिवचने । यतः अविरोधोऽपि, तव मतं न बाध्यते प्रसिद्धेन यस्मात् ।

ननु भो वत्स मदीयं मतं न बाध्यते अन्येषां किं बाध्यते ! अत आह—

विप्रकर्ष्यपि भिन्नलक्षणसंबंधित्वादिना कस्य चित्प्रत्यक्षं । सोऽत्र भवानर्हन्नेव—अन्येषां न्यायागम विरुद्धभाषित्वात् । विचित्राभिसंबंधितया व्यापारव्याहारादिसांकर्येण क्वचिदतिशयानिर्णये कैमर्थक्यादिदो-षैः ! ज्ञानवतोऽपि विसंवादात् क्व पुनराश्वासं लभेमहि ! । नचैवं वादिनः किंचिदनुमानं नाम निरभि-सर्पिनामपि बहुल कार्यस्वभावाऽनियमोपलम्भात् । सति काष्ठादिसामग्रीविशेषे कचिदुपलब्धस्य तदभावे प्रायशोऽनुपलब्धस्य मण्यादिकारणकलापेऽपि संभवात् । यज्जातीयो यत. संप्रेक्षितस्तज्जातीयात्तादृगिति दुर्लभनियमितया धूमधूमकेत्वादीनामपि व्याप्यव्यापकभावः कथमिव निर्णीयेत ? । वृक्षः शिंशपात्वात् इति

---

२ विज्ञान सम्बन्धवत भूतपर्याणामित्या पिशाचिवत् ।

२ मुद्रितपुस्तकेऽयमधिकः पाठ । ३सहोपचरितमित्यपि पाठ । ४ अभिप्रायतया । ५ वचनादि ।

६ आगे । ७ आगे । ८ पूर्वपक्षमप्यादे ।

[illegible]ताधूतादेरपि क्वचिदेव दर्शनात् प्रेक्षावतां किमिव निःशंकं चेतः स्यात् ! । तदेतद्दृष्टसंशयैकांतवादिनां विदग्धमर्कटकानामिव स्वलांगूलभक्षणं । यत्नतः परीक्षितं कार्यं कारणं नातिवर्तते ! इति चेत् स्वैरं [illegible] । ततोऽयं प्रतिपत्तेरपराधो नानुमानस्येति अनुकूलमाचरति । तदेवं तन्मुनिश्चितासंभवद्बाधकप्रमाण[illegible] सकलज्ञत्वं साधयति नान्यत्र, इत्यविरोध इत्यादिना स्पष्टयति । तत्रेष्टं मतं शासनमित्युपचर्यते निराकार्यो[illegible]ऽपि क्वचिदप्रतिषेधात् । नियमाभ्युपगमे सुषुप्त्यादावपि निरभिप्रायप्रवृत्तिर्न स्यात् । प्रतिसंविदिता[illegible] रेच्छा तदा समनंतरी पुनः स्मर्येत वांछांतरवत् । ततश्चैतन्यकरणपाटवयोः साधकतमत्वे सहकारिकारण[illegible] न वै नियतमपेक्षणीयं नक्तंचरादेः संस्कृतचक्षुषो वा नापेक्षिताऽलोकसन्निधेरूपोपलंभात् । नचैवं सं[illegible]रणपाटवयोरप्यभावविवक्षामात्रात्कस्यचिद्वचनप्रवृत्तिः प्रसज्यते संवित्करणवैकल्ये यथाविवक्षं वागवृत्तेरभावात् । नच दोषजातिस्तद्धेतुर्यतस्तां वाणी नातिवर्तेत तत्प्रकर्षापकर्षानुविधानाभावात् । बुद्ध्यादिवत्प्रमाण[illegible] सिद्धं प्रसिद्धं तदेव कस्यचिद्बाधनं युक्तं विशेषणमेतत्परमतापेक्षं । प्रसिद्धेनाप्यनित्यत्वादेकांत[illegible] बाधाकल्पनात् । नर्ते प्रमाणात्प्रतिबंधसिद्धेरभ्युपगमात् । नच परेषां प्रत्यक्षं—अग्निधूमयोः [illegible] बनेर्वा साकल्येन व्याप्तिं प्रति समर्थं—अविचारकत्वात् सन्निहितविषयत्वाच्च । नचानुमानं—अन[illegible] षंगात् । परोक्षान्तर्भावेन तत्स्तर्केण संबंधो व्यवतिष्ठेत । तदप्रमाणत्वे न लैंगिकं समारोप[illegible] पत् । अधिगमेऽपि व्यवसायात्मैव तदनुग्रहो ततोऽपि दर्शनस्य साधनांतरापेक्षा संनिधानाभेदा[illegible] ग्रहणवैकल्यात् ॥ ६ ॥

त्वन्मतामृतबाणानां सर्वथैकांतवादिनां
आप्ताभिमानदग्धानां स्वेष्टं दृष्टेन बाध्यते ॥ ७ ॥

वृत्तिः—त्वत्—युष्मन्मतमेव आगम एव अमृतं सर्वाभिप्रेतसुखकारणं दुःखनिवृत्तिकारणस्य परमानं[illegible] त्वन्मतामृतबाह्याः तेषां त्वन्मता[illegible] [illegible] । सर्वथा सर्वप्रकारैः [illegible] एकान्तं एकं धर्मं नित्य[illegible] येषां ते सर्वथैकान्तवादिनः तेषां सर्वथैकान्तवादिनां [illegible] । [illegible] अभिमानः गर्वः अहंकारः तेन दग्धाः भस्मसात्कृताः प्रलयं नीताः, तेषां आप्ताभिमा[illegible] । [illegible] इष्टं मतं [illegible] । दृष्टेन प्रत्यक्षप्रमाण [illegible] अनुमानेन वा, बाध्यते [illegible] । किमुक्तं भवति । [illegible] सर्वैकान्तवादिनः तेषां इष्टं दृष्टेन बाध्यते । [illegible] [illegible] ॥ ७ ॥

[illegible] —

[illegible] —[illegible] [illegible] ।

[illegible]

[illegible]

नार्थं मतांतरप्रतिषेधार्थं वा । यदाह—साधर्म्यवैधर्म्ययोरन्यतरेणार्थगतावुभयप्रतिपादनं पश्चादिवचनं वा निग्रहस्थानमिति न तद्युक्तं साधनसामर्थ्येन विपक्षव्यावृत्तिलक्षणेन पक्षं प्रसाधयतः केवलं वचनाधिक्योपलंभछलेन पराजयाधिकरणप्राप्तिः स्वयं निराकृतपक्षेण प्रतिपक्षिणा लक्षणीयेति प्रतिज्ञानुयोगिशास्त्रादिष्वपि नाभिधीयेत विशेषाभावात् । यत्सत्तत्सर्वं क्षणिकं यथा घटः संश्च शब्दः इति त्रिलक्षणं हेतुमभिधाय यदि समर्थयते कथमिव संधामतिशेते तावतार्थप्रतिपत्तौ समर्थनं वा निगमनादिकं यतः पराजयो न भवेत् । सत्त्वमात्रेण नश्वरत्वसिद्धौ–उत्पत्तिमत्त्वकृतकत्वादिवचनं अतिरिक्तविशेषणोपादानात् कृतकत्वप्रयत्नानंतरीयकत्वादिषु च कथमन्वयव्यतिरेकादसाधनांगवचनं पराजयाय प्रभवेत् । क्वचित्तदधर्मप्रदर्शनं सेदचशब्दः इत्यविगानात् त्रिलक्षणवचनसमर्थनं च, असाधनांगवचनं अपजयप्राप्तिरिति व्याहतं । तथान्यस्यापि प्रस्तुतेतरस्य वादिनोक्तावितरस्य स्वपक्षमसाधयतो विजयासंभवात् निग्रहस्थानमयुक्तं । साधनांगस्यावचनं, प्रतिवादिनाप्यदोषस्योद्भावनं दोषस्यानुद्भावनं वा–अनेन प्रयुक्तं । विजिगीषुणोभयं कर्तव्यं स्वपरपक्षसाधनदूषणं । अतोऽन्यतरेणासिद्धानैकांतिकवचनेऽपि जल्पापरिसमाप्तिः ॥ ७ ॥

निराकृतावस्थापितविपक्षस्वपक्षयोरेव जयेतरव्यवस्था नान्यथेति दर्शयन्नुभयमाह–

कुशलाकुशलं कर्म परलोकश्च न क्वचित् ।
एकांतग्रहरक्तेषु नाथ स्वपरवैरिषु ॥ ८ ॥

वृत्तिः–कुशलं सुखनिमित्तं, अकुशलं दुःखहेतुकं, कर्म मिथ्यात्वासंयमकषाययोगकारणसंचितपुद्गलप्रचयः । कुशलं चाकुशलं च कुशलाकुशलं कर्म शुभाशुभमित्यर्थः । परलोको भवांतरगतिरन्यजन्म । चशब्दोऽनुक्तसमुच्चयार्थः । तेन सत्कर्मबंधमोक्षेहलोकादयो गृह्यन्ते । नशब्दः प्रतिषेधार्थः । क्वचित् केषुचित् । एक एवांतो धर्मः एकांतः तस्य ग्रहणमभ्युपगमो ग्रहः एकांतग्रहः तस्मिन् तेन वा रक्ता रंजिताः, प्रविष्टा भक्ता एकांतग्रहरक्ताः । अथवा ग्रह इव ग्रहः तेन व्याकुलिता, तेषु एकांतग्रहरक्तेषु । नाथ ! स्वामिन् ! श्रद्धावचनमेतत् । स्व आत्मा च परे चान्ये च स्वपरे तेषां वैरिणः शत्रवः तेषु स्वपरवैरिषु । किमुक्तं भवति?—हे नाथ ! अर्हन् ! एकांतग्रहरक्तेषु स्वपरवैरिषु केषुचिदपि शुभाशुभकर्म नास्ति । परलोकादयश्च न सन्ति । एकांततत्त्वग्रहणात् । यद्यपि पक्षान्तर्भूतो हेतुस्तथापि पृथग्द्रष्टव्यः । अतव्याप्तिसंभवात् । न केवलमेकान्तवादे कुशलाकुशलादिकं कर्म न घटते किं तु प्रमाणप्रमेयपक्षविपक्षहेतुहेत्वाभासदूषणाभासादिकमपि सर्वथार्थक्रियायोगात् ॥ ८ ॥

सामान्येनैकांतवादाभ्युपगतस्य बाधं प्रदर्श्येदानीं दूषयितुमनाः स्वल्पोऽपि शत्रुर्नोपेक्षणीय इति न्यायमनुसरन्प्रथमतरं तावद्भावैकांतं भस्मसात्कर्तुमाह–

अष्टशती–कर्मफलसम्बंधपरलोकादिकं एकांतवादिनां प्रायेणेष्टं तदनेकांतप्रतिषेधेन बाध्येत तत्रोऽनुष्ठानमभिमतमव्याघातकृत्, सदसन्नित्यानित्याद्येकांतेषु कस्यचित् कुतश्चित् कदाचित् क्वचित्प्रादुर्भावासंभवात् । न हि सर्वात्मना सर्वस्य भूताविव जन्म विरुद्धं–अपि तु सर्वथाऽभावेऽपि, व्यतिरेकप्रतिभासानामनुपपत्तेः । न केवलं स्वभावनैरात्म्य एवायं दोषः किं त्वतद्भवत्व वा निरन्वयत्वेऽपि न, कार्यकारणभावानुपपत्तेः [illegible] स्यानुपपत्तेश्चिरतरातीतवत् । सत्यमवत, स्वयमेव नियमेन पश्चाद्भवतस्तत्कार्यत्वे विरुद्धं कालान्तरेऽपि किं न स्यात् तदभावाविशेषात् समनन्तरवत् । समर्थे सत्यभवत पुनः कालान्तरभाविनस्तत्प्रभावाभ्युपगमे बाधकक्षणिकेऽर्थक्रियानुपपत्तिः । तत्सहभाव्ययोर्विरोधात् । कारणसामर्थ्ये [illegible] पक्षेऽपि समानः परिहारः । क्षणिकेन [illegible] स्यात् कार्योत्पत्तिः । [illegible]

¹ विसदृशेऽपि ॥

पुनर्गुणांतराधानमनेकं क्रमशोऽप्यनुभवतः किं विरुध्येत क्षणस्थायिनः कस्य चिदेव . . . वैश्वरूप्यानभ्युपगमेऽपि संविदितज्ञानस्य ग्राह्यग्राहकाकारविवेकं परोक्षं विज्ञानस्य सामर्थ्यप्राप्तः शून्यसंविदो विप्रतिषेधात् । तदयं क्षणस्थायिकारणं स्वसत्तायां कार्यं कुर्वदभ्युपगच्छन् क्रमोत्पत्तिमुपरुणद्धि सकलजगदेकक्षणवृत्तिप्रसंगात् । कारणस्य कार्यकालप्राप्तौ क्षणभंगभंगानुषंगात् । तदप्राप्तावतस्तत्त्वं व्यलीककल्पनाविशेषेण कूटस्थानतिशायनात् । ततः सुभाषितं कुचोद्यसंभूतिरेकांतग्रहरक्तेष्विति ॥ ८ ॥

भावैकांते पदार्थानामभावानामपह्नवात् ।
सर्वात्मकमनाद्यंतमस्वरूपमतावकम् ॥ ९ ॥

वृत्तिः—भाव एवेति सत्त्वमेवेति एकांतः असहायधर्मग्रहो भावैकांतः । सर्वथा सत्त्वाभ्युपगम इत्यर्थः । तस्मिन्भावैकान्ते पदार्थानां । पंचविंशतितत्त्वानां चेतनाचेतनदेवमनुजपशुनारकस्तम्भकुम्भाम्भःप्रभृतीनां वा अभावानां वस्तुधर्माणां हेत्वङ्गानां विशेषणमित्यर्थः, बहुवचनाच्चत्वारोऽपि परिगृह्यन्ते अपह्नवान्निराकरणादित्यर्थः । किं स्यात् ? सर्वं निरवशेषमात्मा स्वरूपं यस्य तत्सर्वात्मकं विश्वमेकस्वरूपमित्यर्थः । आदिरुत्पत्तिःपूर्वस्मिन्नसत्वं । अंतोऽवसानं विनाशो वा आदिश्चान्तश्चाद्यंतौ तौ न विद्येते यस्य तदनाद्यन्तमनाद्यनन्तमित्यर्थः । स्वमात्मीयरूपमाकारः स्व आत्मैव वा रूपं स्वरूपं न विद्यते तद्यस्य तदस्वरूपं । अभाव इत्यर्थः । तवेदं तावकं न तावकमतावकं । किमुक्तं भवति—पदार्थानां भावैकांताभ्युपगमे अतावकं सर्वात्मकमनाद्यनंतमस्वरूपं स्यात् कस्मात्सर्वाभावापह्नवात् ॥ ९ ॥

अथ मतं केऽभावाः, कियंतो वा, कान्यनाद्यनंतानि ? कस्मादभावात् किं स्यादत आहः—

अष्टशती—निष्पर्यायद्रव्यैकांतपक्षे सर्वात्मकत्वादिदोषानुषंगः कुतः पुनर्विशेषानपह्नुवीत तत्साधनव्यभिचारात् । संविन्निर्भासभेदाद्भावस्वभावभेदः प्रकल्प्यते, स पुनरभेदेऽप्यात्मनः संडशः प्रतिभासनात्, तदन्यत्रापि विभ्रमभावे कोशपानं विधेयं । तदेकं चक्षुरादिज्ञानप्रतिभासभेदवशाद् रूपादिव्यपदेशभाक् ग्राह्यग्राहकसंवित्तिवत् । इतरेतराभावविकल्पोऽपि कथमपदार्थो न स्यात् वर्णादिविकल्पवत् । न हि वस्तुव्यतिरिक्तमसन्नाम प्रमाणस्यार्थविषयत्वात् । अभावदृष्टौ हि तदवसानकारणाभावाद्भावदर्शनमनवसरं प्राप्नोति । सकलशक्तिविरहलक्षणनिरुपाख्यस्य स्वभावकार्यादेरभावात् । कुतस्तत्प्रमितिः ? वस्तुनानात्वं पुनरर्थादिकार्यनानात्वात् प्रतीयते । स्वभावाभेदेऽपि विविधकर्मता दृष्टा युगपदेकार्थोपनिबद्धदृष्टिविषयक्षणवत् । शक्तिनानात्वे प्रसवविशेषात् स चेद्व्यभिचारी ? कुतस्तद्गतिः ? । केवलमविद्यास्वभावदेशकालावस्थाभेदेनात्मनि परत्र चात्मनः स्वयमसता मिथ्याव्यवहारपदवीमुपनयति-यतः क्षणभंगिनो भिन्नसंततयः स्कंधा निरूप्येरन् । अन्यथा चेति प्रतिभासकार्यादिभेदेऽपि कस्य चिदेकत्वं प्रसाधयतीति साध्यसाधनयोरभेदे किं केन कृतं स्यात् ? पक्षधर्मत्वादेरभावात् । न कश्चिदसाधना साध्यसिद्धिरितिप्रसंगात् ॥ ९ ॥

कार्यद्रव्यमनादि स्यात्प्रागभावस्य निह्नवे ।
प्रध्वंसस्य च धर्मस्य प्रच्यवेऽनंततां व्रजेत् ॥ १० ॥

वृत्तिः—कार्यं च द्रव्यं च कार्यद्रव्यं व्यञ्जनपर्यायाः, घटादिकं । क्रियत इति कार्यम् । अवस्थान्तरं द्रवति गच्छतीति द्रव्यम् । अनाद्यनंतमादिरहितं नित्यमादिरहितं स्याद्भवेत् । प्राक् पूर्वस्मिन्भाव अभावः प्रागभावः । पूर्वस्मिन् पर्याय[illegible]मित्यर्थः । तस्य प्रागभावस्य निह्नवे [illegible] निराकरणे । प्रध्वंसस्य च विनाशस्य च धर्मस्य कालत्रयगोचरस्य इत्यर्थः । धर्मस्य-विशेषण गुणस्य प्रच्यवे अभावे निराकरणे । अनन्तस्य भावोऽनंतता सामस्त्यमपरावधितां सर्वकालवर्तित्वमिति यावत् व्रजेत् गच्छेत् । किमुक्तं भवति—प्रागभावस्य निह्नवे यदि घटादिद्रव्यमनादि स्यात् । प्रध्वंसस्य[illegible] च्यवे तदेव कार्यद्रव्यमनन्ततां व्रजेत् ॥ १० ॥

[illegible]

अष्टशती—प्रागभावानभ्युपगमे घटादेरनादित्वप्रसङ्गात् पुरुषव्यापारानर्थक्यं स्यात् । कल्पयित्वापि तदभिव्यक्ति तदा प्रागभावोऽवश्यं कर्तव्यः । तथाहि सतः शब्दस्य ताल्वादिभिरभिव्यक्तिः प्रागसती क्रियते न पुनः शब्द एवेति स्वरूपविनिश्चितदर्शनप्रदर्शनमात्र । सा यदि श्रवणज्ञानोत्पत्तिः सैव कथं प्राक् सती यत्नेन कर्तव्या । घटव्यक्तावपि समानमेतत् । तदावरणविगम प्राक् किमभूत् भूतो वा किं यत्नेन ? विशेषाधानमपि तादृगेव कर्तृकर्मकरणानां प्रागभावाभावात्, न कश्चिद्विशेषहेतुः, ताल्वादयो व्यंजका न पुनरुपकारकोऽपि इति । न हि व्यञ्जकव्यापृतिर्नियमेन व्यङ्ग्यं सन्निधापयति । नायं दोषः सर्वगतत्वाद्वर्णानामिति चेत् ? अन्यत्रापि तथाभावानुषंगात् । इत्यत्वात् अर्थोऽस्य न कारणव्यापारोऽपि चायानिवृत्तेः । एतेनानवस्था प्रयुक्ता तद्विशेषकाले तद्वतोऽनुपयोगस्यावस्थैवेति कर्तव्यतास्थानात् । अभेदैकाते पूर्वैकप्रसङ्गः । परिणामेऽप्येषः पर्यनुयोगस्तदभिन्नानां क्रमशोवृत्तिर्माभूत् । भिन्नानां व्यवदेशोऽपि माभूत् सम्बन्धासिद्धेरनुपकारकत्वात् । उपकारेऽपि सर्वं समान अनवस्था च । विनाशानभ्युपगमे तस्य किकृतमश्रवण ? तदावरणागमादयतः कथंचिदावरणयोगात् । आवृतानावृतस्वभावयोरभेदानुपपत्तेः । तयोर्भेदे वा शब्दस्य श्रुतिरश्रुतिर्वा इत्येकान्तः ? तस्मादपि घटादेरसतः पूर्ववदुपलब्धिः किं न भवितुमर्हति ? स्वसंवित्युत्पत्तौ कारणांतरापेक्षा माभूत् तत्करणसमर्थत्वे, अन्यथा तदसामर्थ्यमखण्डयदकिंचित्कर किं सहकारिकारण स्यात् । तत्खण्डने वा स्वभावहानिरव्यतिरेकात् । व्यतिरेके व्यपदेशानुपपत्तिरिति पूर्ववत्सर्वं । वर्णानां व्यापित्वाभिव्यक्तेरपि क्रमश्रुतिरनुपपन्नैव, समानकरणानां तादृशामभिव्यक्तिनियमायोगात् । सर्वत्र सर्वदा सर्वेषां संकुला श्रुतिः स्यात् । वक्तृश्रोतृविज्ञानयोरकारणकार्ययोः क्रमवृत्तित्वमपेक्ष्य परिणामिनां क्रमोत्पत्तिप्रतीतिरत्योर्न किंचिद्विरुद्धं पश्यामः । सर्वगतानामिव क्रमो दुष्करः स्यात् क्षणिकेष्वेव करणादिवृत्तिः प्रत्यभिज्ञानादिरुक्तो हेतुः । तन्निवेकत्वेऽपि किमिदानीमनेकं स्यात् । सर्ववर्णैकत्वप्रसंगात् । शक्यं हि वक्तुं—अभिव्यञ्जकभेदाद्वैधरूप्यं जलचन्द्रवत् । क्वचित्प्रत्यक्षविरोधे ? तदन्यत्राप्यविरोधः कुतः ? तदयं ताल्वादिव्यापारोपजनितश्रावणस्वभावं परित्यज्य विपरीतमासादयन्नपि नित्यत्वेन किंचिदनित्य । युगपत्प्रतिनियतैकदेशादनारश्रुतेः कस्य चिदेकत्वेन क्वचिदनेकत्वसिद्धेः । न हि कथंचित् क्वचित्प्रत्यवमर्शो न स्यात्, तत्ऽपरविशेषबुद्धेरभ्रान्तहेतुत्वप्रकल्पने सर्व समजस प्रेक्षामहे । तदेतेषां पुद्गलानां करणसन्निपातोपनीतश्रावणस्वभाव शब्द पूर्वापरकोट्योरसन् प्रयत्नानंतरीयको घटादिवत् पुद्गलस्वभावत्वे दर्शनविस्ताररश्मिप्रसर्पणवत्कर्णपूरणे कथं तत्प्रदेशानुपलंभो गन्धपरमाणुप्रतिविधानतयोपेक्षामर्हति । कर्णशष्कुल्यां कटकटायमानस्य प्रायशः प्रतिघातहेतोर्भवनादुपघातिनः शब्दस्य प्रसिद्धिः—अश्रवणीयत्वलक्षणःमस्त गमयति । निश्छिद्रनिर्गमनादयः सूक्ष्मस्वभावत्वात् स्नेहादिरसादिवन्न विरुध्येरन् अतो यत्नजनितवर्णात्मना श्रावणस्वभाव प्राक् पश्चादपि पुद्गलानां नास्तीति तावानेव ध्वनिपरिणामः । ततः प्राक्प्रध्वंसाभावप्रतिक्षेपे कौटस्थ्य क्रमयौगपद्याभ्यां स्वाकारज्ञानाद्यर्थक्रियां व्यावर्तयतीति निरूपाख्यत्वमित्यभिप्रायः । तदत्र पूर्वकल्पना विस्तरेण प्रतिक्षेप्स्यामः ॥ १० ॥

सर्वात्मकं तदेकं स्यादन्यापोहव्यतिक्रमे ।
अन्यत्र समवायेन व्यपदिश्येत सर्वथा ॥ ११ ॥

वृत्तिः—सर्वो विश्वं निरवशेष आत्मा स्वरूपं यस्य तत् सर्वात्मकम् । तत् किंचिद्वस्तु विवक्षितरूपं, एकं अभेदरूपं स्यात् भवेत् । अन्या अपरस्य अपोहो—निराकरण तस्य व्यतिक्रम—निह्नव निराकृतिः स तथाभूत तस्मिन्नन्यापोहव्यतिक्रमे इतरेतराभावाभावे इत्यर्थः । अन्यत्र अत्यन्ताभावाभावे । समवायेन [illegible] सम्बन्धेन [illegible] अभ्युपगम्यत । सर्वथा सर्वप्रकारेण [illegible] । अथ तयोरभावयो का [illegible] [illegible] तत्र रूपेण भवति, शक्तिरूपेण विद्यमानत्वात् । अनाभावा पुनर्नान्येन पुद्गल [illegible] नेन स्वरूपेण न भवति ।

भावाभावैकांतं विरोधं निरूप्योभयैकांतवादिनामपि न किंचिदगम्यत इत्याह—

अष्टशती—अहितंतथ परमार्थसत् अन्यतरापायेऽपि साधनदूषणप्रयोगानुपपत्तेरिति प्रकृतार्थपरिसमाप्तौ । कि ञ्चिल्लक्षणविकल्पनया । न हि संवृत्या साध्यसाधनव्यवस्था युक्तिमती । शून्यमिदमपरमार्थत्वे पुनरनिराकृत- सद्भावस्य सर्वस्यानन्यतानुषंगात् । समारोपव्यवच्छेदेऽपि समान । हेयोपादेयोपायरहितमपमर्दक. केवलं विजृ- म्भति । संवृत्यास्तीति स्वेच्छोपन्यसनमर्थः ! इतमनुकूलं । केवलं वचः आत्मनो वैयात्यं सूचयति । अथ पर- रूपेण नास्ति नास्ति विवादात् एतदपि तादृगेव । सर्वैतेनोभयानुभयपक्षस्यः प्रयुक्तः । तदस्ति स्वरूपाम नेति समानधर्म्यः । सत्त्वनिर्विचारानुपपत्तिरित्ययुक्त । सदभावात्तत्प्रतिपादनार्थं शास्त्रमुपदिशन्नुपदेष्टा प्रारभ- मन् सर्वं प्रतिक्षिपतीति कथमनुन्मत्तः ! सोऽयं दर्शनेव तावन्महाव्यापोऽयं लोकानिक्रांतः क्व वयं तेऽन्यो- विस्मयमास्महे । तत्क्ये पुनस्तानपि कीर्तयंतीति किं वत परमन्यत्र मोहनीयप्रकृतेः ॥ १२ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ १३ ॥

वृत्तिः—विरोधादव्यभिचारात् पूर्वापरासंगतत्वात् । न प्रतिषेधवचनम् । एक आत्मा स्वभावो यत्रोभौ तथा तयोर्भावस्तदैकात्म्यम् । उभयोः सत्त्वासत्त्वयोरैकात्म्यमुभयैकात्म्यं भावाभावैकत्वमित्यर्थः । न्यायो युक्तिः प्रमाणेन प्रमेयस्य घटना । स्याद्वाद एव न्यायः स्याद्वादन्यायस्तस्मै विद्विषंते वा विद्विषन्तीति स्याद्वादन्या- यविद्विषस्तेषां स्याद्वादन्यायविद्विषामनेकांतवैरिणाम् । अथ भावाभावोभयकांतपक्षदोषदर्शनादवाच्यतैव त्वा- श्रीयते ! तथापि दोष एव अत आह । उच्यत इति वाच्यं न वाच्यमवाच्यं तस्य भावोऽवाच्यता सैव एकांतोऽ- विद्याव्यवसायोऽवाच्यतैकांतस्तस्मिन्नवाच्यतैकांते अपि । शब्दार्थयोरवाच्यपक्षेऽपि । उक्तिर्वचन अवाच्य मित्यवक्तव्यमिति । न युज्यते न घटते । स्याद्वादन्यायविद्विषां वादिनामुभयैकात्म्यं न घटते । विरोधात् । विज्ञानशून्यवत् । तथावक्तव्यैकांतपक्षेऽपि अवाच्यमित्येव या उक्तिः साऽपि न युज्यते । सर्वथाऽवाच्यत्वात् । एकशब्देन घटपटादिवत् ॥ १३ ॥

एकहेलया यदि सर्वथा सदसदुभयावक्तव्यमतो नाथ नास्ति कथं तहीत्याह—

अष्टशती—भावाभावयोरेकतरप्रतिषेधैकांतपक्षोपक्षिप्तदोषपरिजिहीर्षया सदसदात्म्यं सर्वथा युक्त तोऽपि वादी विप्रतिषिध्यते । तस्या परस्परपरिहारस्थितिलक्षणत्वात् । न हि सर्वात्मना [illegible] वाऽसंभवमाचक्षाणः स्वस्थः स्वाभ्युपगमेतरनिराकृतिविधानकरणात् शून्यावबोधवत् । [illegible] प्रतिषेधात्—अयेतमप्यस्ति विनाशप्रतिषेधादिति वा तदन्यथापरित्यागाधनीति स्याद्वादाव्यवस्थानन्तर- ष्प्रवेशान्यायमनुसरति । योऽपि पक्षत्रयोपक्षिप्तदोषपरिजिहीर्षया सर्वथाऽवक्तव्यमवक्तव्यमेव [illegible] कथमवक्तव्यं ब्रूयात् । नैव दोषः स्वलक्षणमनिर्देश्यं प्रत्येकं कल्पनापोढमिति वादिवत् । तदयमनुक्त्यास- समुदाहृतं । यथैवाध्यक्षेऽविधानं नास्ति तथाऽनुमाने विषयो नैवास्तीन [illegible] भाषते । न केवल विषयवलात् दृष्टेरुत्पत्तिः-अपि तु चक्षुरादिबलेनैव । तद्वदेव [illegible] न चापि विशेषाभावात् । दर्शनस्य कारणान्तरसद्भावेऽपि विषयाकारानुकारि [illegible] सुनिश्चितं [illegible] मुपलब्धमित्यपि वार्ता स्वाकारज्ञानमात्रानुकरणत्वप्रसंगात् । तदाकारानुकरणेऽपि [illegible] विषयतास्तदभावाभावात् । [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

किमुक्तं भवति ?— स्याद्वेनोः स्यादस्ति १ । स्यान्नास्ति २ । स्यादस्ति नास्ति च ३ । स्याद-
वक्तव्यम् ४ । स्यादस्ति चावक्तव्यम् ५ । स्यान्नास्ति चावक्तव्यम् ६ । स्यादस्ति नास्ति चाव-
क्तव्यं च ७ वस्तुन इत्यर्थः ॥

अस्तित्वादीन् धर्मान् युक्तितः समर्थ्य, अधुना तेषामेकस्मिन्नविरोधेऽवस्थानस्य विरोधस्य च परस्परपरिहारेण रूपादीनामिव युक्तितः समर्थनार्थमाह—

अष्टशती-स्वपररूपाद्यपेक्षं सदसदात्मकं वस्तु न विरुध्यते तथा दर्शनात्, कल्पितप्राप्तिनाभावलक्षण- सायात् स्वानुपलंभव्यावृत्तिलक्षणं दर्शनं प्रमाणयितव्यं । तथाहि—बुद्धिरपि यथा प्रत्यासत्त्या कस्य चित् तथाकारमनुकरोति तया तमेव नियमेनोपलभेत नान्यथा पारंपर्यपरिश्रमं परिहरेत् । विलक्षणस्यापि विल- हेतुफलविज्ञानैर्व्यभिचारात् तदनभ्युपगमे स्वाभ्युपगमासिद्धेः किंसाधनः परमुपालभेत ? । तदेकोऽर्थः स्वपरलक्षणाभ्यां भावाभावात्मनं प्रसाधयति, तदभावे न प्रवर्तयति नापि निवर्तयति प्रमाणान्तरमपि भावाभावाभिधानं नांजसैव विषयीकरोति शब्दशक्तिस्वाभाव्यात् । वचनसूचनसामर्थ्यविशेषानतिक्र- नात् । संकेतानुविधानेऽपि कर्तृकर्मणोः शक्त्यशक्त्योरन्यतरव्यपदेशार्हत्वात् । अयोदाहरणं लक्षणवत् । अन्यथा चाक्षुषत्वादयः शब्दादिधर्मा न भवेयुः । अतो यावंति पररूपाणि तावंत्येव प्रत्यात्मं स्वभावांतराणि तथा परिणामात् । द्रव्यपर्यायौ व्यस्तसमस्तौ समाश्रित्य चरमभंगत्रयव्यवस्थानं । न खलु सर्वात्मकं सामान्यं वाच्यं ? तत्प्रतिपत्तेरर्थक्रियां प्रत्यनुपयोगात् । न हि गोत्वं वाहदोहादावुपयुज्यते । तद्भिन्नया वृत्तिः कथंचित्तादात्म्येन भवेत्, संबंधांतरासिद्धेः कार्मुकादिवत् । तादृशानुपलंभात्संकेतोऽपि न सिद्ध्येत् । सतापि तादृशान्यव्यावृत्त्यात्मना भवितव्यं अन्यथा विशेषवत्स्वभावहानिप्रसंगात् विशेषाणां वा तद्वत्तो व्यावृत्तेर्नचान्यापोहः सर्वथार्थः शब्दस्य विकल्पस्य वा । साधनवचनेन नित्यत्वसमारोप- व्यवच्छेदेऽपि स्वलक्षणस्यानित्यत्वासिद्धौ साधनवचनानर्थक्यात् । विकल्पाभिधानयोर्वस्तुसंस्पर्शाभावे स्वलक्षणदर्शनस्याकृतनिर्णयस्य वस्तुसन्निधेरविशेषात् किं केन प्रमितं स्यात् । न हि मिथ्याव्यवसाय- तत्त्वव्यवस्थानं वस्तुदर्शनसमारोपव्यवच्छेदयोः अन्यतरस्यापि स्वतस्तत्त्वापरिनिष्ठितौ इतरेतराश्रयदोषः । सम्यग्दर्शिनोऽपि क्वचिदन्वयबुद्ध्यभिधानव्यवहारो तत्कार्यकारणव्यतिरेकव्यवस्थायां गुडूच्याद्युदाह- रणप्रक्लृप्तिं विपर्यासयति—॥ १६ ॥

अस्तित्वं प्रतिषेध्येनाविनाभाव्येकधर्मिणि ।
विशेषणत्वात्साधर्म्यं यथा भेदविवक्षया ॥ १७ ॥

वृत्तिः—अस्तित्वं सत्त्वं प्रतिषेध्येन—नास्तित्वेन अविनाभावि—नास्तित्वेन विना न भवति पृथग्भूतं नोपलभ्यत इत्यर्थः । धर्मा अस्य सन्ति धर्मी एकश्चासौ धर्मी च तस्मिन्नेकधर्मिणि । विशेषणत्वात् । उपाधिवशात् । समानो धर्मः सधर्मस्तस्य भावः साधर्म्यमन्वयः । यथा—दृष्टान्तप्रदर्शकः । भेदस्य विव- क्षाऽर्पणा तया इत्यर्थः । एकधर्मिणि शब्दादौ अस्तित्वं नास्तित्वाविनाभावि कुतः ? विशेषणत्वात् । यथा कृतकत्वादौ साधर्म्यं वैधर्म्येण विना न भवति । यद्विशेषणं तत्प्रतिषेध्याविनाभावि यथा साधर्म्यं व्यतिरेक- विवक्षया । दृष्टान्ते विशेषणं चास्तित्वं । तस्मात्प्रतिषेध्यधर्माविनाभावि ॥ १७ ॥

तथा—

अष्टशती— सर्वमित्यमनित्यं चेति प्रतिज्ञाय अभिप्रेत्य वा प्रमेयत्वादिहेतूपादनेऽपि व्यतिरेको- ऽस्त्येव प्रमेयत्वस्य वस्तुधर्मत्वात् । वस्तुत्पादयोऽपि तत्र व्यवहारमिच्छता प्रमेयाः प्रतिपत्तव्या इति न किंचि- त्प्रमाणं प्रमेयाभावस्यापि तथाभावानुषंगेणाव्यवस्थाप्रसंगात् । नचैतद्विरुद्धं स्वलक्षणमनिर्देश्यमित्यादिवत् ।

१ त्रिबिम्बुस्तके उत्पत्तिवदिति पाठः ।

धादर्शने ददाति विफलः स्यात्। तस्मात्सूक्तं येदैकान्तेन सदसद्वा तत्तोत्पत्तुर्महति व्योमवन्ध्यासुतवत्। इति। कथमिदानीमनुपगमस्य गगनादेः स्थितिः? इति चेन् न–अनभ्युपगमात्। द्रव्यनयापेक्षया, परप्रसिद्धया वा उदाहरणं ॥ २१ ॥

धर्मे धर्मेऽन्य एवार्थो धर्मिणोऽनंतधर्मणः।
अंगि वेऽन्यतमांतस्य शेषांतानां तदंगता ॥ २२ ॥

वृत्तिः–धर्मे धर्मे धर्मनिर्देशे । भङ्गे भङ्गे इति वा पाठांतर। अन्य एवार्थोऽपूर्व एवार्थः। कुतः? धर्मिणो वस्तुनः। अनंता धर्माः स्वभावा यस्य सोऽनंतधर्मा तस्यानंतधर्मणः। आङ्गित्वे प्रधानत्वे। अन्यतमांतस्यास्तित्वादीनां मध्ये एकतमस्य। शेषांतानां परिशेषधर्माणां नास्तित्वादीनां। तत्तस्मात्। अंगता अप्रधानता। अथवा सदांगता इति पाठांतरम्। तदा तस्मिन्काले। शेषाणामप्रधानता। अतः पुनरुक्तता नास्ति। अथवा सुनयसप्तभंगीनिरूपणार्थमियं कारिका, सप्तशार्था चेय ॥ २२

सप्तभंगीं योजयन्नाह—

अष्टशती–यदि पुनः प्रत्युपाधि परमार्थतः स्वभावभेदो न स्यात् तदा दृष्टेऽभिहिते वा प्रमाणान्तर मुक्तयंतरं वा निरर्थकं स्यात्। गृहीतग्रहणात्पुनरुक्तेश्च स्वभावातिशयाभावात्, सदुत्पत्तिकृतकत्वादेः प्रत्यनीकस्वभावविशेषाभावात्। यावंति पररूपाणि तावंत्यस्ततस्ततो व्यावृत्तयः प्रत्येकमियत्तापि कल्पना माभूत्। सतां हि स्वभावानां गुणप्रधानभावः स्यात्। ततः परिकल्पितव्यावृत्त्या धर्मांतरव्यवस्थानं परिकल्पप्रायं वस्तुस्वभावाभावप्रसंगात्। तथैकत्रेवबुद्धयोऽपि स्वलक्षणविषया माभूवन्, कथंचं व्यावृत्तिं पश्येयुः, अदृष्टे विकल्पायोगात्। अतिप्रसंगाच्च ॥ २२ ॥

एकानेकविकल्पादावुत्तरत्रापि योजयेत्।
प्रक्रियां भंगिनीमेनां नयैर्नयविशारदः ॥ २३ ॥

वृत्तिः–नयविशारदः नयः प्रमाणपरिगृहीतार्थैकदेशे वस्त्वध्यवसायस्तस्मिन्कुशलः। नयैः स्वं-तुभिर्विशेषणत्वादिभिः। एनां प्रक्रियाम्। भंगिनीं भंगवती भगवदुक्तां। उत्तरत्रापि इह उत्तरत्रापि। योजयेदुद्घाटयेत्। क्व? एकश्च अनेकश्च तावेव विकल्पौ तावादिर्यस्य तस्मिन्नेकानेकविकल्पादौ। कथं? स्यादेकः। स्यादनेकः। स्यादेकश्चानेकश्च। स्यादवक्तव्यः। स्यादेकश्चावक्तव्यः। स्यादनेकश्चावक्तव्यश्च। स्यादेकश्चानेकश्चावक्तव्यश्च। एवमनेन द्वैताद्वैतादिषु योज्य ॥ २३ ॥

सदाद्येकांतेषु दोषमुद्भाव्यैवमद्वैतैकांते दूषयितुमाह—

अष्टशती–स्यादेकं सद्द्रव्यनयापेक्षया। यद्यपि विशेषाः परस्परव्यावृत्तात्मानः कालादिभेदेऽपि सद्रूपाविशिष्टाभिधानज्ञानैर्नीलादिनिर्भासवत् स्यादनेकमपरमार्थसंदति। न हि संख्यासंख्यावतोर्भेदेनादृष्टौ विशेषणविशेष्यविकल्पः कुरुविन्द। क्षीरादकवदतद्देदिन-नचभेदैकांते सद्व्यवस्थि स्यादेकांतनिमित्ताभावात्। अनवस्थाप्रसंगाच्च। तस्मादयं कथंचित् सद्व्यासंप्लवतो स्वभावभेद पैशानि तोरोपरागरूपनात्। वर्णाचनिर्मितेऽप्यन्यत्र सशयाद्, वर्णरमादिवत् ॥ २३ ॥

इत्याप्तमीमांसाभाष्ये प्रथमः परिच्छेदः।

अधुना सर्वथा सर्वपदार्थपृथक्त्वैकांतवादिवैशेषिकादिमतकदर्थनार्थमाह—

अष्टशती—अद्वैतशब्दः स्वाभिधेयप्रत्यनीकपरमार्थापेक्षः नञ्पूर्वाखंडपदत्वात् अहेत्वभिधानवत् । नात्र विशेषदर्शनमवगच्छते तादृशो नञो वस्तुप्रतिषेधनिबंधनत्वात् । सर्वत्र प्रतिषेध्यादृते संज्ञिनः प्रतिषेधाभावः प्रत्येतव्यः ॥ २७ ॥

इदमद्वैतैकांतनिराकरणेन पृथक्त्वैकांतांगीकरणात् इति मावदीधरत् ।

पृथक्त्वैकांतपक्षेऽपि पृथक्त्वादपृथक्तु तौ ।
पृथक्त्वे न पृथक्त्वं स्यादनेकस्थो ह्यसौ गुणः ॥ २८ ॥

वृत्तिः—यद्यप्यद्वैतैकांतपक्षे दोषभयात् पृथक्त्वमित्येकांतपक्षोऽभ्युपगम्यते तथापि पृथग्गुणात्ता-दपृथग्भूतावभ्युपगन्तव्यौ गुणगुण्यादी । अन्यथा तस्मादपि यदि तौ पृथक् भिन्नौ स्यातां तदानीं पृथक्त्वाख्योगुणो न स्यात् ! कुतः । यतोऽनेकस्थो ह्यसौ गुणो दृष्ट इत्यर्थः न च तयोः पृथक्त्वगुणः पृथगस्ति सर्वेषामभावः स्यात् । तस्मात् भेदपक्षोऽपि न श्रेयान् ॥

इदानीं पृथक्त्वैकांतवादिविशेषमायासु क्षणिकत्वैकांतकदर्थनार्थमाह—

अष्टशती—पृथग्भूतपदार्थेभ्यः पृथक्त्वस्य पृथग्भावे तेषामपृथक्त्वप्रसंगात् । तद्गुणगुणिनोरतादात्म्ये घटपटवद् व्यपदेशोऽपि माभूत् संबंधनिबंधांतराभावात् । पृथक्त्वमन्यदा पृथग्भूतमनंशं अनेकस्थेषु निष्पर्यायं वर्तते—इति दुरवगाहं ॥ २८ ॥

संतानः समुदायश्च साधर्म्यं च निरंकुशः ।
प्रेत्यभावश्च तत्सर्वं न स्यादेकत्वनिह्नवे ॥ २९ ॥

वृत्तिः—एकत्वस्य सादृश्यस्य कथंचित्तादात्म्यस्य । निह्नवोऽपह्नुतिर्निराकरणम् । अथवा एकशब्दो द्रव्यवचनोऽयं ततः स्वार्थिकस्त्वप्रत्ययः तस्मिन्नेकत्वनिह्नवे । क्रमभाविनां कारणतद्वतामालीनकमन्दकमधुरकादीनां गोरसजातिमजहतामुत्तरोत्तरपरिणामप्रवाहः संतानो न स्यान्न भवेत् । तथा रूपरसादीनां धर्माणां सहभुवां नियमतो युगपदुत्पादव्ययभाजामेकस्मिन्नवस्थानं समुदयो न स्यात् यदनेकांतात्मकं द्रव्यं न स्यात् । तथा शब्दघटादीनां साधर्म्यं च न स्यात् । मृत्वाऽमुत्र प्राणिनः प्रादुर्भावः प्रेत्यभावः सोऽपि न स्यात् । निरंकुशो निर्बाधोऽस्खलितरूपः सर्वत्र संबंधनीयः । चशब्देन प्रत्यभिज्ञानादयोऽपि न स्युः । तदेतत्सर्वं न स्यादिति समुदायेन निर्देशात् यथायोग्यं संबंधो भवति । सामान्यनिर्देशान्नपुंसकलिंगता ।

पुनरपि भेदैकांते दूषणमाह—

अष्टशती—कार्यकारणयोः पृथक्त्वैकांते कार्यकालमात्मानमनयतः कारणत्वाऽसंभवात्तदनुत्पत्तेः कुतः संततिः ? पूर्वापरकालभाविनोरपि हेतुफलव्यपदेशभाजोरतिशयात्मनोरन्वयः संतानः क्वचिल्लक्षणांतरे नीललोहितादिनिर्भासचित्रैकसंवेदनवत् कथंचिदेकत्वमेव भवितुमर्हति । तदवयवपृथक्त्वकल्पनायां चित्रनिर्भासो माभात् । पृथग्वर्णांतरविषयानेकसंतानैकक्षणवत् तत्र प्रत्यासत्तिविशेषः कथंचिदैक्यात् कोऽपरः स्यात् ! अन्यथा वेद्यवेदकाकारयोरपि पृथक्त्वैकांतप्रसंगात् । स्वभावभेदेऽपि सहोपलंभनियमात्कथंचिदभेदाभ्युपगमे कथमेकसंतानसंविदां समनंतरोपलंभनियमात्कथंचिदैक्यं न स्यात् । तत्र यथा प्रत्यासत्त्या संतानः समुदायश्च तथैव कथंचिदैक्यमस्तु । न हि तादृशां साधर्म्यमन्यदन्यत्रात्मसात्कार्यात् । एकज्ञाननिर्भासविशेषाणां मिथः स्वभावभेदेऽपि यथैकत्वपरिणामः स्वभावतोऽनंकुशः तथा प्रेत्यभावादिषु संतानान्वयः परमार्थैकत्वमात्मसत्त्वजीवादिव्यपदेशभाजनं स्वभावभेदानाक्रम्य स्वाभिवदनन्यत्र वर्तयति ॥ २९ ॥

अधुना सर्वथा सर्वस्यांऽपृथक्त्वैकान्तवादिवैशेषिकादिमतकदर्थनार्थमाह—

अष्टशती—नैकात्मनः सर्वथैकस्मिन्नविकारकार्योत्पत्तेः सद्भूतेतरकारणात् कार्याभिधानवत् । नात्र विधिप्रतिषेधयोः तादृशो भावो वाक्यार्थविरोधनत्वात् । सर्वत्र प्रतिषेध्यादृते क्वचित् प्रतिषेधाभाव प्रसिद्धेः ॥ २७ ॥

इदमपि वैशेषिकाणां पृथक्त्वैकान्तनिराकरणम् इति मनसि धृत्वा ।

पृथक्त्वैकान्तपक्षेऽपि पृथक्त्वादपृथक्तु तौ ।
पृथक्त्वे न पृथक्त्वं स्यादनेकस्थो ह्यसौ गुणः ॥ २८ ॥

वृत्तिः—यद्यपि वैशेषिकाणां सर्वथा पृथक्त्वमित्येकान्तपक्षोऽभ्युपगम्यते तथापि पृथग्गुणात्ता- दपृथग्भूतद्रव्यगुणसम्बन्धौ गुणगुणिनादी । अन्यथा तावपि यदि तौ पृथक् भिन्नौ स्यातां तदानीं पृथक्त्वगुणो गुणो न स्यात् । गुणः । यतोऽनेकस्थो ह्यसौ गुणो यद्यनयोः न च तयोः पृथक्त्वगुणः पृथ- क्त्वेऽपि सर्वेषामभावः स्यात् । तस्मात् भेदपक्षोऽपि न श्रेयान् ॥

इदानीं पृथक्त्वैकान्तवादिवैशेषिकमताश्रित्य क्षणिकैकान्तकदर्थनार्थमाह—

अष्टशती—पृथग्भूतपदार्थेभ्यः पृथक्त्वस्य पृथग्भावे तेषामपृथक्त्वप्रसंगात् । तद्गुणगुणिनोरता- दात्म्ये च तद्वद् व्यपदेशोऽपि माभूत् सम्बन्धविशेषाभावात् । पृथक्त्वमन्यदा पृथग्भूतमसत्-अनेक- स्थेषु निरन्वयं वर्तते-इति दूषणमाह ॥ २८ ॥

सन्तानः समुदायश्च साधर्म्यं च निरंकुशः ।
प्रेत्यभावश्च तत्सर्वं न स्यादेकत्वनिह्नवे ॥ २९ ॥

वृत्तिः—एकत्वस्य सादृश्यस्य कथंचित्तादात्म्यस्य । निह्नवोऽपह्नुतिर्निराकरणम् । अथवा एकशब्दो द्रव्यवचनोऽयं ततः स्वार्थिकस्त्वप्रत्ययः तस्मिन्नेकत्वनिह्नवे । क्रमभाविनां कारणतत्तामाली- नकमन्दकमधुरादीनां गोरसजातिमद्भावानुकरोपरिणामप्रवाहः संतानो न स्यान्न भवेत् । तथा रूप- रसादीनां धर्माणां सहभुवां नियमतो युगपदुत्पादव्ययभाजामेकतीमसमवायानं समुदयो न स्यात् तदनेकांतात्मकं द्रव्यं न स्यात् । तथा शब्दघटादीनां साधर्म्यं च न स्यात् । मृतोऽमुत्र प्राणिनः प्रादुर्भावः प्रेत्यभावः सोऽपि न स्यात् । निरंकुशो निर्बाधोऽसत्यविचारः सर्वत्र सम्बन्धनीयः । चशब्देन प्रत्यभिज्ञानादयोऽपि न स्युः । तदेतत्सर्वं न स्यादिति समुदायेन निर्देशात् यथायोग्यं सम्बन्धो भवति । सामान्यनिर्देशात्पुंसकलिंगता ।

पुनरपि भेदैकान्ते दूषणमाह—

अष्टशती—कार्यकारणयोः पृथक्त्वैकान्ते कार्यकालमात्मानमनयतः कारणत्वाऽसंभवात्तदनुत्पत्तेः कुतः संततिः ? पूर्वापरकालभाविनोरपि हेतुफलव्यपदेशभाजोरतितरामनोरन्वयः संतानः कथंचित्क्षणान्तरे नीललो- हितादिनिर्भासचित्रसंवेदनवत् कथंचिदेकत्वमेव भवितुमर्हति । तदवयवपृथक्त्वकल्पनायां चित्रनिर्भासो भ्रान्तः । पृथग्वर्णान्तरविषयानेकसन्तानैकक्षणवत् तत्र प्रत्यासत्तिविशेष कथंचिदैक्यात् कोऽपरः स्यात् ! अन्यथा देवदत्तयज्ञदत्तसंतानयोरपि पृथक्त्वैकान्तप्रसंगात् । स्वभावभेदेऽपि सहोपलम्भनियमात्कथंचिदभेदाभ्युपगमे कथं- मेकसन्तानसंविदां समनन्तरोपलम्भनियमात्कथंचिदैक्यं न स्यात् । तत्र यथा प्रत्यासत्त्या संतानः समुदायश्च तथैव कथंचिदैक्यमस्तु । न हि तादृशां साधर्म्यमन्यदन्यत्रात्मसाङ्कर्यात् । एकज्ञाननिर्भासविशेषाणां मिथः स्वभावभेदेऽपि यथैकत्वपरिणामः स्वभावतोऽनंकुशः तथा प्रेत्यभावादिषु संतानान्वयः परमार्थैकत्वमात्मस- त्त्वजीवादिव्यपदेशभाजनं स्वभावभेदानाश्रम्य स्वामिवदनन्यत्र वर्तयति ॥ २९ ॥

सदात्मना च भिन्नं चेद् ज्ञानं ज्ञेयाद्द्विधाऽप्यसत् ।
ज्ञानाभावे कथं ज्ञेयं बहिरंतश्च ते द्विषां ॥ ३० ॥

वृत्तिः—तथा चेतन्यस्वरूपेण ज्ञेयात्प्रमेयात् ज्ञानमवबोधो भिन्नमन्यच्चेद्यदि सदात्मना चास्तित्वरूपेणापि पृथक् स्यात् । द्विधाऽपि ज्ञानं ज्ञेयं चानन्यत्वात् । अभावः स्यात् । कुतः ? ज्ञानाभावे बोधशून्ये कथं ज्ञेयम् । बहिरपि । अन्तः अनन्तं च । ते द्विषां तुभ्यं द्विषता मिथ्यादृशाम् । यस्माज्ज्ञाने सति ज्ञेय विषयत्वात्, ज्ञेयं सति ज्ञानं च भवति तत्परिच्छेदकत्वात् । तस्मात् ज्ञानं कथंचिदभिन्नेनैतिर्म सदात्मनाऽन्यथाऽवस्तु स्यात् ।

सार्थविशेषस्य वाच्यवाचकतेष्यते तस्य पूर्वमदृष्टत्वात्सामान्यं त्वपदिश्यते शब्दैरित्यभिप्रायवतो मतमाश्रित्य तत्कदर्थयितुमाह—

अष्टशती—विषयिणो विषयात्कथंचित्स्वभावभेदेऽपि सदाद्यात्मना तादात्म्यं बोधाकारस्येव विषयाकारात्, विशेषाभावात् । अन्यथा ज्ञानमवस्त्वेव खपुष्पवत् । तदभावे बहिरंतर्वा ज्ञेयमेव न स्यात् तदपेक्षत्वात् ॥ ३० ॥

सामान्यार्था गिरोऽन्येषां विशेषो नाभिलप्यते ।
सामान्याभावतस्तेषां मृषैव सकला गिरः ॥ ३१ ॥

वृत्तिः—अथ मतं सामान्यमस्माभिरिष्यते किंतु शब्दगोचरत्वादवस्तु, अत आह । सामान्यं विकल्पेनेष्टोऽर्थो वाच्यो यासां ताः सामान्यार्थाः । गिरो वाचः । अन्येषां मिथ्यादृशां । यतस्ताभिर्विशेषो याथात्म्यं स्वलक्षणं नाभिलप्यते । यद्येवं सामान्यं तेषामवस्तु अतस्तस्याभावात्सकलाः समस्ता गिरो वचनानि मृषैवासत्यरूपा एव अतो न वाच्यं नापि वाचकोऽनुमानाभावः ॥ ३१ ॥

उभयैकांतं निराकर्तुकामः प्राह—

अष्टशती-विशेषाणामशक्यसमयत्वात्–असंकेतितानभिधानात् विशेषदर्शनवत्तद्बुद्धावप्रतिभासनात् अर्थसंनिधानानपेक्षणाच्च, स्वलक्षणमनभिधेयं सामान्यमवस्तु ? उच्यत इति वस्तु नोच्यत इति स्यात् । ततः किं शब्दोच्चारणेन संकेतेन वा ? गोशब्दोऽपि हि गां नाभिधत्ते यथाश्वशब्दः । तथा च मौनं यत्किंचिद्वा वचनमाचरेत् विशेषाभावात् । अस्ति विशेषः कथं स्वार्थं नाभिदधीत न वै परमार्थैकतानत्वात् अभिधाननियमः किन्तूपादानविशेषात् ? इत्यपि वार्ते अविकल्पोऽपि तथैव प्रसंगात् । तदेवमनवधारितात्मकं वस्तुस्वलक्षणमासनीयेत । नाक्षयमिन्द्रियज्ञानं–अर्थसंनिधानमपेक्षते विभ्रमाभावप्रसंगात् । नापि विशदात्मकमेव दूरेऽपि तथाप्रतिभासप्रसंगात् । यथारात् । क्षणभंगादिसाधनवचनमन्यद्वा न किंचित्सत्यं वक्तुरभिप्रेतमात्रसूचितत्वात् । प्रधानेश्वरादिसाधनवाक्यवत् । सदर्थाप्रतिपादनाद्वा प्रसिद्धालीकवचनवत् । इत्यविकल्पार्थाकारयोः कथंचिदप्यतादात्म्ये स्वलक्षणं सर्वथानवधारितलक्षणं दानादिचेतोधर्मादिक्षणवत् कथं संप्रतिपत्तिवर्तेत । विकल्पाना चावस्तुविषयत्वादविकल्पेतरयोरर्थतत्त्वविषयत्वमन्यद्वा स्वांशमात्रावलंबिना विकल्पांतरेण प्रत्येतीति मुग्धविलसितं देवानांप्रियः । तत एव विकल्पसंविदो निर्णये स्वलक्षणविषयोऽपि विकल्पः स्यात् । परतश्चेत् ? अनवस्थानादप्रतिपत्तिः । अतोऽर्थविकल्पोऽपि माभूत् इत्यप्रकल्प्यं जगत्स्यात् । नचायं परोक्षबुद्धिवादमतिर्नैव स्वयमनिर्णीतेन नामात्मना बुद्धिरयं व्यवस्थापयतीति मुग्धविलसितं तस्य । न वै स्वतः परतो वा बुद्धिरध्यवस्यति निर्विषयत्वादविधानेः । इदमतोऽत्यन्ततरं बहिरंतश्च सद्भावासिद्धेः । स्वपरस्वभावप्रतिपत्तिशून्येन स्वपरपक्षसाधनदूषणव्यवस्थां प्रत्येतीति किमपि महाद्भुतं ॥ ३१ ॥

---

१ ज्ञेय अवस्तुत्वं । २ तथागतमते स्वलक्षणविषयं प्रत्यक्षं सामान्यविषयं चानुमानं तत्र सामान्याभावे तुल्यानाभावः अवस्तुत्वं ।

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम् ।
अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ३२ ॥

वृत्तिः—अत्र भी परकीये दोष उभयैकात्म्यमेषितव्यमिति दूषणमाह । एकत्वपृथक्त्वपरस्परानपेक्षोभयैकात्म्यमपि न संभवति अस्तित्वनास्तित्ववत् प्रतिषेधात् । एकान्तस्य निराकृतत्वात् । अवाच्यैकान्तेऽपि न । अवाच्यमित्युक्तिः साऽपि न संभवति मिथ्यात्वात् ।

सामान्यविशेषौ परस्परानपेक्षावभ्युपगतौ निरस्य तौ सापेक्षौ सन्तावर्थक्रियां कुरुत इत्यस्यार्थस्य प्रतिपादनार्थमाह—

अष्टशती—अविरोधश्चेदिति नैकान्तानेकान्तवत् पृथक्त्वैकत्वयोरप्यवाच्यत्वाभावस्याभ्युपगमोऽपि माभूत् विप्रतिषेधात् । न खलु सर्वात्मना विरुद्धधर्मयोः सम्भवोऽस्ति तदन्योन्यविधिप्रतिषेधलक्षणत्वात्, बन्ध्यासुतवत् । सर्वथानभिलाप्यत्वाभ्युपगमेऽपि न केवलमभिलाप्यं तत्त्वमिति तदुक्त्याहन्यते ॥ ३२ ॥

अनपेक्षे पृथक्त्वैक्ये ह्यवस्तु द्वयहेतुतः ।
तदेवैक्यं पृथक्त्वं च स्वभेदैः साधनं यथा ॥ ३३ ॥

वृत्तिः—परस्परानपेक्षे पृथक्त्वैक्ये सामान्यविशेषावस्तु अर्थक्रियाकारि न भवति द्वयहेतोर्द्वाभ्याम् । कथं ? यद्विशेषरहितं तन्नास्ति यथा खरविषाणं सामान्यं च तथा परपरिकल्पितं । तस्मान्नास्ति विशेषः सामान्यशून्यत्वात् । खरविषाणविशेषवत् । इत्यनेन हेतुद्वयेन सामान्यविशेषयोरवस्तुत्वं साधनीयं । तदेव वस्तु ऐक्य-सामान्य-विशेषश्च पृथक्त्वं च द्वयात्मकं । कुतः ? अविरोधात् । यथा साधनं हेतुर्ज्ञानं वाक्यं वा स्वभेदैः स्वधर्मैः पक्षधर्मान्वयव्यतिरेकादिभिर्भिन्नमेकं भवति ।

ननु तदेवैक्यं पृथक्त्वं च कथं ? यावता विरुद्धमेतत् ,—

अष्टशती—एकत्वपृथक्त्वैकान्ततायां स्वतः प्रत्यक्षादिविरोधात् इति दर्शयति—पृथक्त्वैकत्वे तथाभूते न स्तो—एकत्वपृथक्त्वरहितत्वाद् व्योमकुसुमादिवत् । सापेक्षत्वे हि तदेवैक्यं पृथक्त्वमित्यविरुद्धं सपक्षविपक्षयोर्भावाभावाभ्यां साधनवत् । स्वभेदैर्वा संवेदनवत् । सारंभकावयवैर्वा घटादिवत् । तादृशं हि साधनं स्वार्थक्रियासमर्थं तदेवेत्यादि पाठान्तरमिदं बहुसंगृहीतं भवति ॥ ३३ ॥

सत्सामान्यात्तु सर्वैक्यं पृथग्द्रव्यादिभेदतः ।
भेदाभेदविवक्षायामसाधारणहेतुवत् ॥ ३४ ॥

वृत्तिः—सतोऽखिलस्य सामान्यं यस्तथा तस्माच्च सर्वस्यैक्यमेव । द्रव्यादिभेदैर्द्रव्यपर्यायगुणादिभेदैरथवा द्रव्यक्षेत्रकालभावैर्भिन्नं पृथक्त्वादेव । भेदश्चाभेदश्च तयोर्विवक्षायां क्रियमाणायामसाधारणहेतुः श्रावणत्वप्रमाणादिमत्त्वादिसद्भूत् । यद्यप्यसान्वयो नास्ति तथाप्यन्यथानुपपत्तिबलेन सिद्धमिति ॥ ३४ ॥

केषांचिद्विद्यमानस्याविवक्षाऽविद्यमानस्यैव विवक्षा अन्येषां वैयाकरणानां विद्यमानस्यैव विवक्षा नाविद्यमानस्य, अन्येषां विवक्षा नास्त्येतन्मतनिराकरणायाह—

अष्टशती—सर्वार्थानां समानपरिणामेऽपि कथंचिदैक्यं भेदानां स्वभावसांकर्यानुपपत्तेः । यथैकभेदस्य स्वभावविच्छेदाभावात् । अन्यथैकं सदन्यदसत्स्यात् ? तत्समजसं सर्वमेकं सदविशेषात् इति । तथैव सतो द्रव्यादिभेदात् पृथक्त्वं । तदाहाप्यत्र ॥ ३४ ॥

विवक्षा चाविवक्षा च विशेष्येऽनंतधर्मिणि ।
सतो विशेषणस्यात्र नासतस्तैस्तदर्थिभिः ॥ ३५ ॥

वृत्तिः–सतो विद्यमानस्य विशेषणस्यास्तित्वादेर्विवक्षा चाविवक्षा च । नासतो नाविद्यमानस्य क्रियते । कैस्तदर्थिभिर्विवक्षाप्रयोजनवद्भिः । अत्रैकस्मिन् । कुतः ? लोकप्रसिद्धमेतत् ।

कस्यचिद्भेदः संवृतिकल्पितोऽन्यस्याभेदः संवृतिकल्पित इत्येतां दुरागमवासनाजनितां विप्रतिपत्तिं निराकर्तुमाह–

अष्टशती–विधिप्रतिषेधधर्माणां सतामेव विवक्षेतराभ्यां योगस्तदर्थिभिः क्रियेत अन्यथा अर्थनिष्पत्तेरभावात् उपचारमात्रं तु स्यात् । नचाऽग्निर्माणवक इत्युपचारात्पाकादावुपयुज्यते । तदेकैकशः परस्परवृत्तयोऽपि परिणामविशेषाः ॥ ३५ ॥

प्रमाणगोचरौ संतौ भेदाभेदौ न संवृती ।
तावेकत्राविरुद्धौ ते गुणमुख्यविवक्षया ॥ ३६ ॥

वृत्तिः–भेदाभेदौ प्रमाणगोचरौ-प्रमाणविषयौ संतौ–भवंतौ संवृतिरूपावपरमार्थौ न प्रमाणविषयत्वात् । अतस्तवागमे तावेकत्रैकस्मिन् धर्मिणि न विरुद्धौ । गुणविवक्षया अप्रधानविवक्षया । मुख्यविवक्षया प्रधानविवक्षया । दृश्यते च लोके प्रधानाप्रधानविवक्षा यथाऽनुदरा कन्येत्यादि ॥ ३६ ॥

नित्यत्वैकांतं निराकर्तुकाम आह–

अष्टशती–प्रमाणमविसंवादिज्ञानमनधिगतार्थाधिगमलक्षणत्वात् । तदेवं सति भेदमभेदं वा नान्योन्यरहितं विषयीकरोति । न हि बहिरंतर्वा स्वलक्षणं सामान्यलक्षणं वा तथैवोपलभामहे यथैकांतवादिभिराम्नायते । सूक्ष्मस्थूलाकाराणां स्थूलसूक्ष्मस्वभावव्यतिरेकेण प्रत्यक्षादावप्रतिभासनात् तत्र स्वभावांतरप्राधान्यविवक्षाया-आकारांतरस्य गुणभावः स्यात् । घटोऽयं परिमाणवो रूपादयो वेति ॥ ३६ ॥

इति आप्तमीमांसाभाष्ये द्वितीयः परिच्छेदः ।

नित्यत्वैकांतपक्षेऽपि विक्रिया नोपपद्यते ।
प्रागेव कारकाभावः क्व प्रमाणं क्व तत्फलम् ॥ ३७ ॥

वृत्तिः–उक्ताशेषदोषभयान्नित्यत्वैकांतपक्ष आश्रीयते तत्रापि सतो भावस्यांतरावाप्तिर्विक्रिया [illegible] नोत्पादेन न घटत इत्यर्थः । अत एव कारणात् कारकाणि कर्त्रादीनि तेषामभावः शून्यता । प्रागेव । तस्मिन्नभावे कारकविशेषप्रमाणवस्तुयाथात्म्यप्रतिपादकं क तस्मिन् किंतु न किंचिदपि । तदभावे प्रमाणफलमुपादानहानादिकम् ? ॥ ३७ ॥

मा भूद्विक्रिया व्यंग्यव्यंजकभावो भविष्यतीत्यत आह–

अष्टशती–सदसदेकान्तप्ररूपणानन्तरं नित्यैकान्तप्रतिषेधः । पूर्वापरस्वभावपरिहारावाप्ति[illegible] लक्षणविक्रिया कौटस्थ्येऽपि [illegible] कथमनुमतः ? कारकज्ञापकहेतुव्यापारासंभवात् । परिणामि[illegible] [illegible] स्वभावयोगात् । [illegible] निवारणमभिप्रेतं प्रमाणादि[illegible] [illegible] ॥ ३७ ॥

प्रमाणकारकैर्व्यक्तं व्यक्तं चेदिंद्रियार्थवत् ।
ते च नित्ये विकार्यं किं साधोस्ते शासनाद्बहिः ॥ ३८ ॥

वृत्तिः—प्रमाणानि प्रत्यक्षादीनि । कर्तृकर्मकरणसंप्रदानापादानाधिकरणानि कारकाणि तैर्व्यक्तं प्रकाशितं व्यंजितं कृतं । व्यक्तं महदादि । यथेंद्रियैश्चक्षुरादिभिरर्थो विषयः । घटादिः । ते च व्यंग्यव्यंजके नित्ये अविचलितैकरूपे । किं विकार्यं याचता हि न किंचिदपि । तव साधोर्मुनेः शासनात् प्रवचनात् । बहिरतिक्रम एव हि विकारो यो वस्तुनोऽन्यथाभावो व्यक्तिरूपेणान्यथाभावः अव्यक्तात्मकमन्यत् । तव शासने पुनः सर्वं सुघटम् ।

पुनरपि कदर्थयितुमाह—

अष्टशती-अथ मतं—प्रमाणकारकाणि व्यवस्थितमेव भावं व्यंजयंति । चक्षुरादिवत्स्वार्थं ततो न किंचिद्विप्रतिषिद्धं । विषयविशेषविज्ञानादेः शाश्वतत्वान्न किंचिद् व्यक्तार्थं पश्यामः । कथंचिदसतो [illegible] सर्वैकान्तविरोधात् तदभावविकार्यानुपपत्तेः । न वै किंचिद्विरुद्धं कार्यकारणभावाभ्युपगमात् इत्यनाकुलितस्सिद्धांतः ॥

यदि सत्सर्वथा कार्यं पुंवन्नोत्पत्तुमर्हति ।
परिणामप्रक्लृप्तिश्च नित्यत्वैकान्तबाधिनी ॥ ३९ ॥

वृत्तिः—असत्किंचिदपि नोत्पद्यते सर्वं सर्वत्र सर्वदास्त्येव आह । यदि सर्वथा नित्यप्रकारेणैव शक्त्यात्मना एवं व्यक्तात्मनापि कार्यं घटादिकं सत् विद्यमानं पुमानिव पुरुषवत् सांख्यपरिकल्पितपुरुषवत् । नोत्पत्तुं नो प्रादुर्भवितुमर्हति योग्यं भवति । यत्सर्वथा सत् न तदुत्पद्यते यथा सांख्यपुरुषः सर्वथा कार्यं तस्मान्नोत्पद्यते । अथ व्यवस्था सत्य द्रव्यस्य धर्मांतरत्यागेन धर्मांतरोपजननं परिणाम इष्यते । तत्र आह परिणामस्य प्रक्लृप्तिः कल्पना समर्थनं च सर्वस्य नित्यत्वमिति योऽयमेकान्तस्तस्य बाधिनी निराकरणशीला विरोधिनी इत्यर्थः ।

अतो बन्धमोक्षादिकमत्र न संभवति नित्यत्वात्प्रकृतिपुरुषयोरस्य मते पुनः सम्बन्धीयमाह—

अष्टशती-न तावदसतः कार्यत्वं चैतन्यवत् । नाप्यसतः सिद्धांतविरोधात् गगनकुसुमवत् । नान्यथैकांतप्रकारांतरमस्ति । विवर्तादेः पूर्वोत्तरस्वभावप्रध्वंसोत्पत्तिलक्षणत्वात् । तदेव चैतन्यं व्यक्तं [illegible] नित्यत्वप्रतिषेधात्-अपेतमप्यस्ति विनाशप्रतिषेधात् इत्यनेकान्तोऽनिच्छतोऽपि बलादायात एवेत्यवगम्यते ॥ ३९ ॥

पुण्यपापक्रिया न स्यात् प्रेत्यभावः फलं कुतः ।
बंधमोक्षौ च तेषां न येषां त्वं नासि नायकः ॥ ४० ॥

वृत्तिः—मैत्रीप्रमोदकरुणादिक्रियाऽभावे कुतः पुण्यहेतुत्वात् पुण्यं । हिंसादिदुष्टक्रियाः पापहेतुत्वात्पापं । तयोः क्रिया तयोरुपार्जनं न स्यान्न भवेत् अत एव क्रियाऽभावे कुतः [illegible] । [illegible] फलं च सुखदुःखादिरूपं कुतः । बंधः कर्मणाऽऽत्मनो बंधनं मोक्षः [illegible] एतौ च द्वौ तेषां न येषां त्वं नासि—न भवसि नायकः प्रभुः । विमुक्तो भवति एतेषां [illegible] एव [illegible] कुतः । विक्रियाऽभावात् ॥

न केवलं नित्यैकान्त एतेषामभावः किंतु—

अष्टशती-नैव प्रेत्यभावादिकमिति सिद्धमवसीयते पुण्यपापप्रेत्यभावबंधमोक्षादिकमनुपपन्नं [illegible] । न चैतत्कस्यचिदिष्टं समस्ति ॥ ४० ॥

क्षणिकैकान्तपक्षेऽपि प्रेत्यभावाद्यसंभवः ।
प्रत्यभिज्ञाद्यभावान्न कार्यारंभः कुतः फलं ॥ ४१ ॥

वृत्तिः—क्षणिको [illegible]

[illegible]

दनवद्यादिसारंभ आदिक्रिया । अतः कुतः फलं सम्पन्नादिकं परिहार्योऽनित्यस्य । अस्माकं तत्कार्यं नास्ति नान्यस्मादपि न संभवेत् । आदिशब्देन पर्यालोचनादयः समानाधिकरणा ग्रहणं । यदि कश्चित् नित्य एवं स्यादपादानादीन्यपि यदि स्थिराणि नित्यस्य कार्यस्य, एतद्योगे एव तन्निराकरणमपि । कथंचिदपि कार्य-रूपेण परिणमति[१] तदा सर्वं सुघटं नान्यथा ॥ ४१ ॥

तत्र कारणे कार्यं मनागपि नास्तीति चेदत आह—

अष्टशती-क्षणक्षयैकांतदर्शनेऽपि हिंसादि, असंभवप्रेत्यभावादित्वात् उच्छेदैकांतवत् । मैत्र्यैकांतात्मुक्तवद्वा । भिन्नकालक्षणानामसंभवद्भावलनत्वात् अकार्यकारणवत् । न विनष्टं कारणमसत्त्वाविशेषान्निरुत्पत्तितत्त्वात् । समनंतरत्वेऽप्यभावाविशेषात् । न च पूर्वस्योत्तरं कार्यं तदसत्त्वे हि भावात् वस्त्वंतरवत् अनितिक्रांतनवत्त्वा नहि समर्थेऽस्मिन् सति स्वयमनुत्पित्सोः पश्चाद्भवतस्तत्कार्यत्वं ? समनंतरत्वं वा नित्यवत् । कारणाभाव-विशेषेऽपि कार्योत्पत्तिसमयनियमावक्लृप्तौ कस्यचित् कादाचित्कत्वेऽपि तत्कारणसामर्थ्यमनुद्भावाभेदेऽपि कार्यजन्मकालनियमः किं न स्यात् ? विशेषाभावात् । तथा चाकस्मिकत्वं स्यात् । उभयत्राविशेषेण कथंचिदनुमानेऽपि क्वचिद् व्यपदेशकल्पनायामन्यत्रापि किं न भवेत्क्षणस्थितिः- । एकोऽपि भावोऽनेकस्वभावः चित्रज्ञानवत् नानार्थवत् । न हि कारणशक्तिभेदमंतरेण कार्यनानात्वं युक्तं रूपादिज्ञानवत् । अन्यथा रूपादिनानात्वं न सिद्ध्येत् चक्षुरादिसामग्रीभेदात् तज्ज्ञाननिर्भासभेदोऽवकल्पेत । युगपदेकार्थोपनिबद्धदृष्टीनामपि भवितव्यं प्रतिभासभेदेन कारणसामग्रीभेदात् । अन्यथा दर्शनभेदोऽपि. माभूत् । प्रत्यासन्नेतरयोर्वैशद्येतरनिर्भासोपलब्धेः । सेयमुभयतः पाशारज्जुः । सकलकारणस्वभावभेदमंतरेण यदि कार्यनानात्वं क्रमतोऽपि कस्यचिदपेक्षितसहकारिणः कार्यसंततिः किं न स्यात् । सहकारिणस्तद्धेतुस्वभावमभेदयंतोऽपि कार्यभेदहेतव एक क्षणक्षयवत् । न हि कादाचित्कानि तत्कर्तुं समर्थानीति स्थिरोऽर्थस्तत्कारणस्वभावं जहाति तद्बुद्धिहेतुकत्वाभावात् । क्षणिकसामग्रीसन्निपतितैककारणांतरवत् । कल्पयित्वापि स्वहेतुप्रकृतिं भावानां स्वप्रकृतिरवश्यं-अन्वेष्याः । तत्स्वभावावशात्तत्कारणप्रकृतिव्यवस्थापनात् । तदयमकारणोऽपि स्वभावनियतोऽर्थः स्यात् । यद्यद्भावं प्रत्यनपेक्षं तत्तद्भावानियतं तथा विनाशं प्रत्यनपेक्षं विनश्वरं तथैव स्थितिं प्रत्यनपेक्षं स्थास्नु तद्धेतोरकिंचित्करत्वात् तद् व्यतिरिक्ताव्यतिरिक्ताकारणात् इत्यादि सर्वं समानं । आदौ स्थितिदर्शनात् विद्युत्प्रदीपादेरंतेऽपि स्थितेरनुमानं युक्तं । अन्यथांते क्षयदर्शनात् आदौ तत्प्रतिपत्तिरसमंजसैव तादृशः कारणादर्शनेऽपि कथंचिदुपादानानुमानवत् तत्कार्यसंतानस्थितिरदृष्टाप्यनुमीयेत । तस्मात्कथंचन स्थितिमतः प्रतिक्षणं विवर्तोऽपि नान्यथा प्रमाणादेरयोगात् । कुतः प्रेत्यभावादिः ? सत्यपि हेतुफलभावे कारणकार्यांतरवत् संततिर्न स्यात् । अतादात्म्याविशेषात् तत्स्वभावविशेषावक्लृप्तौ तादात्म्येऽपि कोऽपरितोषः ! विशेषस्य सर्वथाप्यपरिहार्यत्वात् । तत्संतानापेक्षया प्रेत्यभावादिः मामस्तु ज्ञानज्ञेययोः प्रतिक्षणं विलक्षणत्वात् । न वै प्रत्यभिज्ञादिः पुरुषांतरवदर्थांतरवच्च । ततः कर्मफलसंबंधोऽपि नानासंतानवदनियमात् न युक्तिमवतरति । तन्मूलं क्षणक्षयैकांतपक्षो विद्वद्भिरनादरणीयः सर्वथार्थक्रियाविरोधात् नित्यैकांतवत् । सत्येव कारणे यदि कार्यं त्रैलोक्यमेकक्षणवर्ति स्यात् । ततः संतानाभावात् पक्षांतरासंभवाचेति स्थितमेतत् ॥ ४१ ॥

यद्यसत्सर्वथा कार्यं तन्माजनि खपुष्पवत् ।
मोपादाननियामोभून्माऽऽश्वासः कार्यजन्मनि ॥ ४२ ॥

वृत्तिः—सर्वथा शक्तिव्यक्तिस्वरूपेण यदसदविद्यमानं तत्कार्यं माजनि माभूत् । खपुष्पं गगनकुसुमं तदिव खपुष्पवत् । उपादानं मृत्पिंडतंत्वादिकं तस्य नियामोऽस्मादेतत्कार्यं भवतीति निश्चयः सोऽपि माभूत् । आश्वासोऽस्मादेतद्भविष्यत्ययमपि माभूत् । कार्यजन्मनि कार्योत्पत्तौ ॥ ४२ ॥

पुनरपि दोषमुद्भावयितुमाह—

१ । एतदेवमेव पाठोऽयं लिखितपुस्तके । २ परिणमनमपि पाठोयं मुद्रितपुस्तके ।

अष्टशती—कथंचित् सतः कार्यत्वं-उपादानस्योत्तरीभवनात् सदपि विरुद्धधर्माध्यासानिराकृतेः । तथा चान्वयव्यतिरेकप्रतीतेर्भावस्वभावनिबंधनायाः किं फलमपलापेन । तदन्यतरनिराकृतावुभयनिराकृतिः-अभेदात् । तत्रासत्कार्यं सर्वथानुत्पादप्रसंगात् खपुष्पवत् । न तादृशं कारणत्वं सर्वथाऽभूतत्वात् वंध्यासुतवत् । कथंचिदस्थितानुपपन्नत्वादिति योज्यं । सत्यपि प्रभवलक्षणे पूर्वपूर्वस्योत्तरीभवने मृत्पिंडस्थासकोशकुशूला-दिषु सकललोकसाक्षिक, स्वमनीषिकाभिः सदसत्परापरोत्पत्तिविभङ्गभानवधारण.वकल्पिमारचयतां नोपादान-नियामोऽभूत्कारणांतरवत् तदन्वयाभावाविशेषात् सर्वथा वैलक्षण्यात् । निरन्वयत्वाविशेषेऽपि तादृशी प्रकृतिरात्मानं कारणांतरेभ्यो यया विशिनष्टीति चेत् ? न अत्यंतविशेषानुपलब्धेः । तदविशेषादर्शने सर्वथा साम्यं स्यात् । तस्मात् इयमस्य प्रकृतिर्यया पूर्वोत्तरस्वभावहानोपादानाधिकरणस्थितिं प्रतिक्षणं बिभर्ति यतोऽयमुपादान-नियमः सिद्धः । अथापि कथंचिदुपादाननियमः कल्प्येत कार्यजन्मनि कथमाश्वासः ? तदन्वनासनः-कार्यस्योत्पत्ते. तंतुभ्यः पटादिरेव न घटादिरिति निर्हेतुको नियमः स्यात् । पूर्वपूर्वविशेषादुत्तरोत्तरनियमकल्प-नायामनुपादानेऽपि स्यात् । तथादर्शनमहेतुरनेव विचारात् कथंचिदाहितविशेषतंतुनां पटस्वभावप्रतिलं-भोपलंभात् । तदन्यतरविधिप्रतिषेधनियमनिमित्ताभावात् प्रतीतेरलमपलापेन । तस्मादुभयलक्षणमनुरुध्यमानाऽन्वयस्यैव न पुनरभयस्यास्येत्यलं प्रसंगेन ॥ ४२ ॥

न हेतुफलभावादिरन्यभावादनन्वयात् ।
संतानांतरवन्नैकः संतानस्तद्वतः पृथक् ॥ ४३ ॥

वृत्तिः—क्षणिकैकांतपक्षे हेतुः-कारणं । फलं-कार्यं तयोर्भावोऽस्तित्वं स आदिर्यस्य स हेतुफलभावादि-रुपादानोपादेयस्वरूपं कार्यकारणभावो वाध्यवाचकभावश्च न स्यात् । कुतः ? अन्यभावादन्यपृथक्त्वात् । कस्मात् ? अनन्वयादेकस्य पूर्वापरावस्थाऽभावात् । तथा संतानांतरे प्रस्तुतसंतानादन्य संतानः संतानांतरं तस्मिन्यथा न संभवति कार्यकारणभाव, वृत्तिकारैरिदृश । अभ्युपगम्येनद्युक्तं परमार्थतस्तु संतानिभ्यो भिन्ने-भ्यः पृथग्भूतेषु, ततो न कश्चिदेकः संतानोऽनुगतैकाकारः । अन्यानन्यभावाभ्यां निराकृतत्वात् । तस्मात् संतानो नापि संतानिन इति ॥ ४३ ॥

पुनरपि तस्य दूषणमाह—

अष्टशती—विलक्षणानामत्यंतभेदेऽपि स्वभावतः किञ्चित्संकीर्णाः संतान कर्मफलसंबंधादिनिबंधनं स्यात् विषाणस्येव वर्तुलत्वमारचितं कथंतनः श्रद्धीत ? ॥ ४३ ॥

अन्येष्वनन्यशब्दोऽयं संवृतिर्न मृषा कथं ।
मुख्यार्थः संवृतिर्नास्ति विना मुख्यान्न संवृतिः ॥ ४४ ॥

वृत्तिः—नन्वे संतानिभ्यो व्यतिरिक्तः संतानो नास्ति किं तु अन्येषु पृथग्भूतेषु योऽयमनन्यशब्दो-ऽनन्यबुद्धिश्च संतानः सा संवृतिरुपचारः । यद्येवं कथं सा न मृषा असत्या भवेत् ? । न च मुख्यार्थः संवृतिरस्ति तस्यास्तुच्छत्वात् । संवृतिरुपचारः । न च मुख्यार्थमन्तरेण संवृतिः, सति मुख्यार्थे तस्याः संभवो यथा सिंहोऽयं माणवकः. सति मुख्यसिंहे माणवके सिंहकल्पना । न चैवं संवृ-तेर्न मुख्यार्थ इति ॥ ४४ ॥

कथमेव परिकल्प्यते—

अष्टशती—संतानिभ्योऽनन्यः संतानः अन्यथा आत्मनो नामांतरकरणात् निराकृतिरिति लक्षणमुक्तं ।

---

१ पूर्वोत्तरभावान वाऽऽद्य लिखितपुस्तके । २ वृत्तिरिदं इव वर्ते टिप्पणपुस्तके । ३ तस्मात् संतानो नापि संतानिन इति लिखितपुस्तके ।

अपि तु तेष्वनन्यव्यवहारादेकत्वमुपचरितमिति । व्यर्थीकव्यवहारोऽपि विशेषानुपपत्तेः [illegible] यस्थः । उपचारस्तु नर्ते मुख्यात् यथाग्निर्माणवक इति स्खलति हि तत्रानन्यप्रत्ययः परीक्षाऽक्षमत्वात् । [illegible] एवामुख्यार्थः प्रस्तुतासाधनं ॥ ४४ ॥

चतुष्कोटेर्विकल्पस्य सर्वान्तेषूक्त्ययोगतः ।
तत्त्वान्यत्वमवाच्यं च तयोः संतानतद्वतोः ॥ ४५ ॥

वृत्तिः-यथा सर्वधर्मेषु चतस्रः कोटयो सत्त्वैकत्वादिषु विभागा यस्यासौ चतुष्कोटिर्विकल्पस्य सदसदुभयादिभेदभिन्नस्य विकल्पस्य । उक्तिर्वचनं तस्या अयोगोऽसंभवः ततः । तयोः संतानतद्वतोश्चतुष्कोटेर्विकल्पस्य वचनस्यायोगात्तत्त्वान्यत्वमेकत्वानेकत्वमवाच्यं ॥ ४५ ॥

चेदत आह—

अष्टशती-सत्त्वैकत्वादिषु सर्वधर्मेषु सदसदुभयानुभयचतुष्कोटेरभिधातुमशक्यत्वात् संतानतद्वतो भेदाभेदोभयानुभयचतुष्कोटेरनभिलाप्यत्वं । सत्त्वे तदुत्पत्तिविरोधात्-असत्त्वे पुनरुच्छेदपक्षोपक्षिप्तदोषात् । उभयत्रोभयदोषप्रसंगात् । अनुभयपक्षेऽपि विकल्पानुपपत्तिरित्यादि योज्यं ॥ ४५ ॥

अवक्तव्यचतुष्कोटिविकल्पोऽपि न कथ्यतां ।
असर्वान्तमवस्तु स्यादविशेष्यविशेषणं ॥ ४६ ॥

वृत्तिः-तर्ह्यवक्तव्यचतुष्कोटिविकल्पोऽपि यः सोऽपि न कथ्यतां नोच्यतां मामाणीदित्यर्थः । अन्यथा भेदाभेदोभयानुभयस्वरूपेणाभिलाप्यत्वे कथंचिदनभिलाप्यत्वं स्यात् । अन्यथैवं सति असर्वान्तं सर्वविकल्पातीतमवस्तु स्यात् । अविशेष्यविशेषणं स्यात् । विशेष्यत इति विशेष्यः विशेष्यतेऽनेनेति विशेषणं तयोरभावात् ॥ ४६ ॥

अन्यच्च प्रतिषेधोऽपि न घटते, तत्कथमत आह—

अष्टशती-न हि सर्वथानभिलाप्यत्वेऽनभिलाप्यचतुष्कोटेरभिधेयत्वं युक्तं कथंचिदभिलाप्यत्वप्रसंगात् । अपि चैवं सति सर्वविकल्पातीतमवस्त्वेव स्यादन्यत्र वाचोयुक्तेः ॥ ४६ ॥

द्रव्याद्यंतरभावेन निषेधः संज्ञिनः सतः ।
असद्भेदो न भावस्तु स्थानं विधिनिषेधयोः ॥ ४७ ॥

वृत्तिः-द्रव्यमादिर्येषां ते द्रव्यक्षेत्रकालभावास्तेभ्योऽन्यानि द्रव्याद्यंतराणि तेषामभावस्तेन परद्रव्यपरक्षेत्रपरकालपरभावस्वरूपेण यः प्रतिषेधः सतो विद्यमानस्य । संज्ञिनो नामवतो भवति । यः पुनरसद्भेदोऽसत्वविशेषः परपरिकल्पितो नामो भावः स्वलक्षणं । विधिनिषेधयोरस्तित्वनास्तित्वयोः । स्थानमास्पदं । [illegible] सर्वथा तस्य तुच्छत्वात् । तस्माद्भाव एव विधिनिषेधयोरवस्थानं तस्यैव स्वपररूपेणास्तित्वनास्तित्वं ॥

यतः—

अष्टशती-द्रव्यक्षेत्रकालभावान्तरप्रतिषेधः संज्ञिनः सतः क्रियते न पुनरसतस्तद्विधिप्रतिषेधाविरोधात् । नचैवं [illegible] स्वलक्षणमनिर्देश्यमित्यादिवत् । अभावोऽनभिलाप्य इत्यपि भावाभिधानादेकान्तहानेर्दोषात् । [illegible] कथंचिदभावाभिधानात् ॥ ४७ ॥

अवस्त्वनभिलाप्यं स्यात् सर्वान्तैः परिवर्जितं ।
वस्त्वेवावस्तुतां याति प्रक्रियाया विपर्ययात् ॥ ४८ ॥

वृत्तिः-[illegible] सर्वधर्मैः परिवर्जितं विरहितं । सर्वथा यदनभिलाप्यमवाच्यमवस्तु स्यात् [illegible]
[illegible] । कथं तर्हि वस्तुतां याति-प्रक्रियाया [illegible]

पदार्थो भवति । कुतः ? प्रक्रियायाः स्वरूपादिचतुष्टयलक्षणायाः विपर्ययात्पररूपादिचतुष्टयात् । तस्माद्यद्वस्तु तदनभिलाप्यं यथा न किंचित् । यत्पुनरभिलाप्यं तद्वस्तु यथा खपुष्पं । तस्मादेतदेवैकस्योपलब्धिरन्यस्यानुपलब्धिरिति ॥

पुनरप्यवक्तव्यवादिनमुपालभते—

अष्टशती-भावव्यतिरेकवाचिभिरपि वाक्यतामापन्नैर्भावाभिधानात्, नाम किंचिदिष्ट । अतः सूक्तं यद्वस्तु तदनभिलाप्यं यथा न किंचित् । यत्पुनरभिलाप्यं तदवस्त्वेव यथा खपुष्पं । अन्यस्य कैवल्यमितरस्य वैकल्यं, स्वभावपरभावाभ्यां भावाभावव्यवस्थितिर्भावस्य ॥ ४८ ॥

सर्वान्ताश्चेदवक्तव्यास्तेषां किं वचनं पुनः ।
संवृतिश्चेन्मृषैवैषा परमार्थविपर्ययात् ॥ ४९ ॥

वृत्तिः—यदि सर्वान्ताः सर्वधर्मा अवक्तव्या अवाच्यास्तेषां मतानां यदेतद्वचनमुक्तिः "सर्वथा प्रतिक्षण निरन्वयविनाशिनो निरंशाः सजातीयविजातीयव्यावृत्ता इत्यादिकं" पुनः पुनरावर्तमानं किमर्थं स्यात् । अथ मतं परमार्थं न तद्वचनं किं तु संवृतिः । यद्येवं मृषैवैषा व्यलीकैव सा । कुतः ? परमार्थस्य तत्त्वस्य विपर्ययोऽभावः यतः । संवृतिर्नामोपचारः, न च सा परमार्थमन्तरेण भवति ॥ ४९ ॥

अष्टशती—पुनरपि—अवक्तव्यवादिनं पर्यनुयुंज्महे—सर्वधर्मा यदि वागगोचरतामतीताः, कथमिदमभिलप्यंते इति । संवृत्या इति चेत् ? न विकल्पानुपपत्तेः । स्वरूपेण चेत् ? कथमनभिलाप्याः ? पररूपेण चेत् ? तेषां स्वरूपं स्यात् केवलं वाचः स्खलनं गम्यते । उभयपक्षेऽप्युभयदोषप्रसंगः । मृषात्वेन चेत् ? कथमवाच्याः । मृषात्वेन चेत् ? कथमुक्ताः तद्वचनमप्रतिष्ठितमिथ्याविकल्पेभ्यः ॥ ४९ ॥

अशक्यत्वादवाच्यं किमभावात्किमबोधतः ।
आद्यन्तोक्तिद्वयं न स्यात् किं व्याजेनोच्यतां स्फुटं ॥ ५० ॥

वृत्तिः—इद तावदवक्तव्यवादी प्रष्टव्यः । किमशक्यत्वादसामर्थ्यादवाच्यं ? आहोस्विदभावात् ? किमज्ञानात् ? विकल्पत्रयं । न तावदशक्यत्वादसामर्थ्यावत्त्वाद् बुद्धस्य । नाप्यज्ञानात् [illegible] दर्शितं यतः । यस्मादाद्युक्तिरादिविकल्पोऽन्त्यविकल्पस्तृतीयविकल्प एतद्द्वयं न भवेत् । तस्मात् किं व्याजेन छद्मना ? उच्यतां भण्यतामभावादेवावाच्य स्फुटमिति । न चेतदभावमात्रं प्रमाणमिष्टं प्रमाणस्याप्यभावात् ॥ ५० ॥

क्षणिकैकान्तवादिकल्पिता हिंसा पञ्चभिः कारणैः प्राणप्राणिज्ञानव्याघातचित्तनष्टसंबंध[illegible], बंधमोक्षादिश्च न घटत इत्याह—

अष्टशती-अर्थस्यानभिलाप्यत्व-अभावात्, वक्तुरशक्तेः ?—अनवबोधाद्वा प्रकारान्तराभावात् [illegible] याच्यावेऽभावात् ? न च सर्वत्र तदभावो युक्तः ततो निरवकाश विरिष्यते मध्यमपदस्य [illegible] । [illegible] त्वात् अनभिलाप्यमर्थमज्ञासीदिति चेत कथंचिदभिलापानतिक्रमात्, [illegible] दर्शितं न भेदोऽपि इत्युक्तं । विषयविषयिणोरभिलाप्यत्वाभ्युपगमोऽपि समानः । [illegible] विकल्पयोः परमार्थैकतानत्वाभावे न किंचित् [illegible] [illegible] ॥ ५० ॥

हिनस्त्यनभिसंधात्र न हिनस्त्यभिसंधिमत् ।
बध्यते तद्द्वयापेतं चित्तं बद्धं न मुच्यते ॥ ५१ ॥

वृत्तिः—[illegible]

[illegible]

वृत्तिः-यथा रूपवेदनाविज्ञानसंज्ञासंस्कारास्तेषां संततयश्च कार्यकारणयोरविच्छेदाः । एवकारोऽवधारणार्थः । असंस्कृता एवापरमार्था एव । कुतः ? संवृतित्वान्मिथ्यारूपत्वात् । अतस्तेषां स्थितिः । सदवस्थानमुत्पत्तिर्घटादयस्तथा, विनाशः कपालादिरूपस्ते न स्युर्न भवेयुः खरविषाणवत् । यथा खरविषाणस्य स्थित्युत्पत्तिव्ययाः न सन्त्येवमेतेषां, अभावप्रत्यविशेषात् । यत्पुनः संस्कृतं तत्परमार्थसत् यथा स्वलक्षणम् । न तथा स्कंधाः संततयश्च । ततः स्थित्युत्पत्तिविपत्तिविरहस्ततोऽपि विभागसंतानोत्पत्तये विनाशहेतुरिति घोष्यते ॥

यस्य मिथ्यादृशः उभयैकांतपक्षस्तन्निरासार्थमाह—

अष्टशती-रूप-वेदना विज्ञान-संज्ञा संस्कारस्कंधसंततयोऽसंस्कृताः संवृतित्वात् । यत्पुनः संस्कृतं तत्परमार्थसत् । यथा स्वलक्षणं । न तथा स्कंधसंततयः । ततः स्थित्युत्पत्तिविनाशविरहिताः । ततो विसभागसंतानोत्पत्तये विनाशहेतुरिति घोष्यते ॥ ५४ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ५५ ॥

वृत्तिः-उभयैकात्म्यं नित्यानित्यैकांतद्वयमयुक्तमंगीकर्तुं, कुतः? मिथ्यादृशां तद्विरोधात् । अनभिलाप्यमपि न युक्तमनेकांतवैरिणां ॥ ५५ ॥

एकांतवादिपक्षं निरस्यानेकांतं समर्थयन्नाह—

अष्टशती-नित्यत्वेतरैकांतद्वयमप्ययुक्तमंगीकर्तुं विरोधात् युगपज्जीवितमरणवत् नित्यत्वानित्यत्वाभ्यां । अत एवानभिलाप्यमित्ययुक्तं ? तदेकांतेऽनभिलाप्योक्तेरनुपपत्तेः ॥ ५५ ॥

नित्यं तत् प्रत्यभिज्ञानान्नाकस्मात्तदविच्छिदा ।
क्षणिकं कालभेदात्ते बुद्ध्यसंचरदोषतः ॥ ५६ ॥

वृत्तिः—तच्छब्देन तत्त्वमुच्यते प्रस्तुतत्वात् तत्त्वं कथंचिन्नित्यं प्रत्यभिज्ञानात् । वस्तुनः पूर्वापरकालव्याप्तिज्ञानं प्रत्यभिज्ञानं । यथा स एवायं देवदत्त इत्यादि । तस्मात्प्रत्यभिज्ञानात् । तस्य प्रत्यभिज्ञानस्य अविच्छिदा अविच्छेदोऽन्वयः । सोऽकस्मात् । अहेतोर्न भवति यस्मात् । न च नित्यत्वमेव । कालभेदात्परिणामवशात् क्षणिकं नश्वरं । तवार्हद्भट्टारकस्य नान्यस्य क्षणिकाक्षणिकवादिनः । बुद्धेरसंचारोऽसंचरणमन्यत्रागमनं स एव दोषस्तस्मात् । न हि एक पदार्थे विज्ञायान्यस्य पदार्थस्य परिच्छित्तिः संभवति । उभयैकांते पुनः सुघटा ॥ ५६ ॥

तदेव दर्शयति—

अष्टशती-तदेकांतद्वयेऽपि परामर्शप्रत्ययानुपपत्तेरनेकांतः । स्थिरभावे हि प्रमातुरन्येन दृष्टं नापरः प्रत्यभिज्ञातुमर्हति । संबंधविशेषेऽपि पितेव पुत्रः सत्यप्यतिशयः पृथक्त्वं न निराकरोति । तदेवान्यत्रापि प्रत्यवमर्शाभावनिबंधनमेकसंतत्या प्रत्यभिज्ञानं प्रत्यभिज्ञानबलादेकसंततिरिति व्यक्तमितरेतराश्रयणमेतत् । न च पक्षांतरे समानं स्थितेरनुभवात् । तद्विभ्रमकल्पनायामुत्पादविनाशयोरनाश्वासः । तथानुभवनिर्णयानुपलब्धेर्यथा स्वलक्षणं परिगीयते तत्रैतत्स्यात् । स्वभावाविनिर्भागेऽपि न संकलनं दर्शनक्षणांतरवत् । सत्यमेकांते एवायं दोषः । ततः क्षणिककालभेदात्, दर्शनप्रत्यभिज्ञानसमययोर्भेदे तदुभयाभावप्रसंगात् । किंच पक्षद्वयेऽपि ज्ञानासंचारानुपगमात् अनेकांतसिद्धिः । अपोद्धारकल्पनया कथंचिज्जात्यंतरेऽपि वस्तुनि प्रत्यभिज्ञानादिनिबंधने स्थित्यादयो व्यवस्थाप्येरन् । न च स्वभावभेदोपलंभेऽपि नानात्वविरोधः सकृदनेकधानुगम, चेतसि ग्राह्यग्राहकाकारवत् ॥ ५६ ॥

न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात् ।
व्येत्युदेति विशेषात्ते सहैकत्रोदयादि सत् ॥ ५७ ॥

वृत्तिः—कथमनेकांतं त्रयमेकस्मिन् संभवति? इति चेदत आह । सामान्यात्मना द्रव्यरूपेण [illegible] नोत्पद्यते न व्येति न विनश्यति कुतोऽन्वयात् सर्वपर्यायेष्वनुगतैकाकारेण वर्तनात् । व्यक्त मुदेति [illegible] पात्पर्यायरूपेणोत्पद्यते विनश्यति च । तवार्हतः । सह युगपदेकत्रैकस्मिन् वस्तुनि । उदयादि [illegible] विनाशस्थितयः सत्यो विरोधाभावात् ॥ ५७ ॥

कथं य एवोत्पादः स एव विनाशो यावेव विनाशोत्पादौ तावेव स्थितिः ! इत्यत आह—

अष्टशती-चलाचलात्मकं वस्तु कृतकाकृतकात्मकत्वात् । न हि चेतनस्य अन्यस्य वा [illegible] सदादिसामान्यस्वभावेन सत एवातिशयांतरोपलंभात् घटवत् । कथंचिदुत्पादविगमात्मकत्वादिति [illegible]

कार्योत्पादः क्षयो हेतोर्नियमाल्लक्षणात्पृथक् ।
न तौ जात्याद्यवस्थानादनपेक्षाः खपुष्पवत् ॥ ५८ ॥

वृत्तिः—योऽयं कार्यस्योत्पादः स एव हेतोरुपादानकारणस्य क्षयो विनाशो नियम[illegible] लक्षणात्पुनः पृथग्-भिन्नौ स्वरूपभेदात् । जात्यादेरवस्थानात् सत्त्वप्रमेयत्वादिना न तौ भिन्नौ । कुतः ! [illegible] [illegible]त्वात् । अनपेक्षाः परस्परापेक्षामंतरेण ते स्थित्युत्पत्तिविनाशाः खपुष्पसमानाः । [illegible] परस्परमभिन्नाः कथंचिद्भिन्नाश्च भवंति ॥ ५८ ॥

लौकिकदृष्टांतेन समर्थयन्नाह—

अष्टशती-कार्यकारणयोरुत्पादविनाशौ कथंचिद्भिन्नौ भिन्नलक्षणसंबंधित्वात् सुखदुःखवत् । [illegible] भिन्नौ तदभेदेऽपि [illegible] पुरुषवत् । उत्पादविगमध्रौव्यलक्षणं स्याद्भिन्नं [illegible] [illegible] । उत्पादः केवलो नास्ति स्थितिविगमरहितत्वात् वियत्कुसुमवत् । [illegible] [illegible] ॥ ५८ ॥

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयं ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥ ५९ ॥

वृत्तिः—अयं जनस्त्रिप्रकार्थी यो घटार्थी स तस्मिन् भग्ने शोकं याति । यश्च मौल्यर्थी स [illegible] [illegible] । यश्च सुवर्णार्थी स माध्यस्थ्यं याति सुवर्णसद्भावात् । नचैतदहेतुकं किंतु सहेतुकमेव । [illegible] [illegible] विनश्यति, तदैव मौलिरूपेणोत्पद्यते, सुवर्णरूपेण [illegible] [illegible] ॥ ५९ ॥

अष्टशती-[illegible] [illegible] [illegible] [illegible] घटमौलिसुवर्णार्थी [illegible] [illegible] [illegible] जनः [illegible] इति । निर्हेतुकत्वे तदनुपपत्तेः ॥ ५९ ॥

[illegible]—

पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे [illegible]

दर्भिदुग्धत्वेनाभावात् । तस्मादेव खलु प्रधानमंक स्थित्युत्पत्तिव्ययात्मकं सुघटमेवानेकांते जैनमते इति स्थितम् ॥ ६० ॥

अष्टशती—लौकिकोदाहरणेनापि तत्र सर्वानिनानात्वं विनाशोत्पादस्थितिसाधनं प्रत्याययति दधिपयोव्रतवतां क्षीरदध्युभयवर्जनात् क्षीरात्मना नश्यदध्यात्मनोत्पद्यमानं गोरसस्वभावेन तिष्ठतीति तस्मात्तत्वं त्रयात्मकं ॥ ६० ॥

इति आप्तमीमांसाभाष्ये तृतीयः परिच्छेदः ।

—— ——

वृत्ति–इत्यन्यथाऽस्य तत्त्व व्यवस्थाप्य नैयायिकवैशेषिकमतमाशङ्क्य दूषयितुं सः प्राह—

कार्यकारणनानात्वं गुणगुण्यन्यताऽपि च ।
सामान्यतद्वदन्यत्वं चैकान्तेन यदीष्यते ॥ ६१ ॥

वृत्तिः–कार्यं घटादिरूपं कारणं मृत्पिण्डादिकं तयोर्नानात्वं भेद इष्यते चेत् ? गुणो रूपादिर्गुणी द्रव्यं तयोरपि यद्यन्यतेष्यते सर्वथा भेद इष्यते ? सामान्यं बुद्ध्यभिधानप्रवृत्तिलक्षणं तद्वत्सामान्यवत्-व्यक्तयः, तयोश्च यद्यन्यत्वेष्यते सर्वथैकान्तेन ? ॥ ६१ ॥

तदानीं किं स्यादत आह—

अष्टशती–अवयवगुणसामान्यतद्वतो व्यतिरेकैकांतमाशंक्य प्रतिविधत्ते ॥ ६१ ॥

एकस्यानेकवृत्तिर्न भागाभावाद्बहूनि वा ।
भागित्वाद्वाऽस्य नैकत्वं दोषो वृत्तेरनार्हते ॥ ६२ ॥

वृत्तिः—एकस्यावयव्यादेः कार्यस्य घटादेरनेकेषु स्वारम्भकावयवेषु वृत्तिर्वर्तनं सा न स्यात् । कुतः ? भागाभावात् निरवयवत्वात् । अवयविनो अर्थे वर्तन्ते अवयवबहुत्वं स्यादनिष्टं चैतत् । यथास्य भागाः परि कल्प्यते, एवं सति नैकत्वमस्य भागित्वात् । तस्मादनार्हते मते वृत्तिविकल्पस्य सर्वात्मनैकदेशेन दोष एव । आर्हते पुनर्मते सर्वं युक्तमनेकांतात् ॥ ६२ ॥

पुनरपि भेदपक्षे दूषणमाह—

अष्टशती—एकमनेकत्र वर्तमानं प्रत्यधिकरणं न तावदेकदेशेन निष्प्रदेशत्वात् । नापि, सर्वात्मना अवयव्यादिबहुत्वप्रसंगात् । अथापि कथंचित्प्रदेशवत्त्वं तथापि वृत्तिविकल्पोऽनवस्था च । तदेकत्वमेव न स्यात् । नायं प्रसंगोऽनेकांते कथंचित्तादात्म्यात् वेद्यवेदकाकारज्ञानवत् ॥ ६२ ॥

देशकालविशेषेऽपि स्याद्वृत्तिर्युतसिद्धवत् ।
समानदेशता न स्यात् मूर्तकारणकार्ययोः ॥ ६३ ॥

वृत्तिः–देशः क्षेत्रं कालः समयादिकः तयोर्विशेषो भेदस्तस्मिन्नपि तयोरवयवावयविनोर्या वृत्तिर्वर्तनं स्यात् युतसिद्धानामिव पृथग्भिन्नानामिव युतसिद्धवत् घटपटादिवत् इत्यर्थः । अन्यच्च समानदेशता न स्यात् तयोरवयवावयविनोरेकस्मिन्नवस्थानं न स्यात् मूर्तिमत्त्वात् यथा करकरभयोः ॥ ६३ ॥

पुनरपि भेदवादिनं प्रति दूषणमाह—

अष्टशती–तस्मादगाद्यादेरत्यन्तभेदाद्देशकालविशेषेणापि वृत्तिः प्रसज्येत । घटदृशवर्णादिभि-रनेकांतिकत्वमित्ययुक्तं तद् व्यतिरेकैकांतानभ्युपगमात् । अवयवावयविनोः समानदेशवृत्तिर्न भवेत् मूर्ति-मत्त्वात् करकरभवत् ॥ ६३ ॥

सत्यपर नेतप्रमणं भावात् [!] पुनरपि दूषणमाह---

अष्टशती---कार्यकारणादेरभेदैकान्ते धारणाकर्षणादयः परमाणूनां संघातेऽपि माभूवन् विभागवत् । नाहितोऽपि विशेषः तेषां विभागैकान्तं निराकरोति । तत एवान्यत्रापि नेष्यते पृथिव्यादि भूतचतुष्टयसिद्धिरेवं विभ्रममात्र प्राप्नोति । इष्टत्वाददोष इति चेन् न प्रत्यक्षादिविरोधात् ॥ ६४ ॥

कार्यभ्रान्तेरणुभ्रान्तिः कार्यलिङ्गं हि कारणं ।
उभयाभावतस्तत्स्थं गुणजातीतरच्च न ॥ ६८ ॥

वृत्तिः--अणूनां यदेतत्कार्यं स्थूलघटपटादिकं तस्य यदि भ्रान्तिर्विभ्रमस्तदानीं कार्यभ्रान्तेरणूनामपि भ्रान्तिः । यतः कार्यलिङ्गं कारणं कार्यद्वारेण कारणस्यावगमो नान्यथा, अतोऽन्यतराभावे उभयस्याप्यभावोऽविनाभावनियमात् । उभयाभावाच्च तत्स्थं गुणो रूपादिः, जातिः सामान्यं इतरच्च क्रिया एतन्न सुदिनं न स्यात् । न चैतदिष्टं सर्वप्रमाणप्रसिद्धत्वात् ॥ ६६ ॥

अष्टशती--चक्षुरादिबुद्धौ स्थूलैकाकारः प्रतिभासमानः परमाणुभेदैकान्तवादे प्रतिपत्ति-सौहृदानुपलब्धिर्भ्रान्तेनस्यात् । भ्रान्तेरूपादिप्रतीतिर्भ्रान्तिरिति तत्र परमाणूनां चक्षुरादिबुद्धौ स्वरूपमन-र्पयतां कार्यलिङ्गाभावात् । तत्स्वभावाप्युपगमानुपपत्तेस्तद्द्रव्याभावात् इतरयो जातिगुणक्रिया न स्युः, व्योम-कुसुमसौरभवत् ॥ ६८ ॥

एकत्वेऽन्यतराभावः शेषाभावोऽविनाभुवः ।
द्वित्वसंख्याविरोधश्च संवृतिश्चेन्मृषैव सा ॥ ६९ ॥

वृत्तिः--कार्यकारणयोरेकत्वे द्वयोर्मध्येऽन्यतराभावस्तस्य चाभावे द्वितीयस्य चाभाव । कुत अवि-नाभावनियमात् । न हि स्वमन्तरेणापर भवति । द्वित्वमिति च या सङ्ख्या तस्याश्च विरोधोऽघटना । अथ मतं संवृत्या सर्वं युक्तं सा मृषैवेति । स्वरूपेण सर्वो न किंचित् स्यात् खपुष्पवदिति वन्ध्या-स्तनन्धयवत् ॥ ६९ ॥

उभयैकात्म्यवादिनं प्रत्याह---

अष्टशती--आश्रयाश्रयिणोरेकत्वे तदन्यतराभावस्तत: शेषस्याभावस्तयोरविनाभावित्वात् [illegible] सम्भवाभावात् । तथा च सति द्वित्वसंख्यापि न स्यात् । तत्र संवृतिकल्पना शून्यता नान्यथा पर-मार्थविपर्ययात् स्वप्नादिवत् ॥ ६९ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७० ॥

वृत्तिः--अवक्तव्यपरव्यतिरेकाव्यतिरेकैकान्तौ न यौगपद्येन सम्भविनौ विरोधात् [illegible] । अनभिलाप्यैकान्तोऽपि न संभवति । स्याद्वादाभ्युपगमे तु न दोषः कथंचित् तथाभ्युपगमात् ॥ ७० ॥

तथैव स्पष्टयति---

अष्टशती--अवक्तव्यतादीनां व्यतिरेकाव्यतिरेकैकान्तौ न वै यौगपद्येन सम्भविनौ विरोधात् । तथानभिलाप्यैकान्ते स्ववचनविरोधः [illegible] । स्याद्वादाभ्युपगमे तु न दोषः कथंचित् [illegible] ॥ ७० ॥

द्रव्यपर्याययोरैक्यं तयोरव्यतिरेकतः ।
परिणामविशेषाच्च शक्तिमच्छक्तिभावतः । ७१ ।

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७४ ॥

वृत्तिः-अपेक्षानपेक्षैकांतोभयं नास्ति विरोधात् । नाप्यवाच्यमवाच्यत्वेनापि वाच्यत्वात् ॥ ७४ ॥

तयोरनेकांतं दर्शयन्नाह—

अष्टशती-अनंतरैकांतयोर्युगपद्विवक्षा माभूत् विप्रतिषेधात् सदसदेकांतवत् । तथानभिधेयत्वैकांतेऽपीति इतं विस्तरेण ॥ ७४ ॥

धर्मधर्म्यविनाभावः सिद्ध्यत्यन्योऽन्यवीक्षया ।
न स्वरूपं स्वतो ह्येतत् कारकज्ञापकांगवत् ॥ ७५ ॥

वृत्तिः-क्रमभावि पिंडादिकार्यं सहभावी रूपादिर्गुणो निमदशापरिणामलक्षणश्च विशेषो धर्मोऽत्र कथ्यते । कारणादिव्यपदेशं द्रव्यं धर्मी । स्वधर्मापेक्षया द्रव्यस्य धर्मिव्यपदेशः । स्वधर्म्यपेक्षया च रूपादेश्च धर्मव्यपदेशस्तयोर्योऽविनाभावोऽव्यभिचारोऽवश्यं सोऽन्योऽन्यापेक्षया सिद्ध्यति भासते उत्पद्यते वा । स्वरूपमसाधारणं रूपं तयोर्न परतः । कुतः ? यस्मात्स्वत एव तत्सिध्यति । यथा कारकज्ञापकांगे कारकक्रियाया अंगं ज्ञापकक्रियाया अंगं निबंधनं तयोरिव तद्वत् कर्तृकर्मकबोध्यबोधकवदित्यर्थः । अथवा अंगशब्दो विशेषार्थो द्रष्टव्यः, यथा कर्मकर्तृव्यपदेशाविनाभावो बोध्यबोधकव्यपदेशाविनाभावश्च सिध्यत्यन्योन्यापेक्षयैवमत्रापीत्यर्थः ।

उपेयतत्त्वं व्यवस्थाप्योपायतत्त्वव्यवस्थापनार्थमाह—

अष्टशती-न केवलं सामान्यविशेषयोः स्वलक्षणमपेक्षितपरस्पराविनाभावलक्षणं स्वतःसिद्धलक्षणं, अपि तु धर्मधर्मिणोरपि, कर्मकर्तृबोध्यबोधकवत् ॥ ७५ ॥

इत्याप्तमीमांसाभाष्ये पंचमः परिच्छेदः ।

सिद्धं चेद्धेतुतः सर्वं न प्रत्यक्षादितो गतिः ।
सिद्धं चेदागमात्सर्वं विरुद्धार्थमतान्यपि ॥ ७६ ॥

वृत्तिः-यदि सर्वं हेतुतो निमित्तात्सिद्धमवगतं तर्हि प्रत्यक्षादितः प्रत्यक्षागमादेर्गतिरवगमो न स्यात् । दृश्यते चैंद्रियकस्याशनपानादेरर्थस्यातींद्रियस्य मत्स्यकाश्मीरादेश्च क्रमेण प्रत्यक्षादाप्तोपदेशतश्च गतिरिति ॥ अथागमादाप्तोपदेशात्सर्वं चेष्यते ततो विरुद्धार्थानि यानि मतानि तान्यपि सिद्धिमुपगच्छेयुरिति ॥ ७६ ॥

उभयैकात्म्यैकांतं निराकर्तुमाह—

अष्टशती-उपेयतत्त्वं व्यवस्थाप्य-उपायतत्त्वं व्यवस्थाप्यते—

युक्त्या यन्न घटामुपैति तदहं दृष्ट्वापि न श्रद्दधे इत्यादेरेकांते तस्य बहुलं दर्शनात् प्रत्यक्षतदाभासयोरपि व्यवस्थितिः-अनुमानात् अन्यथा संकरव्यतिकरोपपत्तेः । कथंचित्साक्षात्कारणमंतरेण न कश्चिदनुमानं किं पुनः शास्त्रोपदेशाः । नचैते युक्तिनिरपेक्षाः, परस्परविरुद्धार्थतत्त्वसिद्धिप्रसंगात् । न हि प्रत्यक्षानुमानाभ्यामंतरेणोपदेशे ज्योतिर्ज्ञानादिप्रतिपत्तिः ॥ ७६ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७७ ॥

वृत्तिः—उभयैकांतत्वं नास्ति विरोधात् । अवाच्यमपि न ॥ ७७ ॥

पुनरप्यनेकांतनिरूपणार्थमाह--

अष्टशती-युक्तिशास्त्राविरोधस्याप्युपगमोऽपि साध्यभूत्-विरुद्धोऽपि तत्र मताऽस्मितत्र । ... ऽपि पूर्ववत् ॥ ७७ ॥

वक्तर्यनाप्ते यद्धेतोः साध्यं तद्धेतुसाधितं ।
आप्ते वक्तरि तद्वाक्यात् साध्यमागमसाधितं ॥ ७८ ॥

वृत्तिः-यो यत्राविसंवादकः स तत्राप्तः । ततः परोऽनाप्तः अनाप्ते वक्तरि तत्प्रणीतोऽपि हेतु मानात्तस्य साध्यं शब्दादभिप्रेतं यदिदं तद्धेतुसाधितं-लिङ्गप्रतिपादितं । आप्ते वक्तरि शब्दतत्त्वं तद्वाक्यात् तदागमसाधितं-प्रवचनप्रतिपादितं प्रमाणभूतं प्रवचनं हि तत् । अनाप्ते पुनरविसंवादकं तद्धेतुकं न तत्प्रत्येति ॥ ७८ ॥

अंतरंगस्यैव तत्त्वमिति येषां मतं तन्निराकरणायाह—

अष्टशती-यो यत्राविसंवादकः स तत्राप्तः । ततः परोऽनाप्तः । तत्त्वप्रतिपादनमविसंवादः तदर्थज्ञानात् । तेनातीन्द्रियं जैमिनिः-अन्यो वा श्रुतिमात्रावलंबी नैवाप्तः तदर्थपरिज्ञानाभावाद्यथावत् । न हि तस्य तद्यथार्थज्ञानमस्ति दोषावरणक्षयातिशयाभावात् । श्रुतेः परमार्थविदः ततः श्रुतेरविसंवादकत्वमनुपपन्नं । स्वतः श्रुतेर्न वै प्रामाण्यमचेतनत्वात् घटवत् । सन्निकर्षादिभिरनैकान्तिकत्वमयुक्तं तत्स्वभावानभ्युपगमात् । अथापि कथंचित्प्रमाणत्वं स्यात् अविसंवादित्वात् श्रुतेरप्युक्तमेव । तदभावात् तेनाप्तत्वमात्रं च न स्यात् बुद्धिप्रामाण्यासिद्धेः । आप्तवचनं तु प्रमाणव्यपदेशभाक् तत्कारणकार्यत्वात् तदतीन्द्रियार्थदर्शनात् तदर्थज्ञानोत्पादनाच्च । नैतत् श्रुतेः संभवति सर्वथाप्यनुक्तेः पिटकत्रयवत् । वक्तृदोषात्तत्प्रमाणानां तत्र च्युतेः प्रामाण्यमिति चेत् कुतोऽयं विभागः सिद्धयेत् अभ्युपगमानभ्युपगमाभ्यां क्वचित् तदेतत्स्वव्यवस्थापयतीति सुव्यवस्थितं तत्त्वं । एतेन कर्तृस्मरणाभावादयः प्रयुक्ताः वेदेतरयोरविशेषात् । तत्र बौद्धो वक्तेति चेत् तत्र कमलोद्भवादिरिति कथं न समानं । सुदूरमपि गत्वा तदर्थाकरणेऽपि कर्तुः वेदाध्ययनवादितस्यापि सर्वदाध्ययनपूर्वाध्ययनत्वप्रकल्प्तो न वक्त्रं वक्त्रीभवति । तदनित्यत्वं शाक्योक्तित्वादितरत्रापि सर्वगतकर्दर्शनात् सिद्धेऽपि तदनादित्वे पौरुषेयत्वाभावे वा कथमतीन्द्रियं प्रलेलतव्यं । म्लेच्छव्यवहारादिस्तादृशो बहुशमुपलंभात् कारणदोषनिवृत्तेः कार्यदोषाभावकल्पनायां दोषैः स्वैव वचनस्य दोषनिवृत्तिः कर्तुर्वीतदोषस्यापि संभवात् तदर्थप्रव्याख्यातृश्रोतृणां रागादिमत्त्वेऽकर्तृ निरर्थकं तथैवतः । वक्तृगुणापेक्षं वचनस्याविसंवादकत्वं चक्षुर्ज्ञानवत् । तद्दोषानुविधानात् ततोऽन्यत्र वचनार्थज्ञानसंभवरूपदर्शनात् । तत्र यदेव युक्तियुक्तं तदेव प्रतिपत्तुं प्रतिपादयितुं वा शक्यं, अतिनिर्दिष्टं जैमिन्यादिवत् नाग्निहोत्रादि वाक्यमात्रेण । सिद्धं पुनराप्तवचनत्वं यथा हेतुवादस्तथा आज्ञावादोऽपि प्रमाणं । ननु चातीन्द्रियत्ववदाप्तत्वमनन्यसाधारणमस्य ? उक्तमत्र सर्वथैकान्तवादानां स्ववचनविरुद्धत्वात् इति । तत्रापि साक्षात्करणादिगुणः संप्रदायाविच्छेदो वा अन्यथाऽप्रवृत्त्याऽप्रतिपत्तेः ॥ ७८ ॥

इत्याप्तमीमांसाभाष्ये षष्ठः परिच्छेदः समाप्तः ॥

अंतरंगार्थतैकान्ते बुद्धिवाक्यं मृषाखिलं ।
प्रमाणाभासमेवातस्तत्प्रमाणादृते कथं ॥ ७९ ॥

वृत्तिः-अन्तरंगस्यार्थः कार्यो यस्य स अन्तरंगार्थः तस्य भावोऽन्तरंगार्थता सैवैकान्तः निश्चय-स्तस्मिन् । ... इत्येवंरूपेऽभ्युपगम्यमाने बुद्धिवाक्यं ... । बुद्धिश्च वाक्यं च बुद्धिवाक्यं । ...

था मिथ्या। प्रमाणमिवावभासत इति प्रमाणाभासमेव। यदेवं कथं मुख्यप्रमाणमन्तरेण तत्प्रमाणाभासं स्यादिति प्रमाणे प्रमाणाभासो नान्यथा ॥ ७९ ॥

अथ मत सर्वं बाह्याभ्यन्तरं ज्ञानमेवैतस्य मतस्य निराकरणार्थमाह—

अष्टशती-तत्त्वज्ञानं कार्यकारणादिविवेकज्ञानमनेकान्तिकमादर्शं संवित्तिरेव स्वतः प्रतिभासमाना व्यवहाराय कल्पयन् इत्यभिनिवेशोऽपि प्रमाणं मृग्यं। क्षणिकत्वमनन्यवेद्यत्वं नानासंतानत्वमिति स्वतस्तावत् सिद्ध्यति भ्रान्तेः। तथास्वसंवेदनेऽपि व्यवसायवैकल्ये प्रमाणान्तरापेक्षयानुपलम्भकल्पनात्। न हि तथा बुद्धेः संविदते यथा व्याचक्षते। नापि परतः संबन्धप्रतिपत्तेरयोगात् स्वांशमात्रावलम्बिना मिथ्याविकल्पेन प्रतिनियतव्यवस्थापने बहिरर्थस्यापि विरोधात्। कथंचिदत्र वैलक्षण्यं यदि व्यवतिष्ठेत प्रकृतं हत स्यात् नान्यथा। न चानुमानं लक्षणमस्ति तत्संभवे नान्यत्र तदभावोऽभिधेयः तत्स्वपक्षपरपक्षयोः सिद्ध्यसिद्ध्यर्थं किंचित्कथंचित् कुतश्चित् आविर्भूतं ज्ञानमादरणीयं अन्यथा संवृतिप्रमाणसिद्धेः। एतेन यद्ग्राह्यग्राहकाकारं तत्सर्वं भ्रान्तं यथा स्वप्नेन्द्रजालादिज्ञानं तथा प्रत्यक्षादिकमिति प्रतिविहितं वेदितव्यं ॥ ७९ ॥

साध्यसाधनविज्ञप्तेर्यदि विज्ञप्तिमात्रता।
न साध्यं न च हेतुश्च प्रतिज्ञाहेतुदोषतः ॥ ८० ॥

वृत्तिः-साध्यत इति साध्यं शक्यमभिप्रेतमप्रसिद्धं पक्षधर्मः। साध्यतेऽनेनेति साधनं प्रकृतेनाविनाभावि तयोराकारो विज्ञप्तिर्विज्ञानं तस्या यदि विज्ञप्तिमात्रता ज्ञानमात्रत्वं। न साध्यं न च हेतुः चकाराद्दृष्टान्तः। कुतः? प्रतिज्ञादोषाद्धेतुदोषाच्च। निरंशत्वमभ्युपगम्य स भेदं साधयेत्? अभ्युपगमहानिः प्रतिज्ञाहेतुदोषः, अतः प्रतिज्ञादोषे हेतुदोषेऽकिंचित्करादयः। अथवा प्रतिज्ञैव हेतुः स दोषस्तस्मात्। यस्मात्तदेव साध्यं साधनं निरंशत्वाच्च ॥ ८० ॥

अथान्तरङ्गार्थैकान्ते दोषदर्शनाद्बहिरङ्गार्थोऽभ्युपगम्यते तत्रापि दोषं दर्शयति—

अष्टशती-सहोपलम्भनियमादभेदो नीलतद्धियोर्द्विचन्द्रदर्शनवत् इत्यत्रार्थसंवित्तो सहदर्शनमुदेश्य प्रतिज्ञानं साधयन् कथं अस्वस्थेनाभिलापः। स्वाभिलापाभावे वा स्ववाचा प्रदर्शयन् कथं स्वस्थः। पृथगनुपलम्भमात्र साधयन् तथासिद्धं तत्रासिद्धेरभावयोः सहसंभवः। एतेन सहानुपलम्भादभेदसाधनं प्रयुक्तं भावाभावयोः संप्रत्यसिद्धेः। तादात्म्यवद्रूपयोरपरस्परभावनियमात् सिद्धेऽपि प्रतिषेधेऽपि विज्ञप्तिमात्रं न सिद्ध्येत् तदसाधनात्तत्सिद्धौ तदाश्रयं दूषणमनुषज्येत। संदेहोपलम्भनियमोऽप्यसिद्धः साध्यसाधनयोर्विरोधात्। एकज्ञानग्राह्यत्वं द्रव्यपर्यायपरमाणुभिरनैकान्तिकं, अनन्यवेद्यत्वं असिद्धं एव साध्यधर्मिणाविशेषिताकारेण सहोपलम्भनियमात्, व्यभिचारी हेतुः तयोरन्तरेव संवेदनत्वात्, दृष्टान्तोऽपि साध्यसाधनविकलः तयोरभेदाभेदयोरप्रतिनियमात् भ्रान्तौ तदसंभवात्। ननु ग्राह्यग्राहकाकारभेदस्य कथंचित् [illegible] सकलविज्ञानस्वलक्षणप्रतिपत्तिः [illegible] भावानुगति। [illegible] एकार्थसमवायिनः [illegible] तद्बुद्धि तदर्थं [illegible] सहोपलम्भनियमाच्च [illegible] प्रतिनियमेन स्वहेतुप्रतिनियमनवशात्। [illegible] अतः [illegible] प्रतिज्ञादिति न किंचिदेतत् [illegible] विपर्ययाच्च ॥ ८० ॥

बहिरङ्गार्थतैकान्ते प्रमाणाभासनिह्नवात्।
सर्वेषां कार्यसिद्धिः स्याद्विरुद्धार्थाभिधायिनाम् ॥ ८१ ॥

वृत्तिः [illegible]

र्थप्रकाशकानां सर्वेषां निरवशेषाणां कार्यस्य सिद्धिर्निष्पत्तिः व्यवहारसिद्धिर्भवेदित्यर्थः । [illegible] भासनिह्नवात् प्रमाणस्याभासो मिथ्यात्वं तस्य निह्नवो निराकरणं तस्मात् । एतदपि कुतः? [illegible] बहिरर्थस्य सिद्धिरसिद्धिश्च नान्यथा ॥ ८१ ॥

उभयैकांतप्रतिक्षेपायाह—

अष्टशती-यत्किंचिच्चेतस्तत्सर्वं साक्षात्परंपरया वा बहिरर्थप्रतिबद्धं यथाग्निरप्यभेर[illegible] स्वप्नदर्शनमपि, चेतस्तथाविषयाकारनिर्भासात् । साध्यदृष्टांतौ पूर्ववदित्यपि [illegible] रविरुद्धशब्दबुद्धीनां स्वार्थसंबंधः परमार्थतः प्रसज्येत ॥ ८१ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ८१ ॥

वृत्तिः-पूर्ववत् ॥

भाव एव तत्त्वं नाभाव इति यस्य मतं तन्निराकरणायाह—

अष्टशती-अंतर्बहिर्ज्ञेयैकांतयोः सहाभ्युपगमो विरुद्धः तद्वाच्यतायां युक्तिविरोधः पूर्ववत् ॥ ८[illegible]

भावप्रमेयापेक्षायां प्रमाणाभासनिह्नवः ।
बहिःप्रमेयापेक्षायां प्रमाणं तन्निभं च ते ॥ ८३ ॥

वृत्तिः-भावो ज्ञानं तदेव प्रमेयं तस्य तस्मिन्वाऽपेक्षाऽभ्युपगमस्तस्यामभ्युपगम्यमानायां [illegible] भासस्य निह्नवो लोपः । कुतः? ज्ञानस्य तदेतत्प्रामाण्यमप्रामाण्यं च बाह्यार्थापेक्षायां भवति [illegible]

एतच्च मतं सर्वं वचो विवक्षामात्रसूचकमित्यस्य निराकरणायाह—

अष्टशती-सर्वभावेषु स्वसंवेदनस्य कथंचित्प्रमाणत्वोपपत्तेः तदपेक्षायां सर्वं प्रत्यक्षं न [illegible] प्रमाणाभासः । तथानभ्युपगमेऽन्यतम एव बुद्धेरनुमानं स्यात् । तत्रार्थज्ञानमलिंगं तदविशेषणा[illegible] [illegible] किं द्वितीयेन । यदेवमर्थज्ञानं तदेवार्थस्वलक्षणं स्यात् व्यभिचार[illegible] [illegible] प्रयुक्तं । प्रत्यक्षेतरबुद्धयाभासस्य स्वसंवेदनात्प्रत्यक्षविरुद्धं । [illegible] [illegible] न [illegible]वत् । एतेन प्रतिक्षणं निरंश संवेदनं प्रत्यक्षं प्रयुक्त [illegible] [illegible]नभ्युपगमात् सर्वत्र सर्वदा प्रतिप्रत्यक्षाविशेषात् कथंचिद्भ्रांतो एकांतसंवे[illegible] [illegible] । तस्मात्स्वसंवेदनापेक्षया न किंचिद् ज्ञानं सर्वथा प्रमाणं । बहिरर्थापेक्षया [illegible] [illegible]संवादकत्वात् कश्चित्स्वप्नो केशमशकादिज्ञानवत् ॥ ८३ ॥

जीवशब्दः सबाह्यार्थः संज्ञात्वाद्धेतुशब्दवत् ।

सिद्धमाप्यतापरिहारद्वारेणामुमेवार्थं प्रकटयन्नाह—

अष्टशती-स्वरूपव्यतिरिक्तेन शरीरेन्द्रियादिकलापेन जीवशब्दोऽर्थवान् अतो न कृतः प्रत्यक्षतः गत् । इति विकल्पमात्रं लोकरूढेः समाश्रयणात् । यत्रायं व्यवहारः जीवो गतस्तिष्ठतीति वा नात्र ज्ञा, अभिप्रेतमात्रं सूचयति ततोऽर्थक्रियायां नियमायोगात्, तत्करणप्रतिपत्तीनां तदभावेनादरणीयत्वात्, गवनतदाभासयोरन्यथा विशेषासंभवात्, परंपरयापि परमार्थैकतानत्वं वाचः प्रतिपत्तव्यं । कचिद् व्यभि चारदर्शनादनाश्वासे चक्षुरादिबुद्धेस्तदाभासोपलब्धेः कुतो धूमादेरग्न्यादिप्रतिपत्तिः ? कार्यकारणभावस्य व्यभिचारदर्शनात् । काष्ठादिजन्मनोऽग्नेरिव मणिप्रभृतेरपि भावात् । तद्विशेषपरीक्षायामितरत्रापि विशेषा-भावात् । अभिसंधिवैचित्र्यादभिधानव्यभिचारोपलंभे तदितरकारणसामग्रीशक्तिवैचित्र्यं पश्यता कथमा-श्वासः । तस्मादयमक्षलिंगसंज्ञादोषाविशेषेऽपि कचित्परितुष्यन्नन्यतमप्रद्वेषेण ईश्वरायते परीक्षाक्लेशलेशाऽस-हत्वात् । भ्रान्त्योपादानसंभवे हि समाख्यानामितरेतरोपादानप्रक्लृप्तिः । भावश्चात्र हर्षविषादाद्यनेकविकारविवर्तः स्वात्मसंवेदनीयः प्रतिशरीरं भेदाभेदात्मको प्रत्याख्यानार्हः प्रतिक्षिपंतमात्मानं प्रतिबोधयतीति कृत प्रयासेन । न हि मायादिसमाख्याः स्वार्थरहिताः विशेषार्थप्रतिपत्तिहेतुत्वात् प्रमाणसमाख्यावत् ॥ ८४ ॥

बुद्धिशब्दार्थसंज्ञास्तास्तिस्रो बुद्ध्यादिवाचिकाः ।
तुल्या बुद्ध्यादिबोधाश्च त्रयस्तत्प्रतिबिम्बकाः ॥८५॥

वृत्तिः–बुद्धिश्च शब्दश्चार्थश्च बुद्धिशब्दार्थास्तेषां संज्ञा बुद्धिशब्दार्थसंज्ञास्तिस्रस्त्रिसंख्याः । बुद्ध्यादि-र्येषां ते बुद्ध्यादयस्तेषां वाचिकाः प्रतिपादिका तुल्याः समाः । केन ? बुद्ध्याद्यर्थप्रतिपादकत्वेन । बुद्ध्यादीनां बोधाश्च ज्ञानानि च बुद्ध्याद्यर्थस्य प्रतिबिम्बिका प्रतिनियतस्वरूपास्तेऽपि तुल्या अर्थप्रतिपादकत्वेन ॥ किमुक्तं भवति–गौरिति जानीत इतीयं बुद्धेर्वाचिका संज्ञा । तस्याश्च श्रोतुः पुरुषस्य स्वार्थे बोधको बोधो भवति । गौरित्ययमिति शब्दस्य स्वरूपस्यैव रूपस्य वाचिका संज्ञा । तस्याश्च श्रोतुः पुरुषस्य स्वार्थे शब्दस्य स्वाभिमतेऽत्र रूपे बोधको बोधो भवति । गामानय दोहार्थमितीयं संज्ञा बाह्यार्थस्य वाचिका भवति । तस्याश्च श्रोतुः स्वार्थे सास्नादिमति पिण्डे बोधको बोधो भवति । ततो बुद्ध्याद्यर्थवाचकत्वेन संज्ञास्तिस्रः समा एव बुद्ध्यादीनां शब्दार्थानां त्रयोऽपि बोधका वेदका बोधा बुद्ध्यादिशब्दार्थप्रतिभासकाश्च समा एव तत्प्रतिभासकत्वेन॥८५॥

पुनरप्याशंक्य तमेव बाह्यार्थं प्रतिपादयन्नाह—

अष्टशती–हेतुव्यभिचाराशंकां प्रत्यस्तमयति–तिसृणामपि स्वव्यतिरिक्तवस्तुसंबंधदर्शनाद्बुद्धीनां च तन्निर्भासनाद्विषयतोपपत्तेः ॥ ८५ ॥

वक्तृश्रोतृप्रमातॄणां वाक्यबोधप्रमाः पृथक् ।
भ्रान्तावेव प्रमाभ्रान्तौ बाह्यार्थौ तादृशेतरौ ॥ ८६ ॥

वृत्तिः–वक्ता च श्रोता च प्रमाता च वक्तृश्रोतृप्रमातारस्तेषां वक्तृश्रोतृप्रमातॄणां वाचकश्रावक-ज्ञापकानां । यथासंख्यं वाक्यं च बोधश्च प्रमा च वाक्यबोधप्रमाः शब्दशाब्दप्रत्यक्षानुमानानि । पृथक् व्यवस्थितलक्षणानि । भ्रान्तावेव यदि भ्रान्तिस्वरूपे व्यवतिष्ठेरन् न तु बहिरर्थमिति वाक्यशेषः । ततः को दोषः स्यादित्याह–प्रमाभ्रान्तौ सर्वेषां प्रमाणानां बाह्यापेक्षायां द्वैविध्ये सति प्रमाणयोः प्रत्यक्षाप्रत्यक्षयोः प्रत्यक्षानुमा-नयोर्वा भ्रान्तौ भ्रान्तिस्वरूपतायां सत्यामपि । बाह्यार्थौ बाह्यविषयौ दृश्यानुमेयावर्थौ । तादृशान्यतरौ तादृग्भ्रान्त-स्वरूपावितरावभ्रान्तस्वरूपौ प्रमाणाप्रमाणात्मकौ ततो विभावनीयौ स्यातां । अथ वा प्रमाभ्रान्तौ द्वौ भ्रान्ताभ्रान्तौ बाह्यार्थौ भ्रान्तावेव तत इदं भ्रान्तमिदमभ्रान्तमिति विचारोऽनर्थकः स्यात् ॥ ८६ ॥

बाह्यार्थे सति प्रमाणमप्रमाणं च युज्यते नान्यथाऽत आह—

अष्टशती-बहिरर्थाभावाद् वक्त्रादित्रयं न बुद्धेः पृथक्कृतं ततोऽसिद्धतादिदोष इति चेत्; न; रूपादेर्ग्राहकस्य तद्व्यतिरिक्तविज्ञानसंतानकाख्यस्य च स्वांशमात्रावलंबिनः प्रमाणस्य स्वेनासिद्धिः अंतर्ज्ञेयाभ्युपगमविरोधात्। तौ हि ग्राहकापेक्षया बाह्यार्थौ भ्रांताविव कुतस्त्यौ...

बुद्धिशब्दप्रमाणत्वं बाह्यार्थे सति नासति।
सत्यानृतव्यवस्थैवं युज्यतेऽर्थाप्त्यनाप्तिषु ॥ ८७ ॥

वृत्तिः-बुद्धिश्च शब्दश्च तयोः प्रामाण्यमर्थप्रतिपादकत्वं बाह्यार्थे सति भवत्यसति न भवति। सत्यमवितथमनृतं वितथं तयोर्व्यवस्था अर्थस्याप्त्यनाप्तिषु ग्रहणाग्रहणेषु सत्सु युक्ते वचनस्य तदा सत्यता भवति यदा बाह्यार्थं तादृग्भूतं प्रापयति। अन्यथाऽसत्यं ॥ ८७ ॥

तस्य बाह्यार्थस्य कथं प्राप्तिर्भवतीति पृष्टे कश्चिदाह दैवादेव, कश्चित्पुनः पौरुषादेवेत्यत्रोत्तरं ...

अष्टशती-स्वपरप्रतिपत्त्यर्थं साधनं बुद्धिशब्दात्मकं स्वसंवित्त्यैव परप्रतिपादनात्... बहिरर्थे प्रमाणत्वमर्थप्राप्तितः सिद्ध्येत्। असति प्रमाणाभासत्वं—अर्थानाप्तित इति। ... बहिरर्थः साधनदूषणप्रयोगात्। अन्यथा स्वप्नेतराविशेषात् किं किं न साधितं दूषितं वा ... नांतरमन्यद्वा। तैमिरिकद्वयाद्विचंद्रदर्शनवत् भ्रांतः सर्वो व्यवहार इत्यत्रापि तत्त्वतः ... बहिरर्थवदभिसंहितस्यापि निराकरणापत्तेस्तथा परमाण्वादिदूषणेऽपि प्रतिपत्तव्यं-अन्यथा ... दिति सर्वत्र योज्यं। तदिमे विज्ञानसंतानाः संति न संतीति तत्त्वान्नतिपत्तेः ... नात्मना कथंचिददृश्यानामपि परमाणूनां बहिरपि संभवद्बाधानिवृत्तिप्रतिषेधाभावात् ... भागभेदेन षडंशादिकल्पनया वृत्तिविकल्पेन वा परपक्षोपालंभे स्वपक्षेऽपि, ... पुनरायातमन्यतः तत्साक्षात्परंपरया वा विभ्रमविकरणभावात्तं ज्ञानं ... ग्राह्यग्राहकाकारत्वात् संतानांतरसिद्धवत्। न हि व्यापारव्याहारनिर्भासोऽपि विद्यते ... वासनाभेदो भवेत् न संतानांतरं ॥ ८७ ॥

इत्याप्तमीमांसाभाष्ये सप्तमः परिच्छेदः।

दैवादेवार्थसिद्धिश्चेद्दैवं पौरुषतः कथं।
दैवतश्चेदनिर्मोक्षः पौरुषं निष्फलं भवेत् ॥ ८८ ॥

त्यपात्कमममफलं स्यात् । । तथाहि समाने हि समानानां केचिदर्थेषु युज्यंते केचिन्न प्रसिद्धमेतत् । यथा दैवमंतरेण पौरुषादेव पौरुषस्य प्रवृत्तौ सत्यां सर्वप्राणिषु पौरुषममोघमेव सफलमेव स्यात् हीनानामपि तद्भवति ॥ ८९ ॥

उभयैकांतेऽपि न युक्तं—

अष्टशती-तर्हि पौरुषं विना दैवसंपदा न स्यात् तदुक्तं—

तादृशी जायते बुद्धिर्व्यवसायश्च तादृशः ।
सहायास्तादृशाः संति यादृशी भवितव्यता ॥ १ ॥

इति तत्सर्वं पौरुषापादितमिति चेत् तद्व्यभिचारदर्शिनो न वै श्रद्दधीरन् ॥ ८९ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९० ॥

वृत्तिः—उभयदोषप्रसंगात् । अवाच्यत्वदोषाच्च ॥ ९० ॥

दैवात्पौरुषाच्चैकांतादर्थसिद्धिर्यदि न भवति कथं तर्हि स्यादत आह—

अष्टशती-दैवेतरयोः सहैकांताभ्युपगमे व्याघातात्, अवाच्यतायां च स्ववचनविरोधात् स्याद्वादनीतिः॥९०॥

अबुद्धिपूर्वापेक्षायामिष्टानिष्टं स्वदैवतः ।
बुद्धिपूर्वव्यपेक्षायामिष्टानिष्टं स्वपौरुषात् ॥ ९१ ॥

वृत्तिः—बुद्धिर्विचारः पूर्वं प्रथमं कारणं यस्याः सा तथा न बुद्धिपूर्वा अबुद्धिपूर्वा सा चासावपेक्षा च लोचनं च सा तथा तस्यामतर्कितोपस्थितन्यायेनेत्यर्थः । इष्टमभिलषितं सुखादि अनिष्टमनभिलषितं दुःखादि । स्वदैवतः स्वपुण्यपापफलात्पूर्वजन्मनिबद्धकर्मणः । यद्यपि पौरुषमात्रं विद्यते तथापि मुख्याभावो ऽविवक्षितो नात्यंताभावः । तथा बुद्धिपूर्वव्यपेक्षायां विचारपूर्वकत्वेनानुष्ठानादिष्टमनिष्टं च स्वपौरुषात्स्वकीयपुरुषकारात् । अत्रापि दैवमप्रधानत्वेन विवक्षितं नात्यंताभावत्वेन । परस्परापेक्षयैव कार्यसिद्धिर्यतो दैव तथा तस्य कर्म दैवमिति ॥ ९१ ॥

ननु परदुःखे पापं तथैव सुखे पुण्यं स्वदुःखात्पुण्यं स्वसुखात्पापमित्येवं केचिद्भाणि न दैवादिति तन्मतनिराकरणायाह—

अष्टशती—अतर्कितोपस्थितमनुकूलं प्रतिकूलं वा दैवकृतं तद्विपरीतं हि पौरुषापादितं । अपेक्षाकृतत्वाद्व्यवस्थायाः ॥ ९१ ॥

इत्याप्तमीमांसाभाष्ये अष्टमः परिच्छेदः ।

पापं ध्रुवं परे दुःखात् पुण्यं च सुखतो यदि ।
अचेतनाकषायौ च बध्येयातां निमित्ततः ॥ ९२ ॥

वृत्तिः—परेऽन्यस्मिन् प्राणिनि दुःखमात्राद्यदि पापं स्यात् । तस्मिन्नेव सुखमात्राच्च पुण्यं यदि स्यात् । तदानीमचेतनो विषशस्त्रादिरकषायो वीतरागः तावपि बध्येयातां कर्मबंधस्य कर्तारौ भवतः । निमित्तत्वात् । तत्परमार्थेनापि भावप्रधानत्वात्कौशलस्य ॥ ९२ ॥

तथा—

अष्टशती-बहिरर्थाभावाद् वक्त्रादित्रयं न बुद्धेः पृथक्कृतं ततोऽसिद्धतादिदोषः साधनस्येति द्र रूपादेर्ग्राहकस्य तद्व्यतिरिक्तविज्ञानसंतानकालस्य च स्वांशमात्रावलंबिनः प्रमाणस्य विभ्रमकल्पनानां सा ल्येनासिद्धिः अंतर्ज्ञेयाभ्युपगमविरोधात्। तौ हि ग्राहकापेक्षया बाह्यार्थौ भ्रांताविव कुतस्तत्र हेयोपादेयत्वेतर८

बुद्धिशब्दप्रमाणत्वं बाह्यार्थे सति नासति।
सत्यानृतव्यवस्थैवं युज्यतेऽर्थाप्त्यनाप्तिषु ॥ ८७ ॥

वृत्तिः-बुद्धिश्च शब्दश्च तयोः प्रामाण्यमर्थप्रतिपादकत्वं बाह्यार्थे सति भवत्यसत्यविद्यमाने च न भवति। सत्यमवितथमनृतं वितथं तयोर्व्यवस्था अर्थस्याप्त्यनाप्तिषु ग्रहणाग्रहणेषु सत्सु युज्यते [illegible]। वचनस्य तदा सत्यता भवति यदा बाह्यार्थं तादृग्भूतं प्रापयति। अन्यथाऽसत्यं ॥ ८७ ॥

तस्य बाह्यार्थस्य कथं प्राप्तिर्भवतीति पृष्टे कश्चिदाह दैवादेव, कश्चित्पुनः पौरुषादेवैतत्पक्षद्वयं विघटयन्नाह-

अष्टशती-स्वपरप्रतिपत्त्यर्थं साधनं बुद्धिशब्दात्मकं स्वसंवित्त्यैव परप्रतिपादनायोगात्। तस्य च सति बहिरर्थे प्रमाणत्वमर्थप्राप्तितः सिद्ध्येत्। असति प्रमाणाभासत्वं—अर्थानाप्तित इति। तदेवं परमार्थतः बहिरर्थः साधनदूषणप्रयोगात्। अन्यथा स्वप्नेतराविशेषात् किं किं न साधितं दूषितं चेति कुतः संता नांतरमन्यद्वा। तैमिरिकद्वयद्विचंद्रदर्शनवत् भ्रांतः सर्वो व्यवहार इत्यत्रापि तत्त्वज्ञानं शरणं। अन्यथा बहिरर्थवदभिसंहितस्यापि निराकरणापत्तेस्तथा परमाण्वादिदूषणेऽपि प्रतिपत्तव्यं-अन्यथा तत्कृतमकृतं स्या दिति सर्वत्र योज्यं। तदिमे विज्ञानसंतानाः संति न संतीति तत्त्वाप्रतिपत्तेः दृष्टापह्नुतिरनिबंधनैव भवतो नात्मना कथंचिददृश्यानामपि परमाणूनां बहिरपि समवस्थानविप्रतिषेधाभावात् अतोऽप्रसक्तं। तत्र पूर्वापर भागभेदेन षडंशादिकल्पनया वृत्तिविकल्पेन वा परपक्षोपालंभे स्वपक्षाक्षेपात्, कथंचिद्विरोधासिद्धेश्च पुनरापाद्यपक्षाभ्यशक्तेः तत्साक्षात्परंपरया वा विमत्यधिकरणभावापन्नं ज्ञानं स्वरूपव्यतिरिक्तार्थं[illegible] ग्राह्यग्राहकाकारत्वात् संतानांतरसिद्धवत्। न हि व्यापारव्याहारनिर्भासोऽपि विप्लुतो नास्ति तदन्यत्रापि वासनाभेदो गम्यते न संतानांतरं ॥ ८७ ॥

इत्याप्तमीमांसाभाष्ये सप्तमः परिच्छेदः।

दैवादेवार्थसिद्धिश्चेद्दैवं पौरुषतः कथं।
दैवतश्चेदनिर्मोक्षः पौरुषं निष्फलं भवेत् ॥ ८८ ॥

वृत्ति—अर्थस्य कार्यस्य प्रशस्ताप्रशस्तशरीरेंद्रियादेस्तथा ज्ञानसुखादेरज्ञानदुःखादेर्वा सिद्धिर्निष्पत्ति- र्यदि दैवादेव सर्वथा स्यात् तदैव कर्मोत्पत्ति पौरुषात्मनोवाक्कायव्यापारलक्षणाच्छुभाशुभरागादिपरिणाम[illegible] [illegible] कथं स्यात्। अथ दैवान्तरादेव दैवं स्यादित्यत्रोच्यते। दैवतश्चेद्यदि दैवादेव दैवं [illegible] [illegible] स्यात्। दैवस्य कारणभूतस्य कार्यभूतस्य च सततं संततितो विच्छेदप्रसंगाभावात्। [illegible] [illegible] पुरुषकारोऽप्यनर्थः स्यात् ॥ ८८ ॥

अष्टशती-योग्यतां कर्म पूर्वं वा दैवमुभयमदृष्टं, पौरुषं पुनरिह चेष्टितं दृष्टं ताभ्यामर्थसिद्धिः तदन्य[illegible]ऽघटनात्। पौरुषमात्रेऽर्थादर्शनात् दैवमात्रे वा समीहानर्थक्यप्रसंगात् ॥ ८८ ॥

पौरुषादेव सिद्धिश्चेत् पौरुषं दैवतः कथं।
पौरुषाच्चेदमोघं स्यात् सर्वप्राणिषु पौरुषं ॥ ८९ ॥

वृत्तिः—[illegible] [illegible] सिद्धिश्चेत् [illegible] [illegible] [illegible] [illegible]। [illegible]

प्रामाण्यात्कथमफलं स्यात् ? । तथाहि समाने हि समानानां केषुचिदर्थेषु युज्यंते केचिन्न प्रसिद्धमेतत् । अन्यथा दैवमतरेण पौरुषादेव पौरुषस्य प्रवृत्तौ सत्यां सर्वप्राणिषु पौरुषममोघमेव सफलमेव स्यात् दैवहीनानामपि तद्भवति ॥ ८९ ॥

उभयैकांतोऽपि न युक्तं—

अष्टशती-ताद्धि पौरुषं विना दैवसंपदा न स्यात् तदुक्तं—

तादृशी जायते बुद्धिर्व्यवसायश्च तादृशः ।
सहायास्तादृशाः संति यादृशी भवितव्यता ॥ १ ॥

इति तत्सर्वं पौरुषापादितमिति चेत् तदव्यभिचारदर्शिनो न वै श्रद्धीरन् ॥ ८९ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९० ॥

वृत्तिः—उभयदोषप्रसंगात् । अवाच्यत्वदोषाच्च ॥ ९० ॥

दैवात्केवलात्पौरुषाच्च केवलादर्थसिद्धिर्यदि न भवति कथं तर्हि स्यादत आह—

अष्टशती-दैवेतरयोः सहैकांताभ्युपगमे व्याघातात्, अवाच्यतायां च स्ववचनविरोधात् स्याद्वादनीतिः॥९०॥

अबुद्धिपूर्वापेक्षायामिष्टानिष्टं स्वदैवतः ।
बुद्धिपूर्वव्यपेक्षायामिष्टानिष्टं स्वपौरुषात् ॥ ९१ ॥

वृत्तिः—बुद्धिर्विचारः पूर्वं प्रथमं कारणं यस्याः सा तथा न बुद्धिपूर्वा अबुद्धिपूर्वा सा चासावपेक्षा च आलोचनं च सा तया तस्यामतर्कितोपस्थितन्यायेनेत्यर्थः । इष्टमभिलषितं सुखादि अनिष्टमनभिलषितं दुःखादि । स्वदैवतः स्वपुण्यपापात्पूर्वजन्मनिबद्धकर्मणः । यद्यपि पौरुषमात्रं विद्यते तथापि मुख्याभावो विवक्षितो नास्तित्वाभावः । तथा बुद्धिपूर्वव्यपेक्षायां विचारपूर्वकत्वेनानुष्ठानादिष्टमनिष्टं च स्वपौरुषात्स्वकीयपुरुषकारात् । अत्रापि दैवमप्रधानत्वेन विवक्षितं नास्तिताभावत्वेन । परस्परापेक्षयैव कार्यसिद्धिर्यतो दैव आत्मा तस्य कर्म दैवमिति ॥ ९१ ॥

ननु परदुःखे पापं तथैव सुखे पुण्यं स्वदुःखात्पुण्यं स्वसुखात्पापमित्येवं केचिद्भणि न दैवादिनि तन्मतनिराकरणायाह—

अष्टशती—अतर्कितोपस्थितमनुकूलं प्रतिकूलं वा दैवकृतं तद्विपरीतं हि पौरुषापादितं । अपेक्षाकरणस्य तद्व्यवस्थायाः ॥ ९१ ॥

इत्याप्तमीमांसाभाष्ये अष्टमः परिच्छेदः ।

पापं ध्रुवं परे दुःखात् पुण्यं च सुखतो यदि ।
अचेतनाकषायौ च बध्येयातां निमित्ततः ॥ ९२ ॥

वृत्तिः—परेऽन्यस्मिन् प्राणिनि दुःखमात्रादपि पापं स्यात् । तस्मिन्नेव सुखमात्राच्च पुण्यं यदि स्यात् । तदानीमचेतनो विषदग्धादिरकषायो वीतरागः तावपि बध्येयातां कर्मबंधस्य कर्तारौ भवतः । निमित्तत्वात् । प्रलयमंतरेणापि भावप्रधानाभिरेतस्य ॥ ९२ ॥

तथा—

१। विरुद्धानैकान्ते पाठ.।

अष्टशती–परत्र सुखदुःखोत्पादनात् पुण्यपापबंधैकांते कथमचेतना न बध्येरन् ? वीतरागो वा ? तन्निमित्तत्वात् ॥ ९२ ॥

पुण्यं ध्रुवं स्वतो दुःखात्पापं च सुखतो यदि ।
वीतरागो मुनिर्विद्वांस्ताभ्यां युंज्यान्निमित्ततः ॥ ९३ ॥

वृत्तिः–स्वस्मिन् दुःखात् ध्रुवं निश्चितं पुण्यं यदि स्यात्तस्मिन्नेवात्मनि सुखाच्चेतोऽभिमतं पापं च यदि स्यात् । ततः किं स्यात् ? ताभ्यां वीतरागो मुनिर्युज्यात् बद्धो भवेत् । कुतः ? निमित्तत्वात् ॥ ९३ ॥

अथोभयैकांतस्तद्वमादिष्यते तत्रापि दोष एव विरोधात् । नाप्यवाच्यत्वं वचनविरोधात्–

अष्टशती–आत्मसुखदुःखाभ्यां पापेतरैकांतकल्पने पुनरकषायस्यापि भुवमेव बंधः स्यात् । न च कश्चिन्मोक्तुमर्हति तदुभयाभावसंभवात् ॥ ९३ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषां ।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९४ ॥

वृत्तिः–सुगमं ॥ ९४ ॥

कथं तर्हीत आह–

अष्टशती–प्रस्तुतैकांतद्वयसिद्धाति व्याहतः अनभिधेयतायां अनभिधेयाभिधानविरोधात् कथं विरोधेति युक्तं ।

विशुद्धिसंक्लेशांगं चेत् स्वपरस्थं सुखासुखं ।
पुण्यपापास्रवौ युक्तौ न चेद्व्यर्थस्तवार्हतः ॥ ९५ ॥

वृत्तिः–स्व आत्मा परोऽन्यस्तयोस्तिष्ठतीति स्वपरस्थं सुखं चासुखं च सुखासुखं [illegible] । विशुद्धिः धर्मध्यानादिशुभपरिणामः । यद्यपि निरवशेषरागादिविरहलक्षणायां विशुद्धौ [illegible] [illegible] तथापि [illegible] शुभपरिणामादौ वर्तमानो विशुद्धिशब्दो गृह्यते । संक्लेशः–आर्तरौद्रध्याने [illegible] [illegible] विशुद्धिसंक्लेशांगं–चेद्यदि स्वपरस्थं सुखासुखं विशुद्धिसंक्लेशालंबनं यदि भवति तदा पुण्यं च [illegible] च [illegible] युक्तौ । न चेदेवं यद्येवं न स्यात् । पुण्यपापयोः [illegible] व्यर्थो निष्फलः । [illegible] [illegible] [illegible] सुखदुःखनिमित्तपूर्णमुक्तिवत् बंधाभावात् । एतेन [illegible] निराकृतं भवति । [illegible] ॥ ९५ ॥

[illegible]–

अष्टशती–आत्मनः परस्य वा सुखदुःखयोर्विशुद्धिसंक्लेशांगयोरेव पुण्यपापास्रवहेतुत्वं [illegible] [illegible] । [illegible] संक्लेशः तदभावो विशुद्धिः आत्मनः [illegible] ॥ ९५ ॥

इत्याप्तमीमांसाभाष्ये नवमः परिच्छेदः ।

अज्ञानाच्चेद्ध्रुवो बंधो ज्ञेयानंत्यान्न केवली ।
ज्ञानस्तोकाद्विमोक्षश्चेदज्ञानाद्बहुतोऽन्यथा ॥ ९६ ॥

वृत्तिः–[illegible] ध्रुवो न केवली युक्तः । कुतः [illegible]

[illegible]

निश्चयेन विमोक्षः स्यादिति संबंधः। अथवा प्रागुक्तान्मोक्षप्रकारादन्येन प्रकारेणापि सह जन्मनो योगः स्यात्। तथा च सति न बन्धो नापि मोक्षस्तस्य विचाराक्षमत्वात् ॥ ९६ ॥

अष्टशती-यदि बंधोऽयमविज्ञानात् नेदानीं कश्चिन्मुच्येत सर्वस्यैव क्वचिदज्ञानोपपत्तेर्ज्ञेयानंत्यात्। यदि पुनर्ज्ञाननिर्ह्रासाद्ब्रह्मप्राप्तिः-अज्ञानात्सुतरां प्रसज्येत। दुःखनिवृत्तेरिव सुखप्राप्तिः ॥ ९६ ॥

विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम्।
अवाच्यतैकांतेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९७ ॥

वृत्तिः—उभयैकांतावक्तव्यमपि दुष्टं विरोधात् ॥

कथं तर्हि तौ स्यातामत आह—

अष्टशती-नहि सर्वात्मनैकस्यैकदा ज्ञानस्तोकान्मोक्षो बहुतराज्ञानाद्बंध इत्येकांतयोरविरोधः स्याद्वादन्यायविद्विषां सिद्ध्यति येन तदुभयैकात्म्यं स्यात् ॥ ९७ ॥

अज्ञानान्मोहितो बंधो नाज्ञानाद्वीतमोहतः।
ज्ञानस्तोकाच्च मोक्षः स्यादमोहान्मोहितोऽन्यथा ॥ ९८ ॥

वृत्तिः—ज्ञानात्पुनरपि किंविशिष्टात् मोहतो मिथ्यात्वरूपाद्बंधो भवति विनष्टमिथ्यात्वरूपादज्ञानात्पुनर्न बंधो भवति ज्ञानस्तोकादपि मोक्षः स्याद्यदमोहाद्भवेत् यदि पुनर्मोहितः स्यात्तस्य मोक्षाभाव एव ॥९८॥

अथ कदाचिन्मनुषे न दैवामापि पौरुषान्न ज्ञानाभाप्यज्ञानात् किं तु ईश्वरप्रेरणादित्यस्य मतस्य निराकरणायाह—अथवा कामादीनां कर्मणश्च वैचित्र्यमनादित्वं च दर्शयितुमाह—

अष्टशती-मोहनीयकर्मप्रकृतिलक्षणादज्ञानाद्युक्तः कर्मबंधः ततोऽन्यतोऽपि बंधाभ्युपगमेऽतिप्रसंगात्। तथैव प्रकर्षपर्यंतात् मोहनीयपरिक्षयलक्षणान्मोक्षमिति। विपर्ययेऽपि विपर्यासादित्यधिगंतव्यं ॥ ९८ ॥

कामादिप्रभवश्चित्रः कर्मबंधानुरूपतः।
तच्च कर्म स्वहेतुभ्यो जीवास्ते शुद्ध्यशुद्धितः ॥ ९९ ॥

वृत्तिः—कामादीनां रागादीनां प्रभवः उत्पादः कार्यरूपश्चित्रो नानाप्रकारः। कर्मबन्धानुरूपतः ज्ञानावरणादिकर्मणः कारणाद्भवति तच्च कर्म ज्ञानावरणादिकं स्वहेतुभ्यो भवति। कुत एतत्? अनादिर्बंधबंधहेतुसंतानो बीजांकुरवत् न पुनरीश्वरादेस्तस्यावस्तुत्वात् विरागाक्षमत्वेन। न तर्हि केषांचिन्मुक्तिरन्येषां संसारश्च कर्मबंधनिमित्तविशेषादिति चेदाह— ते भगवतोऽर्हतो जीवा द्विप्रकाराः संसारिणः संति। कुतः शुद्ध्यशुद्धितो भव्याभव्यत्वतः। अत एव न सर्वेषां मोक्षः। एतेनान्यदपि मतांतरं निराकृतं वेदितव्यं ॥९९॥

शुद्ध्यशुद्धिस्वरूपप्रतिपादनायाह—

अष्टशती-संसारोऽयं नैकस्वभावेश्वरकृतः तत्कार्यसुखदुःखादिवैचित्र्यात्। न हि कारणस्यैकरूपत्वे कार्यनानात्वं युक्तं शालिबीजवत्। अपरिणामिनः सर्वथार्थक्रियासंभवात् तद्गुणत्वाच्च वस्तुनः सद्भावमेव तावत् संभावयाम। तत्र कालदेशावस्थात्मभावभिन्नानां तनुकरणभुवनादीनां निमित्तं कर्तेति महापित्रं एतेनेश्वरेच्छा प्रत्युक्ता। नचैतेनाभ्यः संबंधः तत्र दोषकारानपेक्षणात् ततो व्यपदेशोऽपि मा भूत् अभिप्रेतानित्यत्वेऽपि समान प्रसंग। सह दुःखस्यादिप्रसंगाद्विचित्रत्वानुपपत्तेरिति। तयोरेकरूपत्वेऽपि कर्मवैचित्र्यात्कामादिप्रभववैचित्र्यमिति चेत्। युक्तमेतत्। किंतु नेश्वरस्याभ्यां विशिष्टावस्थार्थपरिसमाप्ते निरस्य प्रवृत्तिसन्निवेशविशेषादिभ्य पृथिव्यादेर्बुद्धिमत्कारणपूर्वकत्वसाधने ...

१। मोहित इत्यपि पाठः २। पत्रपि मालिक ...

करणोत्पत्तेरात्मनो धर्माधर्मयोश्च स्वयमचेतनत्वात् विचित्रोपभोगयोग्यतनुकरणादिसंपादनकौशल [illegible] तन्निमित्तमात्मांतरं मृत्पिंडादिकुलालवदिति चेन्न तस्यापि तत्तनुकरणस्य तत्कृततरसंभवात् । तत्तोऽपि [illegible] मभावे कर्मणामचेतनत्वेऽपि तन्निमित्तत्वमविप्रतिषिद्धं सर्वथा दृष्टांतव्यतिक्रमात् । [illegible] पादिचेतनाधिष्ठानादिति नियमे पुनरीश्वरादेरपि माभूत् । नायं प्रसंगो बुद्धिमत्त्वादितिचेत् ! तत [illegible] मईशानतनुकरणादयः प्राणिनो माभूवन् । कर्मणां वैचित्र्यादिति चेत् तेषामीश्वरज्ञाननिमित्तत्वे [illegible] तदनिमित्तत्वे तनुकरणादेरपि तन्निमित्तत्वं माभूद्विशेषाभावात् । अर्थक्रियादेरपि [illegible] कर्मबंधविशेषवशात् चित्राः कामादयः ततः कर्मवैचित्र्यं । नहि भावस्वभावोपलंभः [illegible] तत्वसंगतिवृत्तेः । न तर्हि केषांचिन्मुक्तिरितरेषां संसारश्च । कर्मबंधनिमित्तविशेषादिति चेन्न तेषां [illegible] प्रतिमुक्तितरसंभवात् आत्मना ॥ ९९ ॥

शुद्ध्यशुद्धी पुनः शक्ती ते पाक्यापाक्यशक्तिवत् ।
साद्यनादी तयोर्व्यक्ती स्वभावोऽतर्कगोचरः ॥ १०० ॥

वृत्तिः—शुद्ध्यशुद्धी ये शक्ती भव्याभव्यस्वरूपे ते अनादितत्त्वार्थश्रद्धानाभावलक्षणे [illegible] [illegible] तयोर्भव्यत्वाभव्यत्वशक्त्योर्व्यक्ती तत्त्वार्थश्रद्धानविपर्ययधर्मादिरूपे [illegible] [illegible] । कुतोऽयं शक्तिभेदोऽतर्कगोचरः स्वभावो मतः ॥ १०० ॥

एवं [illegible] विचारः कृतः । अधुना प्रमाणस्य निरूपणार्थमाह—

अष्टशती—[illegible] स्वभावो तेषां सामर्थ्यासामर्थ्ये [illegible] । [illegible] [illegible] शुद्ध्यशुद्धिशक्त्योरिति भेदमाचार्यः प्राह । ततोऽप्यत [illegible] [illegible] । कुतः शक्तिप्रतिनियम इति चेत् ! नहि भावस्वभावाः पर्यनुयोक्तव्याः ॥ १०० ॥

तत्त्वज्ञानं प्रमाणं ते युगपत्सर्वभासनं ।
क्रमभावि च यज्ज्ञानं स्याद्वादनयसंस्कृतं ॥ १०१ ॥

वृत्तिः—तत्त्वज्ञानं [illegible] युगपत् [illegible] युगपत्सर्वावभासनं इति युगपत्सर्वभासनं [illegible] [illegible] । क्रमभावि च यज्ज्ञानं छद्मस्थं चक्षुरादि [illegible] [illegible] । सर्वथा [illegible] [illegible] [illegible] प्रमाणगोचरं [illegible] तदपि प्रमाणं [illegible] [illegible] ॥ १०१ ॥

[illegible]—

न हि मिथ्याज्ञानस्य संवादनैकांतः । तथा न लैंगिकं सर्वथैवाविसंवादकत्वात् । तस्मात्सूक्तं तत्त्वज्ञानमेव प्रमाणं । कारणस्य सामग्रीभेदात्प्रतिभासभेदेऽपि इति । प्रमाणमेव वा तत्त्वज्ञानं । ततः स्वलक्षणदर्शनानंतरभाविनस्तास्वव्यवसायस्य प्रमाणतोपपत्तेः प्रत्यक्षमनुमानमिति प्रमाणे एवेत्यवधारणं प्रत्याचष्टे अनधिगतार्थाधिगमाभावात्, तदप्रमाणत्वे लैंगिकस्यापि माभूद्विशेषाभावात् । अनधिगतस्वलक्षणाव्यवसायात् अनुमितेरतिशयकल्पनायां प्रकृतस्यापि न वै प्रामाण्यं प्रतिषेध्यं—अनिर्णीतनिर्णयात्मकत्वात् क्षणभंगानुमानवत् । ध्वनेरखंडशः श्रवणाधिगमोऽपि प्राथमकल्पिकस्तत्त्वानिर्णीतिरेव । तदत्यये दृष्टेरपि विसंवादकत्वेन प्रामाण्यानुपपत्तेरदर्शनातिशायनात् । तद्दर्शनाभावेऽपि तत्त्वनिश्चये तदन्यसमारोपव्यवच्छेदलक्षणप्रमाणलक्षणांगीकरणात् । क्वचित्पुनश्चिद्धूमकेतुलैंगिकवन्निर्णीतार्थमात्रस्मृतेरधिगतार्थाधिगमात् प्रामाण्यं माभूत् प्रमितिविशेषाभावात्, प्रकृतनिर्णयस्य प्रामाण्ये हि न किंचिदतिप्रसज्यते निर्णीतेऽपि कथंचिदतिशायनात् । प्रत्यभिज्ञानं प्रमाणं व्यवसायातिशयोपपत्तेः तत्सामर्थ्याधीनत्वात् प्रमाणत्वसिद्धेः, अन्यथा हि विसंवादः स्यात् लिंगलिंगिसंबंधज्ञानं प्रमाणमनिश्चितनिश्चयादनुमानवत् । सत्त्वक्षणिकत्वयोर्धूमतत्कारणयोर्वा साकल्येन व्याप्तिप्रतिपत्तौ न प्रत्यक्षत्वमुत्सहते सन्निहितार्थानुकारित्वात् अपरीक्षाक्षमत्वाच्च । नानुमानमनवस्थानुषंगात् । सुदूरमपि गत्वा तदुभयव्यतिरिक्तं व्यवस्थानिमित्तमभ्युपगंतव्यं । उपमानादिकं प्रमाणांतरभावमिच्छतां तत्त्वनिर्णयप्रत्यवमर्शप्रतिबंधाधिगमप्रमाणत्वप्रतिषेधः प्रायशो वक्तुर्जडिमानमाविष्करोति इति प्रत्यक्षपरोक्षमित्येव द्वितयं प्रमाणं अर्थापत्त्यादेरनुमानव्यतिरेकेऽपि परोक्षेऽतर्भावात् । तत्र सकलज्ञानावरणपरिक्षयविजृंभितं केवलज्ञानं युगपत्सर्वार्थविषयं । तथाचोक्तं 'सर्वद्रव्यपर्यायेषु केवलस्य' इति । तज्ज्ञानदर्शनयोः क्रमवृत्तौ हि सर्वज्ञत्वं कादाचित्कं स्यात् । कुतस्तत्सिद्धिरिति चेत्? सामान्यविशेषविषययोर्विगतावरणयोरयुगपत्प्रतिभासायोगात् प्रतिबंधांतराभावात् । शेषं सर्वं क्रमशः प्रकारांतरासंभवात् । चक्षुरादिज्ञानपंचकस्यापि परस्परव्यवधानेऽपि विच्छेदानुपलक्षणं क्षणक्षयवत् । यौगपद्ये हि संतानभेदात्परस्परपरामर्शाभावः संतानांतरवत् । मानसप्रत्यक्षेऽपि चक्षुरादिज्ञानानंतरप्रत्ययोद्भवेन कश्चिद्विशेषः क्रमवृत्तौ व्यवधानप्रतिभासविकल्पप्रतिपत्तेरसंभवात् । यौगपद्ये हि स्पर्शादिप्रत्यवमर्शविरोधः पुरुषांतरवद्विषयपानेकांतात्मकत्वात् । मतिज्ञानादि स्याद्वादनयलांछितं प्रतिपत्तव्यम् ॥ १०१ ॥

उपेक्षा फलमाद्यस्य शेषस्यादानहानधीः ।
पूर्वं वाऽज्ञाननाशो वा सर्वस्यास्य स्वगोचरे ॥ १०२ ॥

वृत्तिः—आद्यस्य प्रमाणस्य केवलज्ञानस्य फलमुपेक्षा रागमोहाभावः । शेषस्य प्रमाणस्य छद्मस्थविज्ञानस्य, आदानं ग्रहणं हानं त्यागस्तयोर्धीर्बुद्धिः तत्फलं । पूर्वं वा उपेक्षा वेत्यर्थः । सामान्यापेक्षाया अनुगताः । पूर्वा वेति पाठांतरं । वा अज्ञाननाशः फलं ज्ञानतेत्यर्थः । सर्वस्यास्य मत्यादिभेदभिन्नस्य हिताहितविषये स्वगोचरे स्वविषये वर्तमानस्यौत्सर्गिकं फलमज्ञाननाश इत्युक्तं ॥ १०२ ॥

प्रस्तुतस्याद्वादाख्यपरार्थसाधनसमर्थनार्थमाह—

अष्टशती—सिद्धप्रयोजनत्वात् केवलिनां सर्वत्रोपेक्षा । करुणावत परदुःखजिहासोः कथमुपेक्षा तदभावे कथं वाप्तिः ? इति चेन्न स्वदुःखनिवर्तनवत्करुणयापि दुःखोत्पत्तेरनिरासविरोधात् । [illegible] कामदुःखनिवर्तनादसमाधिरिति चेत्? न वै प्रदीपः कृपालुतया आत्मानं परं वा तमसो निवर्तयति इति । [illegible] स्वार्थद्वयामोहविच्छेदः तदभावे दर्शनस्यापि सन्निकर्षोऽसंभवात् । [illegible] तामभवात् । परपक्षा हानोपादानबुद्धिः । [illegible] [illegible] । [illegible] [illegible] ।

रणे तदक्रमस्येव विरुद्धिः प्रमाणत्व न प्रतिपत्तुर्मेदृति । तावतैव प्रमाणत्वे क्षणिकत्वाद्यनुमानं-अधिगतार्था-धिगमलक्षणत्वान्न वै प्रमाणं ॥ १०२ ॥

वाक्येष्वनेकांतद्योती गम्यं प्रति विशेषकः ।
स्यान्निपातोऽर्थयोगित्वात्तव केवलिनामपि ॥ १०३ ॥

वृत्तिः-पदानां परस्परापेक्षाणां निरपेक्षाः समुदाया वाक्यानि तेषु वाक्येष्वनेकांतं द्योतयति प्रकट-तीति अनेकांतद्योती । स्याच्छब्दो निपातोऽव्ययं । गम्यमभिधेयमस्ति घट इत्यादिवाक्येऽस्तित्वादि तत्प्रति विशेषकः समर्थकः । अथवा गम्यं हेयादेयभेदभिन्नं वस्तु यथा यद्व्यवस्थितं तथैव तस्य विशेषकः । अर्थस्य तत्तदात्मकस्य योगित्वं घटनं तस्मादन्येषां पुनर्धर्माणां गुणीभूतत्वात् । तव भवत एतदुक्तं केवलिनां श्रुतके-वलिनां च अपिशब्दात्तच्छिष्यप्रशिष्याणां च नान्येषां तथाभूतस्य वस्तुनभावात् ॥ १०३ ॥

पुनरपि तदेव समर्थयति—

अष्टशती-पदानां परस्परापेक्षाणां निरपेक्षः समुदायो न तर्हि तदानीमिदं भवति-यथा यत्सत्तत्सर्वं परिणामि यथा घटः संश्च शब्दः, तस्मात्परिणामीत्याकांक्षणात् । प्रतिपत्तुर्धर्मोऽयं वाक्येष्वभ्यासात्स्वे सर्व-थ्रतिपत्ता तावतार्थं प्रत्येति किमिति शेषमाकांक्षति । प्रकरणादिना वाक्यकल्पनाप्यर्थप्रतिपत्तौ न वा प्राय-मकल्पितवाक्यलक्षणपरिहारः सत्यभामादिपदवत् । सदसन्नित्यानित्यादिसर्वथैकांतप्रतिक्षेपलक्षणो नैकांतः । क्वचित्प्रयुज्यमानः स्याच्छब्दः तद्विशेषणतया प्रकृतार्थतत्त्वमनवयवेन सूचयति । प्रायशो निपातानां तत्स्व-भावत्वात् एवकारादिवत् । न हि केवलज्ञानवदखिलमक्रममवगाहते वाचः क्रमवृत्तित्वात् तदुद्भवेऽपि तथाभावात् ॥ १०३ ॥

स्याद्वादः सर्वथैकांतत्यागात्किंवृत्तचिद्विधिः ।
सप्तभंगनयापेक्षो हेयादेयविशेषकः ॥ १०४ ॥

वृत्तिः-स्याद्वादोऽर्थप्रकरणादीनां घटादिशब्दार्थविशेषस्थापनहेतूनामनुकूलः । कुतः सर्वथैकांत-त्यागात्तेषामर्थप्रकरणादीनां प्रतिकूलस्यैकांतस्य त्यागात् । अथ कथं प्रकारः स्याद्वादः किंवृत्तचिद्विधिः किमो वृत्तं किं निष्पन्नं वृत्तं किंवृत्तं च तच्चित्र किंवृत्तचित् तदेव विधिः प्रकारो यस्य कथंचित् कुतश्चिदित्यादि । सप्तभंगाश्च ते नयाश्च तानपेक्षत इति स्यादस्ति स्यान्नास्त्यादि । हेयादेययोर्विशेषकः गुणमुख्यकल्पनया ॥१०४॥

स्याद्वादकेवलज्ञानयोः कथंचित्सामान्यं दर्शयन्नाह—

अष्टशती-कथंचिदित्यादि किं वृत्तचिद्विधिः स्याद्वादपर्यायः सोऽयमनेकांतमभिप्रेत्य सप्तभंगनया-पेक्षः स्वभावपरभावाभ्यां सदसदादिव्यवस्थां प्रतिपादयति । सप्तभंगी प्रोक्ता द्रव्यार्थिकपर्यायार्थिकप्रवि-भागवशान्नैगमादयः शब्दार्थनया बहुविकल्पा मूलनयद्वयशुद्ध्यशुद्धिभ्यां ॥ १०४ ॥

स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशने ।
भेदः साक्षादसाक्षाच्च ह्यवस्त्वन्यतमं भवेत् ॥ १०५ ॥

वृत्तिः—सर्वाणि च तानि तत्त्वानि च जीवाजीवादीनि तानि प्रकाशयत इति सर्वतत्त्वप्रकाशने के ते ? द्वे स्याद्वादश्च केवलज्ञानं च ते द्वे प्रमाणे । तयोर्मध्येऽन्यतमं परैः परिकल्पितमवस्तु भवेद्यतः कथं तयो-र्भेदः साक्षात्प्रत्यक्षादसाक्षादप्रत्यक्षात् ॥ १०५ ॥

प्रमाणं चर्चितमथ को नयो नामेत्याह—

अष्टशती-स्याद्वादकेवलज्ञाने इति निर्देशात् तयोरभ्यर्हितत्वानियमं दर्शयति परस्परहेतुत्वादन्य-तरेण वा दूर्शनिगत्तेऽव्यभिचारं सूचयति । कथं पुनः स्याद्वादः सर्वतत्त्वप्रकाशनो यावता "मतिश्रुतयोर्निबंधो

द्रव्येष्वसर्वपर्यायेषु" । जीवादयः सप्तपदार्थास्तत्त्वं तत्प्रतिपादनाविशेषात् । तथा हि भेदः साक्षादसाक्षाच्चेति साक्षात्कृतेरेव सर्वद्रव्यपर्यायान् परिछिनत्ति नान्यत इति यावत् ॥ १०५ ॥

सधर्मणैव साध्यस्य साधर्म्यादविरोधतः ।
स्याद्वादप्रविभक्तार्थविशेषव्यंजको नयः ॥ १०६ ॥

वृत्तिः—समानो गुणो यस्य स सधर्मा तेन सधर्मणैव एवकाराद्विपक्षनिराकरणं साध्यस्यानित्यत्वादेः शक्याभिप्रेताप्रसिद्धस्य । सधर्मणो भावः साधर्म्यं तस्मात्साधर्म्यात् । स्याद्वादः श्रुतज्ञानं तेन प्रविभक्तो विपर्यीकृतोऽर्थस्तस्य विशेषो नित्यत्वादिस्तद्व्यंजकः प्रकटको द्योतको नयो युक्तितोऽर्थपरिग्रहः । इत्यनेनान्वयव्यतिरेकपक्षधर्मा उक्ताः । अविरोधादित्यनेनान्यथानुपपत्त्येकलक्षणो हेतुः प्रदर्शितः । किमुक्तं भवति—अंतर्व्याप्तिमंतरेण त्रिलक्षणो हेतुर्न गमक इति । अथ को नयप्रमाणयोर्विशेषः ? अनेकांतप्रतिपत्तिः प्रमाणं, एकधर्मप्रतिपत्तिर्नयः ॥

तद्विषयस्य द्रव्यस्य स्वरूपप्रतिपादनार्थमाह—

अष्टशती-सपक्षेणैव साध्यस्य साधर्म्यादित्यनेन हेतोस्त्रैलक्षण्यमविरोधात् इत्यन्यथानुपपत्तिं च दर्शयता केवलस्य त्रिलक्षणस्यासाधनत्वमुक्तं तत्पुत्रत्वादिवत् । एकलक्षणस्य तु गमकत्वं "नित्यत्वैकांतपक्षेऽपि विक्रिया नोपपद्यत इति" बहुलमन्यथानुपपत्तेरेव समाश्रयणात् । यत्रार्थक्रिया न संभवति तत्र वस्तु यथा विनाशैकांतः तथा च नित्यत्वेऽपि क्रमयौगपद्याभ्यामर्थक्रिया न संभवति नापरं प्रकारांतरं–इति त्रिलक्षणयोगेऽपि प्रधानमेकलक्षणं तत्रैव साधनसामर्थ्यपरिनिष्ठितेः । तदेव प्रतिबंधः पूर्ववद्वीतसंयोग्यादिसकलहेतुप्रतिष्ठापकं । ततः स्याद्वादेत्यादिनानुमितमनेकांतात्मकमर्थतत्त्वमादर्शयति । तस्य विशेषो नित्यत्वादिः पृथक् पृथक्तस्य प्रतिपादको नयः । तथा चोक्तं—

अर्थस्यानेकरूपस्य धीः प्रमाणं तदंशधीः
नयः धर्मांतरापेक्षी दुर्णयस्तन्निराकृतिः ॥ १ ।

तदनेकांतप्रतिपत्तिः प्रमाणं । एकधर्मप्रतिपत्तिर्नयः । तत्प्रत्यनीकप्रतिक्षेपो दुर्णयः केवलं विपक्षविरोधदर्शनेन स्वपक्षाभिनिवेशनात् ॥ १०६ ॥

नयोपनयैकांतानां त्रिकालानां समुच्चयः ।
अविभ्राड् भावसंबंधो द्रव्यमेकमनेकधा ॥ १०७ ॥

वृत्तिः—नया नैगमादयः सप्त उपनयास्तद्भेदोपभेदार्थपर्यायास्त एवैकांताः प्रधानधर्मास्तद्गुणत्वात्तद्व्यपदेशः । त्रयः काला विषयो येषां ते तथाभूतास्तेषां समुच्चय एकस्मिन्नवस्थानम् । अविभ्राट् अपृथक् भावसंबंधः सत्तासंबंधो यस्य स तथाभूतस्तद्द्रव्यमेकमभेदापेक्षया पुनरनेकप्रकारं ॥ १०७ ॥

तदर्थं चोद्य परिहारायाह—

अष्टशती-उक्तलक्षणो द्रव्यपर्यायप्रधानः संग्रहादिर्नयः । तच्छाखाप्रशाखात्मोपनयः । तदेकांतात्मनां विपक्षापेक्षालक्षणानां त्रिकाललक्षणानां त्रिकालविषयाणां समितिर्द्रव्यं । ततस्तेषामपोद्धाराद् गुणगुण्यादिवत् ॥ १०७ ॥

मिथ्यासमूहो मिथ्या चेन्न मिथ्यैकांतताऽस्ति नः ।
निरपेक्षा नया मिथ्या सापेक्षा वस्तु तेऽर्थकृत् ॥ १०८ ॥

वृत्तिः—नित्यानित्यास्तित्वादीनां मिथ्याधर्माणां योऽयं समूहः समुदायः स मिथ्याऽसद्रूप इति ...भिप्रायः । मिथ्येत्येकांतः संग्रहस्तस्य भावो मिथ्यैकांतता सा नोऽस्माकं स्याद्वादिनां न विद्यते ।

शुनः! यतो निरपेक्षा नयाः मिथ्या परस्परमपेक्षा घटना तस्या विगमः पृथग्भूता धर्मा अर्थक्रि.। सापेक्षाः परस्परसंबद्धास्ते नया वस्तु परमार्थतत्त्वं यतोऽर्थकृत् क्रमाक्रमाभ्यामर्थकारित्वादतो न चैकान्ततावतारः।

पुनरपि तमर्थं समर्थयन्नाह—

अष्टशती-पुनरप्युक्तमशेषधर्मनिरूपणं व्याख्यातं तथा न प्रत्येकं न परिहारः। तथाहि-निरपेक्षत्व प्रत्यनीकधर्मस्य निराकृतिः। सापेक्षत्वमुपेक्षा अन्यथा प्रमाणनयाविशेषप्रसंगात्। धर्मांतरादानोपेक्षाहानि-लक्षणत्वात् प्रमाणनयदुर्णयानां प्रकारांतरासंभवाच्च। तदतत्स्वभावप्रतिपत्तेस्तव्यतिरिक्तस्यनिराकृतिरेवैति विशेषसंहृतिः॥ १०८॥

नियम्यतेऽर्थो वाक्येन विधिना वारणेन वा।
तथाऽन्यथा च सोऽवश्यमविशेष्यत्वमन्यथा॥ १०९॥

वृत्तिः-वाक्येन, अस्ति घटो नास्ति वेति विधिप्रतिषेधरूपेणार्थो नियम्यते नियंत्र्यते विशेषेण नीयते तस्मात्सोऽर्थस्तथा च तदतदात्मक इत्यभ्युपगंतव्यः। यदि पुनरन्यथान्येन प्रकारेणैकांतरूपेणाभ्युपगम्यते तदानीमविशेष्यत्वमवस्तुत्वं स्यादेकधर्माक्रांतत्वे न वस्त्वस्ति यतः।

वाक् द्विविषया न भवतीत्यस्य निराकरणायाह—

अष्टशती—यत्सत् तत्सर्वमनेकांतात्मकं वस्तुतत्त्वं सर्वथा तदर्थक्रियाकारित्वात्। स्वविषयाकारसंवित्तिवत्। न किंचिदेकांतं वस्तुतत्त्वं सर्वथा तदर्थक्रियासंभवात् गगनकुसुमादिवत्। नास्ति सदेकांतः सर्वव्यापारविरोधप्रसंगात् असदेकांतवदिति विधिना प्रतिषेधेन वा वस्तुतत्त्वं नियम्यते। अन्यथा तद्विशिष्टमर्थतत्त्वं न स्यात् इत्यनेन विधिप्रतिषेधयोर्गुणप्रधानभावेन सदसदादिवाक्येषु वृत्तिरिति लक्षयति॥ १०९॥

तदतद्वस्तु वागेषा तदेवेत्यनुशासति।
न सत्या स्यान्मृषावाक्यैः कथं तत्त्वार्थदेशना॥ ११०॥

वृत्तिः—एषा वागेतद्वचनं सर्वाभ्युपगतं तच्चातच्च तदतत् अस्तित्वनास्तित्वात्मकं वस्तुतत्त्वं तदेव तद्रूपभूतमेव नैकांतात्मकमेवेत्येवमनुशास्ति कथयति प्रतिपादयति। यदि न सत्या सद्भूता स्याद्भवेत्। एवं सति मृषा वाक्यानि असत्यरूपाणि वाक्यानि स्युः। तथा सति तत्त्वार्थस्य परमार्थस्य प्रमाणहेतुरूपप्रतिपादकस्य यं देशना कथनं परप्रतिपादनं कथं स्यात्? किंतु न भवेदेव। तथा च विशीर्णं प्रमाणादिलक्षणं सर्वं। आयातस्तत्तदनेकांतात्मकं हेतुज्ञानं प्रमाणवदिति वचनस्य प्रमाण्यमेषितव्यं॥ ११०॥

पुनरपि वचोलक्षणमाह—

अष्टशती—प्रत्यक्षादिप्रमाणविषयभूतं विरुद्धधर्माध्यासलक्षणं बाऽविरुद्धं वस्तु। तदेवेत्येकांतेन प्रतिपादयंती मिथ्यैव भारती कथमनर्थार्थदेशनं? इत्येकांतवाक्यार्थानुपपत्तिराख्यते॥ ११०॥

वाक्स्वभावोऽन्यवागर्थप्रतिषेधनिरंकुशः।
आह च स्वार्थसामान्यं तादृग्वाच्यं खपुष्पवत्॥ १११॥

वृत्तिः—वाचः स्वभाव आत्मीयं रूपमन्येषां वाच्यत्वेनाभिप्रेततराणां वाग्वचनं तस्या अर्थस्तस्य प्रतिषेधः निराकरणं तस्मिन् निरंकुशः समर्थो घटशब्दः पटादीनां निराकरणं करोति स्वार्थं च प्रतिपादयति अतोऽनेकांतः, यदि पुनः सर्वथा स्वस्य ज्ञानार्थस्य बाह्यार्थस्य सामान्यं परापररूपमीदं वार्थाः आह आचष्ट इत्यागमः स्यात् तादृग्वाच्यं विशेषरहितं सामान्यं खपुष्पवत् गगनकुसुमसमानमतो न किंचित्स्यात्॥ १११॥

ननु सामान्यमेव वाचोऽर्थो यदुत विशेषे वर्तते सामान्येऽर्थक्रियाभावादिति संसर्गवोधमतं तन्निराकरणार्थमाह—

अष्टशती–वाचः स्वभावोऽयं येन स्वार्थसामान्यं प्रतिपादयंती तदपरं निराकरोति । अन्यतरापाये ऽनुक्तानतिशायनात् । इदं तदानेयं तथावान् प्रतीयेत तदर्थः । कूर्मरोमादिवत् नच सामान्यं विशेषपरिहारेण कश्चिदुपलभामहे । अनुपलभमानाश्च कथं स्वात्मानं परं वा तथाभिनिवेशेन विप्रलभामहे ! ॥१११॥

सामान्यवाग्विशेषे चेन्न शब्दार्था मृषा हि सा ।
अभिप्रेतविशेषाप्तेः स्यात्कारः सत्यलांछनः ॥ ११२ ॥

वृत्तिः–सामान्यसंबंधिनी वाक् विशेषे वर्तते—विशेषमाचष्टे तत्त्वार्थक्रियाभावात् चेदेवं भवतोऽभिप्रायः ! तर्हि शब्दस्यार्थोऽभिधेयः कुतः ! तादृग्भूता वाक् मृषा कल्पिका सा । यस्मान्न कस्यस्य वाचकोऽन्यमाह । घटशब्दः पटार्थस्य न कदाचिदपि प्रतिपादकः । नाप्यपोहोऽस्यार्थः, अपोहो हि परव्यावृत्तिः सा च तुच्छा ततो भेदक्षणिकैकांतपक्षे न वाच्यं नापि वाचको नानुमानं नाप्यागमः सर्वाभावोऽतः स्यात्कारः स्याद्वादः सत्यलांछनः सत्यभूतोऽभिप्रेतविशेषस्याप्तेर्निमित्तमिष्टार्थप्राप्तिहेतोराश्रयणीयः सर्वदोषकलंकातीतत्वात् ।

तस्यैव स्वरूपमाह—

अष्टशती–अस्तीति केवलमभावव्यवच्छेदादपोहमाहेति चेत् ! कः पुनरपोहः ! परतो व्यावृत्तिरभावः । कथमेवं सत्यभावं प्रतिपादयति भावं न प्रतिपादयतीत्येवमनुक्तसमं न स्यात् । तद्विकल्पो मिथ्याभिनिवेशवशादिति चेन्न चैवं तस्य प्रतिपादकं मिथ्याविकल्पहेतुत्वाद् व्यलीकवचनवत् । ततः स्याद्वाद एव सत्यलांछनो न वादांतरमित्यनुशास्यति ॥ ११२ ॥

विधेयमीप्सितार्थांगं प्रतिषेध्याविरोधि यत् ।
तथैवादेयहेयत्वमिति स्याद्वादसंस्थितिः ॥ ११३ ॥

वृत्तिः–विधेयमस्तीत्यादि प्रतिषेध्यस्य नास्तित्वादेरविरोधेनाविरुद्धं यत्तदीप्सितार्थस्याभिप्रेतकार्यस्यांगं कारणं । तथैवादेयं वस्तु हेयाख्याव्यादविरुद्धं । इत्यनेन प्रकारेण स्याद्वादस्य संस्थितिः सर्वप्रमाणैरविरुद्धा सिद्धिरिति प्रमाणहेतुदृष्टांताभासाः परवादिपरिकल्पितप्रमाणहेतुदृष्टांता वेदितव्याः । कुतः ! तल्लक्षणाभावात् । यस्त्वपि तैर्परिकल्पितं तदपि नास्ति लक्षणाभावात् । तस्मात्तदनेकांतात्मकं तत्त्वं लक्षणयोगादिति ।

शास्त्रार्थोपसंहारकारिकामाह—

अष्टशती–अस्तीत्यादि विधेयमभिप्रेत्य विधानात् नास्तित्वादिभिरविरुद्धं विधिप्रतिषेधयोरन्योन्याविनाभावलक्षणत्वात् स्वार्थज्ञानवत् । तद्विधेयप्रतिषेध्यात्मविशेषात् स्याद्वादः प्रतिपत्तव्ये सप्तभंगीसमाश्रयात् ॥ ११३ ॥

इतीयमाप्तमीमांसा विहिता हितमिच्छतां ।
सम्यङ्मिथ्योपदेशार्थविशेषप्रतिपत्तये ॥ ११४ ॥

वृत्तिः–इत्यनेन प्रकारेणेयं मया सतथ योऽयमुपदेशस्तस्यार्थः स्वरूप तस्य विवेको व्यक्तं तस्य प्रतिपत्तिरवगमस्तस्यै सम्यगुपदेशोऽयं मिथ्येति सर्वेण ज्ञायते यस्मात् ।

कृतकृत्यो निर्व्यूढतत्त्वप्रतिज्ञ आचार्यः श्रीमत्समंतभद्रकेसरी प्रमाणनयतीक्ष्णनखदंष्ट्राविदारितप्रवादिकुनयमदविह्वलकुभिकुभस्थलपाटनपटुरिदमाह—

[illegible]–

[illegible] सर्वज्ञविशेषपरीक्षेति [illegible]। [illegible]। [illegible] इति [illegible] हि निर्णयादिष्टिः ॥ ११४ ॥

श्री वर्द्धमानमकलंकमनिंद्यवंद्य—
पादारविंदयुगलं प्रणिपत्य मूर्ध्ना
भव्यैकलोकनयनं परिपालयंतं—
स्याद्वादवर्त्म परिणौमि समंतभद्रं ॥ १ ॥

इत्यष्टशती समाप्ता।

जयति जगति क्लेशावेशप्रपंचहिमांशुमान्
विहतविषमैकांतध्वांतप्रमाणनयांशुमान्।
यतिपतिरजो यस्याधृष्यान्मतांबुनिधेर्लवान्
स्वमतमतयस्तीर्थ्या नाना परे समुपासते ॥ ११५ ॥

वृत्तिः—यस्य भट्टारकस्य मतांबुधेरागमोदधेर्लवान् कणान् [illegible] परे नाना [illegible] प्रवादिनः सुगतादयः स्वमते मतिर्येषां ते स्वमतमतयः [illegible] समुपासते सेवंते सोऽजो [illegible] मरणरहितो यतिपतिः प्रधानस्वामी जयति त्रैलोक्यस्वामित्वं करोति [illegible] विहृत्य जगति [illegible]। पुनरपि किंविशिष्टः? क्लेशस्य दुःखस्य आवेशः कदर्थना तस्य प्रपंचो विस्तारः स एव हिमं [illegible] नादित्यः। एकांत एव ध्वांतं तमः विषमं च तदेकांतध्वांतं च विषमैकांतध्वांतं प्रमाणं च [illegible] नया उक्तलक्षणा विहतं निराकृतं विषमैकांतध्वांतं यैस्ते तथाभूतास्ते च ते प्रमाणनयाश्च त एवांशवः किरणास्ते विद्यते यस्य स तथाभूत इति यतिपतेर्विशेषणं ॥ ॥ ११५ ॥

श्रीमत्समंतभद्राचार्यस्य त्रिभुवनलब्धजयपताकस्य प्रमाणनयचक्षुषः स्याद्वादशरीरस्य देवागमाख्यकृतेः संक्षेपभूतं विवरणं कृतं श्रुतविस्मरणशीलेन वसुनंदिना जडमतिनाऽऽत्मोपकाराय।

समंतभद्रदेवाय परमार्थविकल्पिने।
समंतभद्रदेवाय नमोऽस्तु परमात्मने ॥ १ ॥

सुखाय जायते लोके वसुनंदिसमागमः।
तस्मात् निषेव्यतां भव्यैर्वसुनंदिसमागमः ॥ २ ॥

इति श्रीवसुनंद्याचार्यकृता देवागमवृत्तिः समाप्ता।

समाप्तोऽयं ग्रंथः।



सनातनजैनग्रंथमाला

१

स्याद्वादपतिश्रीविद्यानंदस्वामिविरचिता–

प्रमाणपरीक्षा।

—०—

जयंति निर्जिताशेषसर्वथैकांतनीतयः।
सत्यवाक्याधिपाः शश्वद्विद्यानंदा जिनेश्वराः॥ १॥

अथ प्रमाण-परीक्षा—तत्र प्रमाणलक्षणं परीक्ष्यते—

'सम्यग्ज्ञानं प्रमाणं प्रमाणत्वान्यथानुपपत्तेः। सन्निकर्षादिरज्ञानमपि प्रमाणं स्वार्थप्रमितौ साधकतमत्वात्' इति नाशंकनीयं। तस्य स्वप्रमितौ साधकतमत्वासंभवात्। न ह्यचेतनोऽर्थः स्वप्रमितौ करणं पटादिवत्। सोऽर्थप्रमितौ करणमित्यप्यनालोचितवचनं नैयायिकानां स्वप्रमितावसाधकतमस्यार्थप्रमितौ साधकतमत्वानुपपत्तेः। तथाहि— न सन्निकर्षादिरर्थप्रमितौ साधकतमः स्वप्रमितावसाधकतमत्वात्पटवत्। प्रदीपादिभिर्व्यभिचारः साधनस्य? इति न मंतव्यं। तेषामर्थपरिच्छित्तावकरणत्वात्। तत्र नयनमनसोरेव करणतया स्वयमभिमतत्वात्। प्रदीपादीनां तत्सहकारितयोपचारतः करणव्यवहारानुसरणात्। न चोपचारतोऽर्थप्रकाशन एव प्रदीपादिः करणं न पुनः स्वप्रकाशन इति मन्यमानो निर्मलमना मनीषिभिः, अनुमन्यते। नयनादेः-अर्थसंवेदनमिव प्रदीपादिसंवेदनमप्युपजनयतः प्रदीपादीनां सहकारित्वाविशेषात्। तेषामर्थप्रकाशनवत् स्वप्रकाशनेऽपि करणतोपचारव्यवस्थितेः। नयनादिना-अनेकांत इत्यपि न मननीयं तस्याप्युपकरणरूपस्याचेतनस्वभावस्यार्थप्रतिपत्तौ करणतोपचारात्। परमार्थतो भावेंद्रियस्यैव-अर्थग्रहणशक्तिलक्षणस्य साधकतमतया करणताव्यवसनात्। न चैतदसिद्धं विशुद्धधिषणजनमनसि युक्तियुक्ततया परिवर्तमानत्वात्। तथाहि—

'यदसन्निधाने कारकांतरसन्निधानेऽपि यन्नोपपद्यते तत् तत्करणकं। यथा कुठारासन्निधाने काष्ठछेदनमनुत्पद्यमानं कुठारकरणकं। नोत्पद्यते च भावेंद्रियासमवधानेऽर्थसंवेदनमुपकरणसद्भावेऽपि, इति तद्भावेंद्रियकरणकं। बहिःकरणसन्निकर्षाधीनतायां हि पदार्थसंवेदनस्य, नयनसन्निकर्षात् कलश इव नभसि नायनसंवेदनोदयः कुतो न भवेत्?। न हि नयननभसोरन्यतरकर्मजः संयोगो न विद्यते एवेति वक्तुं युक्तं सकलमूर्तिमद्द्रव्यसंयोगान्नभसि सर्वगतत्वसाधनविरोधात्। न च नयनममूर्तिमदेव? तस्य परैर्भौतिकतयोपगतत्वात्। पौद्गलिकतयास्माभिरुपकरणस्याभिमतत्वात्। ननु नभसि नयनसन्निकर्षस्य योग्यताविरहान्न संवेदननिमित्तता? इत्यपि न साधीयः तद्योग्यताया एव साधकतमत्वानुषंगात्। का चेयं सन्निकर्षस्य योग्यता नाम? विशिष्टा शक्तिरिति चेत्, सा तर्हि सहकारिसान्निध्यलक्षणा अनुमंतव्या।

'सहकारिसांनिध्यं शक्तिः' इत्युद्योतकरवचनात्। सहकारिकारणं च द्रव्यं गुणः कर्मादि वा स्यात्? न तावदाकाशद्रव्यं सहकारि तत्सन्निधानस्य नयननभःसन्निकर्षेऽपि समानत्वात्। एतेन कालद्रव्यं दिग्द्रव्यं च सहकारि निराकृतं तत्सान्निध्यस्यापि सर्वसाधारणत्वात्। मनोद्रव्यं सहकारि इत्यपि न संगतं तत्सन्निधेरपि समानत्वात्। कदाचित्तद्गतमनसः पुरुषस्याक्षार्थसन्निकर्षस्य संभवात् एतेन आत्मा मनसा युज्यते, मन इंद्रियेण, इंद्रियमर्थेनेति चतुष्टयसन्निकर्षोऽर्थप्रमितौ साधकतम इति सामिग्रीप्रमाणवादो दूषितः–तत्सामिग्र्याश्च नभसि सद्भावात्। कालादिनिमित्तकारणसामिग्रीवत्। यदि पुनस्तेजोद्रव्यं सहकारि तत्सन्निधानात् चाक्षुषादिज्ञानप्रभवादिति मतं तदापि न विशेषः घटादाविव गगनेऽपि लोचनसन्निकर्षस्यालोकसन्निधिप्रसिद्धेः संवेदनानुषंगस्य दुर्निवारत्वात्। अथादृष्टविशेषो गुणः सहकारी तत्सान्निध्यं संयुक्तसमवायेन, चक्षुषा संयुक्ते पुंसि त्वदृष्टविशेषस्य समवायात् इति मन्यध्वं तर्हि कदाचिन्नभसि नायनसंवेदनोदयः कुतो न भवेत्?। सर्वदा सर्वस्य तत्रादृष्टविशेषस्य सहकारिणोऽसन्निधानात् इति चेत्? कथमेवमीश्वरस्य नभसि चक्षुषा ज्ञानं श्रोत्रादिभिरिव घटते? समाधिविशेषप्रजनितधर्मविशेषानुगृहीतेन मनसा गगनाद्यशेषपदार्थसंवेदनोदये तु महेश्वरस्य बहिःकरणमनर्थकतामियात्। फलासंभवात्। बहिःकरणरहितस्य च नांतःकरणमुपपद्येत परनिर्वृत्तात्मवत्। ततः कथमंतःकरणेन धर्मादिग्रहणं मनसोऽसंभवे च न समाधिविशेषस्तदुपजनितधर्मविशेषो वा घटामटाट्यते तस्यांतःकरणसंयोगनिबंधनात्।

स्यान्मतं शिशिररश्मिशेखरस्य समाधिविशेषसंततिर्धर्मविशेषसंततिश्च सर्वार्थज्ञानसंततिहेतुरनाद्यपर्यवसाना, सततमेनोमलैरस्पृष्टत्वात्। तस्य संसारिसादिमुक्तिविलक्षणत्वात् सर्वथा मुक्ततयैव प्रसिद्धत्वात् इति तदप्यसमीचीनं एवमीश्वरस्यापि एनोमलविलयादेरेवार्थसंवेदनोद्भवप्रसक्तेः। सततमेनोमलाभावो हि यथा सततमर्थज्ञानसंतानहेतुररीक्रियते तथा कादाचित्कैनोमलाभावः कदाचिदर्थप्रमितिनिमित्तमुपपद्यामः तस्यैव सन्निकर्षसहकारितोपपत्तेः। तत्सान्निध्यस्यैव च सन्निकर्षशक्तिरूपत्वसिद्धेः। तद्भावादेव च नयनसन्निकर्षेऽपि नभसि संवेदनानुत्पत्तिघटनात्। तत्र विशिष्टधर्मोऽपि न पापमलापायादपरः प्रतिपद्यते भावांतरस्वभावत्वादभावस्य. निःस्वभावस्य सकलप्रमाणगोचरातिक्रांतत्वेन व्यवस्थापयितुमशक्यत्वात् इति पुरुषगुणविशेषसद्भाव एव पापमलाभावो विभाव्यते। स चात्मविशुद्धिविशेषो ज्ञानावरणवीर्यांतरायक्षयोपशमभेदः स्वार्थप्रमितौ शक्तिर्योग्यतेति च स्याद्वादवेदिभिरभिधीयते। प्रमातुरुपलब्धिलक्षणप्राप्तापि नातोऽर्थांतरभावमनुभवति पुंसः संवेदनावरणवीर्यांतरायलक्षणपापमलापगमविरहे कचिदुपलब्धिलक्षणप्राप्ततानुपलब्धेः, नयनोन्मीलनादिकर्मणो दृश्यादृश्ययोः साधारणत्वात् प्रद्योतादिकरणसाकल्यवत्। एतेन नयनोन्मीलनादिकर्मसन्निकर्षसहकारिविषयगतं चोपलभ्यत्वसामान्यमिति प्रत्याख्यातं तत्सन्निधाने सत्यपि क्वचित्कस्यचित् प्रमित्यनुपपत्तेः कालाकाशादिवत्। न हि तत्रोपलभ्यत्वसामान्यमसंभाव्यं योगिनोऽप्यनुपलब्धिप्रसंगात्। अस्मादृशापेक्षयोपलभ्यत्वसामान्यमन्यदेव योगीश्वरापेक्षादुपलभ्यतासामान्यादिति चेत्? तत्किमन्यत्? अन्यत्र योग्यताविशेषात्। प्रतिपुरुषं भेदमास्तिघ्नुवानादिति(?) स एव प्रमातुः प्रमित्युपजनने साधकतमोऽनुमंतव्यः सन्निकर्षादौ सत्यपि कचित्संविदुपजननाभावविभावनात्। स च योग्यताविशेषः स्वार्थग्रहणशक्तिः। आत्मनो भावकरणं ज्ञानमेव फलरूपत्वात् स्वार्थज्ञानात्कथंचिदभिन्नत्वात् सर्वथापि ततो भेदे नात्मस्वभावत्वोपपत्तेः। न चैवमुपगंतुं युक्तं? आत्मन एवोभयनिमित्तरूपतापत्तेर्विरोधात्। आत्मनो हि जानात्यनेनेति करणसाधनात् भेदोपवर्णनं कथंचिदभिन्नकर्तृकस्य करणस्य प्रसिद्धेः अग्निरौष्ण्येन दहतीन्धनमिति यथा। स्वातंत्र्यविवक्षायां तु जानातीति ज्ञानमात्मैव, कर्तृसाधनत्वात्तदात्मज्ञानयोरभेदप्राधान्यात् आत्मन एव स्वार्थग्रहणपरिणाममापन्नस्य ज्ञानत्वप्रसिद्धेः औष्ण्यपरिणाममापन्नस्याग्नेरौष्ण्यव्यपदेशवत्। तेन ज्ञानात्मा ज्ञानात्मना हेय जानाति इति व्यवहारस्य प्रतीतिसिद्धत्वात्। यथा च

इत्येव प्रमाणं स्वतः, अप्रमाणमन्यदेव प्रमाणपूर्वकत्वात् तथा च नाऽपि च प्रमाणं स्वतःप्रमितौ ज्ञान-विवक्षितार्थं व्यवहारात्। अज्ञानमज्ञानत्र व्यवसायाभावाद्व्यवसायात्मकं प्रमाणं, अन्यथानवस्थानात्। नयो-पन्यासेन स्वविषयोपदर्शकत्वेनाविसंवादिना व्यवसायात्मकं प्रमाणमित्युक्तं भवति। नापि स्वाभिप्रायाद्बहि व्यवसायात्मक-स्वरूपनिर्णये प्रमाणत्वव्यवस्था व्यवसायात्मकत्वे विसंवादाभावात्। व्यवसायात्मकत्वेऽपि व्यवसायात्म-कत्वं सिद्धम्। ततः सूक्तं सम्यग्ज्ञानमेव प्रमाणमज्ञानस्य प्रमाणत्वायोगात्सम्यग्ज्ञानत्वमिति।

किं पुनः सम्यग्ज्ञानम्? अभिधीयते — स्वार्थव्यवसायात्मकं सम्यग्ज्ञानं सम्यग्ज्ञानत्वात्। यत्तु न स्वार्थव्यवसाया-त्मकं न तत्सम्यग्ज्ञानं यथा संशयविपर्ययानध्यवसायाः। सम्यग्ज्ञानं च विवादापन्नं तस्मात्स्वार्थव्यवसायात्मकमिति। सुनिश्चितान्वयव्यतिरेकनियमनिश्चयमात्मा हेतुः प्रसिद्ध एव सम्यग्ज्ञानत्वेऽप्यवादिनां साध्यधर्मिणि तद्भावात्। द्वि-चन्द्रादिज्ञानेनोऽपि व्यभिचारः सम्यग्ज्ञानत्वे — अव्यवसायात्मकत्वेऽप्यभिचारी हेतुः। इति स्वमनोरथमात्रं सौगतस्य तेषां सम्यग्ज्ञानत्वविरोधात्। सम्यग्ज्ञानत्वं ह्यविसंवादकत्वेन व्याप्तं तदभावे तदसंभवात्। तदपि प्रवर्तकत्वेन व्याप्तं तदभावे तदसंभवात्। तदप्यर्थप्रापकत्वेन अर्थप्रापकत्वाविसंवादित्वात्। निर्विकल्पज्ञानवत्। तदपि प्रवर्त-कत्वेन व्याप्तं अप्रवर्तकस्यार्थप्रापकत्वायोगात्। तद्वत् प्रवर्तकत्वमपि स्वविषयोपदर्शकत्वेन व्याप्तं स्वविषयानु-पदर्शकस्य प्रवर्तकत्वव्यवहारविषयत्वासिद्धेः। न हि पुरुषं हठाद्धस्ते गृहीत्वा ज्ञानं प्रवर्तयति। स्वविषयं तु दर्शयत् प्रवर्तकमुच्यते अर्थप्रापकं च इत्यविसंवादकं सम्यग्ज्ञानं प्रमाणं तद्विपरीतस्य मिथ्याज्ञानत्वप्रसिद्धेः संशय-वदिति धर्मोत्तरमतं। तत्राव्यवसायात्मकस्य चक्षुर्विज्ञानस्यापि समक्षस्य सम्यग्वेदनत्वं न व्यवतिष्ठते तस्य स्वविषयोपदर्शकत्वाऽसिद्धेः। तत्सिद्धौ वा नीलादाविव क्षणक्षयादावपि तदुपदर्शकत्वप्रसक्तेः। ततो यद-व्यवसायात्मकं ज्ञानं न तत्स्वविषयोपदर्शकं यथा गच्छतः तृणस्पर्शसंवेदनं। अव्यवसायि प्रसिद्धमव्यवसायात्मकं च सौगताभिमतदर्शनमिति व्यापकानुपलब्धिः सिद्धा। व्यवसायात्मकत्वस्य व्यापकस्याभावे तद्व्याप्यत्वस्य स्वविषयोपदर्शकत्वस्याननुभवात्।

स्यादाकूतं — न व्यवसायात्मकत्वेन स्वविषयोपदर्शकत्वस्य व्याप्तिः सिद्धिमधिवसति तस्य व्यवसा-यजनकत्वेन व्याप्तत्वात्। नीलधवलादौ व्यवसायजननाद्दर्शनस्य तदुपदर्शकत्वव्यवस्थितेः। क्षणक्षयस्वर्ग-प्रापणशक्त्यादौ व्यवसायाजनकत्वात् तदनुपदर्शकत्वव्यवस्थानात्। गच्छत्तृणस्पर्शसंवेदनस्यापि तत एव स्वविषयोपदर्शकत्वाभावसिद्धेः मिथ्याज्ञानत्वव्यवहारात् अन्यथाऽव्यवसायित्वाघटनात् इति? तदेतदवि-चारितरमणीयं सौगतस्य व्यवसायो हि दर्शनजन्यः। स किं दर्शनविषयस्योपदर्शकोऽनुपदर्शको वा? इति विचार्यते — यद्युपदर्शकस्तदा स एव तत्र प्रवर्तकः प्रापकश्च स्यात् संवादकत्वात् सम्यक्संवेदनवत्। न तु तन्निमित्तं दर्शनं सन्निकर्षादिवत्। अथानुपदर्शकः? कथं दर्शनं तज्जननात् स्वविषयोपदर्शकं? अतिप्रसंगात्। संशयविपर्यासकारणस्यापि स्वविषयोपदर्शकत्वापत्तेः। दर्शनविषयसामान्याध्यवसायित्वाद्वि-कल्पस्य तज्जनकं दर्शनं स्वविषयोपदर्शकमिति च न चेतसि स्थापनीयं दर्शनविषयसामान्यस्यान्यापोहलक्षण-स्यावस्तुत्वात्। तद्विषयव्यवसायजनकस्य वस्तूपदर्शकत्वविरोधात्। दृश्यसामान्ययोरेकत्वाध्यवसायाद्वस्तूप-दर्शक एव व्यवसाय इत्यपि मिथ्या तयोरेकत्वाध्यवसायासंभवात्। तदेकत्वं हि दर्शनमध्यवस्यति तत्पृष्ठजो व्यवसायो वा ज्ञानान्तरं वा? न तावद्दर्शनं तस्य विकल्पाविषयत्वात्। नापि तत्पृष्ठजो व्यवसायः तस्य दृश्यागोचरत्वात्। तदुभयविषयं ज्ञानान्तरं तु निर्विकल्पकं विकल्पात्मकं वा? न तावन्निर्विकल्पकं तस्य दृश्य-विकल्प्यद्वयविषयत्वविरोधात्। नापि विकल्पात्मकं तत एव। न च तद्द्वयाविषयं संवेदनं तदुभयैकत्वमध्यव-सातुं समर्थं। तथा हि — यद्यन्न विषयीकुरुते न तदेकत्वमध्यवस्यति यथा रससंवेदनं स्पर्शरूपोभयं। न विषयीकुरुते च दृश्यविकल्प्योभयं किंचित्संवेदनं, इति न कुतश्चिद्दृश्यविकल्प्ययोरेकत्वाध्यवसायसिद्धिः। ततो न व्यवसायो वस्तूपदर्शकः स्यात्। नापि तदुपजननाद्दर्शनं स्वविषयवस्तूपदर्शकं योगिप्रत्यक्षस्य विभू-तकल्पनाजालस्य सर्वदा वस्तुविकल्पाजनकत्वात् तदुपदर्शकत्वविरोधात्। स्वसंवेदनमपि न तस्य स्वरूपोप-

दर्शकं तद्विकल्पानुत्पादकत्वात् इति कुतः स्वरूपस्य स्वतो गतिरवतिष्ठेत ? । किं च दर्शनपृष्ठभाविविकल्पस्य स्वसंवेदनवदासिद्धौ तत्स्वसंवेदनं कुतः प्रमाणं स्यात् ? । तद्यदि स्वरूपोपदर्शनादेव प्रमाणमिष्यते ? तदा स्वर्गप्रापणशक्त्यादावपि प्रमाणतामास्कंदेत् । तत् स्वसंविदाकार एव प्रमाणं तद्व्यवसायजननात्-न पुनरन्यत्रेति परिकल्पनायां तद्व्यवसायस्वसंवेदनस्यापि व्यवसायांतरोपजननात् स्वरूपोपदर्शनेन भवितव्यमित्यनवस्थानात्, नाद्यव्यवसायस्वसंवेदनस्य प्रामाण्यं । तदप्रामाण्ये च न तत एव स्वरूपसिद्धिः । तदसिद्धौ च न तज्जननाद्दर्शनस्य स्वविषयोपदर्शकत्वं । तदभावे च न तस्य प्रवर्तकत्वं । अप्रवर्तकस्य नार्थप्राप्तिनिमित्तत्वं । तदसंभवे च नाविसंवादकत्वं तद्विरहे च न सम्यग्ज्ञानत्वं स्वसंवेदनेन्द्रियमनोयोगिज्ञानानामिति न तैर्व्यभिचारः साधनस्य संभवति ।

स्यान्मतं–अर्थसामर्थ्यादुत्पत्तिः–अर्थसारूप्यं च दर्शनस्य स्वविषयोपदर्शकत्वं तच्च सकलदर्शनानामव्यवसायात्मकत्वेऽपि संभवत्प्रवर्तकत्वमर्थप्रापकत्वमविसंवादकत्वं सम्यग्ज्ञानलक्षणमिति तैः सर्वदर्शनैर्व्यभिचार एव हेतोरिति ? तदपि दुर्घटमेव क्षणक्षयादावपि तदुपदेशकत्वप्रसंगात् । तत्र नित्यत्वादिसमारोपानुप्रवेशाद्योगिनः प्रतिपत्तुर्नोपदेशकत्वमवतिष्ठते । योगिनस्तु समारोपासंभवात् क्षणक्षयेऽपि दर्शनं तदुपदेशकमेवेति समाधानमपि न धीमद्धृतिकरं नीलादावप्ययोगिनस्तद्विपरीतसमारोपसंभवात् । कथमन्यथा विरुद्धधर्माध्यासात्तद्दर्शनभेदो न भवेत् ? न हि–अभिन्नमेकदर्शनं क्वचित्समारोपाक्रांतं क्वचिदेववक्तुं युक्तं । ततो यद्यत्र विपरीतसमारोपविरुद्धं तत्तत्र निश्चयात्मकं यथानुमेयेऽर्थेऽनुमानज्ञानं । विपरीतसमारोपविरुद्धं च नीलादौ दर्शनमिति व्यवसायात्मकमेव बुद्ध्यामहे । निश्चयहेतुत्वाद्दर्शनं नीलादौ विपरीतसमारोपविरुद्धं न पुनर्निश्चयात्मकत्वात् ततोऽन्यथानुपपत्तिः साधनस्यानिश्चितेति मामंस्थाः योगिप्रत्यक्षेऽपि विपरीतसमारोपस्य प्रसंगात् तेन तस्याविरोधात् । परेषां तु तस्यापि निश्चयात्मकत्वाभावेन विरोधः सिद्ध एव । तथा निश्चयहेतुना दर्शनेन विरुद्धं प्रतिपादयतः स्वमतविरोधः स्यात् । निश्चयारोपमनसोर्बाध्यबाधकभाव इति धर्मकीर्तेरभिमतत्वात् दर्शनारोपयोर्विरोधाभावसिद्धेः । ननु चार्थदर्शनस्य निश्चयात्मकत्वे साध्ये प्रत्यक्षविरोधः संहृतसकलविकल्पदशायां रूपादिदर्शनस्यानिश्चयात्मकस्यानुभवात् । तदुक्तं–

संहृत्य सर्वतश्चिंतां स्तिमितेनांतरात्मना ।
स्थितोऽपि चक्षुषा रूपमीक्षते साक्षजा मतिः ॥ १ ॥ इति ।

तथानुमानविरोधोऽपि प्रत्युपस्थितचिंतावस्थायां–इंद्रियादर्थगतौ कल्पनानुपलब्धेः । तत्र कल्पनाभावे पुनस्तत्स्मृतिप्रसंगः तदा विकल्पितकल्पनावत्—तदप्युक्तं—

पुनर्विकल्पयन् किंचिदासीन्मे कल्पनेदृशी ।
इति वेत्ति न पूर्वोक्तावस्थायामिंद्रियाद्गतौ ॥ १ ॥–इति

तदेतदपि धर्मकीर्तेर्लक्षणाभिधानं प्रत्यक्षतो निर्विकल्पदर्शनाप्रसिद्धत्वात् । संहृतसकलविकल्पावस्था दर्शनं विकल्पयतो गोदर्शनावस्था । न च तदा गोदर्शनमव्यवसायात्मकं पुनः स्मरणाभावप्रसंगात् । तस्य संस्कारकारणत्वविरोधात् क्षणिकत्वादिवत् । व्यवसायात्मन एव दर्शनात् । संस्कारस्य स्मरणस्य च संभवात् अन्यथानुपपत्तेः । तदुक्तं—

व्यवसायात्मनो दृष्टेः संस्कारः स्मृतिरेव वा ।
दृष्टे [illegible] ॥ १ ॥

[illegible]

[illegible] भुवोर्दर्शनस्मरणयाः प्रमाणत्व [illegible] सुगतो गतरागत्वात्। [illegible] विचारणायां क्षणि-
कत्वरूपस्यापि भावात्। बुद्धिरात्र तु [illegible] न्। तत्र पाटव-
पाटवयोर्भेदे तद्धेतोरपि भेदापत्तेः, विरुद्धधर्माध्यासात्। तथाविधस्य तद्धेतोरनेकस्वभावत्वादुपपत्तेः पटुत्वापटुत्वे स्याताम्,
इत्यनेकान्तस्य सकर्मीपगमे स्यापि विरुद्धधर्मयोरेकत्रानुपदाने रूपाभासंभवात्। यत्पुनरर्थेन निश्चितत्वं
तदनिश्चितादिनः क्षणिकत्वेऽप्येव नातिरिक्तम्। यत्पुनरभिनिवेशमर्थित्वं तत्र व्यवसायजननविबन्धनं
कांचिदनभिलषितेऽपि वस्तुनि यस्य चिद्रूढाभ्यासस्य स्मरणप्रतीते—इति नाभ्यासादिभ्यः कांचिदेव संस्कार-
जननं—अनंशज्ञानस्यैवादिनो घटते। यस्य तु बहिरन्तरनेकान्तात्मकत्वादिनो न किंचिदनुपपन्नं सर्वथै-
कत्र व्यवसायाव्यवसाययोः, अभ्यासानभ्यासयोः, संस्कारासंस्कारयोः, धारणेतराभिधानयोः, स्मरणास्मरण-
योश्चानभ्युपगमात्। तद्वदाचार्यांचिद्धेतुस्वभावयोर्भेदप्रसिद्धेः।

तेषामपि व्यावृत्तिभेदाद्धेदोपगमात् दोषोऽयं तथाहि—नीलस्वभावानीलव्यावृत्तिः, क्षणिकत्वमक्षणिकत्वव्या-
वृत्तिरुच्यते तत्रानीलव्यावृत्तौ नीलस्वभावस्य तदात्मनामनुभवोत्पादुत्पन्नो न पुनरक्षणिकव्यावृत्तौ क्षणिकत्वस्वभाव-
स्य तदात्मनामनुभवाभावात्। न चानयोर्व्यावृत्त्योरभेदः संभवति व्यावर्त्यमानयोरभेदप्रसंगात्। न च तद्भेदाद्व-
स्तुनो भेदः तस्य निरंशत्वात् अन्यथा अनवस्थाप्रसंगात् इति परे मन्यन्ते तेऽपि न सत्यवादिनः स्वभावभेदाभावे
वस्तुनो व्यावृत्तिभेदासंभवात्। नीलस्वलक्षणं हि येन स्वभावेनानीलाद्व्यावृत्तं तेनैव यद्यक्षणिकाद्व्यावर्तेत
तदा नीलक्षणिकयोरेकत्वात्तस्तद्व्यावृत्त्योरेकत्वप्रसंगः। स्वभावांतरेण ततो व्यावृत्तमिति वचने तु सिद्धः
स्वलक्षणस्य स्वभावभेदः कथं निराक्रियते? । यदि पुनः स्वभावभेदोऽपि वस्तुनो तत्स्वभावव्यावृत्त्या
कल्पित एवेति मतं? तदा परिकल्पितस्वभावान्तरकल्पनायामनवस्थानुषज्येत। तथाहि—अनीलस्वभावा-
व्यावृत्तिरपि स्वभावांतरेण अन्यव्यावृत्तिकरेण वक्तव्या। सापि तदन्यव्यावृत्तिस्वभावांतरेण तथाविधे-
नेति न क्वचिद् व्यवतिष्ठते।

कश्चिदाह—तत एव सकलविकल्पवाग्गोचरातीतं वस्तु विकल्पशब्दानां विषयस्यान्यव्यावृत्ति-
रूपस्य अनाद्यविद्योपकल्पितस्य सर्वथा विचाराऽसहत्वात्। विचारसहत्वे वा तदवस्तुत्वविरोधात् इति
सोऽपि न सम्यग्वादी दर्शनविषयस्याप्यवस्तुत्वप्रसंगात् तस्यापि शब्दविकल्पविषयवत् विचारासहत्वाविरो-
धात्। तथाहि—नीलस्वलक्षणं सुगतेतरजनदर्शनविषयतामुपगच्छत् किमेकेन स्वभावेन नानास्वभावेन
वा दृश्यं स्यात्? यद्येकेन स्वभावेन तदा यदैव सुगतदृश्यत्वं तदैवेतरजनदृश्यत्वमित्यायातं अशेषस्य
जगतः सुगतत्वं। यदेतरजनदृश्यत्वं तदैव सुगतदृश्यत्वमिति सुगतस्य सुगतस्येतरजनत्वापत्तेः सुगत-
दर्शनमविकं स्यात्। अथैतस्माद्दोषाद्बिभ्यता नानास्वभावेन सुगतेतरजनदृश्यत्वं प्रतिपाद्यते तदा नील-
स्वलक्षणस्य दृश्यस्वभावभेदः कथमपह्नुयेत? न च दृश्यं रूपमनेकं कल्पितमिति शक्यं वक्तुं दृश्यस्य
कल्पितत्वविरोधात्। अथ मन्येथाः स्वलक्षणस्य दृश्यत्वं स्वाकारार्पकत्वव्यावृत्तिरूपं नानादृग्दृश्यपेक्षयाऽनेकं
यद्यप्यन्येन तत्स्वभावे नानादृष्टदर्शनविषयतां स्वलक्षणं नास्कंदेत्। न च परमार्थतो दर्शनं दृश्यविषयं
सर्वज्ञानां स्वरूपमात्रपर्यवसायित्वात्। उपचारादेव बहिर्विषयताव्यवहारात् इति तदप्यसत् वस्तुनः स्वा-
कारार्पकत्वस्यापि पूर्वपर्यनुयोगानतिक्रमात्। तद्धि स्वलक्षणं येन स्वभावेन सुगतदर्शनाय स्वाकारम-
र्पयति तेनैवेतरजनदर्शनाय स्वभावांतरेण वा? यदि तेनैव तदा तदैव सुगतेतरजनदर्शनैकत्वमापनीप-
द्यते तथा च सर्व [illegible] नत्वमापद्यते। स्वभावांतरेण स्वाकारार्पकत्वे
[illegible]? । यत्पुनः स्वाकारार्पकत्वमपि न
[illegible] स्वभावभेदमानामिति मत तदपि

दुरुपपादमेव तेषां वैयर्थ्यप्रसंगात् । ज्ञानं हि ज्ञेयप्रसिद्धयर्थं प्रेक्षावतामन्विष्यते प्रकाश्यमानेऽर्थे प्रदी-
पवत् । न पुनः स्वरूपप्रसिद्धयर्थं प्रदीपवदेवेति । बहिरर्थाविषयत्वे सकलसंवेदनानां कथमिव
न स्यात् ? निर्विषयस्वमादिसंवेदनानामपि सार्थकत्वप्रसंगात् स्वरूपप्रकाशनस्य प्रयोजनस्य
भावात् । किं च सुगतसंवेदनस्यापि स्वरूपमात्रपर्यवसितायां कथमिव सुगतः सर्वदर्शीष्यते
पृथग्जनो वा कथं न सर्वदर्शी सुगतवदनुमन्येत ? स्वरूपमात्रपर्यवसितायाः तत्संवेदनेऽपि
यदि पुनर्वास्तवत्वं सकलवेदित्वं तायागतयोरङ्गीक्रियते संवृत्या तस्य व्यवहारिभिः
तदव्यवहरणे तद्वचनस्य सत्यताव्यवहारानुपपत्तेः [illegible]
तदुक्तं—

ज्ञानवान् मृग्यते कश्चित्तदुक्तप्रतिपत्तये ।
अज्ञोपदेशकरणे विप्रलंभनशंकिभिः ॥ १ ॥ इति

प्रतिपद्येत तथापि सुगतेतरव्यवहारसिद्धिः सुगतवदितरजनस्यापि संवृत्या
[illegible]नानुषंगात् । सकलपदार्थेभ्यः सुगतस्य संवेदनोदयात् सकलार्थज्ञता सुगतस्य [illegible]
जनस्य प्रतिनियतपदार्थादेव तद्वेदनोत्पत्तेरिति चेत् ? न सुगतज्ञानस्यापि [illegible]
समसमयवर्तिपदार्थजन्यत्वासंभवात् । यदि पुनरनागतातीतपदार्थेभ्यो [illegible]
[illegible] सकलेभ्यः सुगतसंवेदनस्योत्पत्तिः [illegible]
[illegible] मतं ? तदा किमेकेन स्वभावेन कालत्रयवर्तिपदार्थैः
नानास्वभावैर्वा ? यद्येकेन स्वभावेन, एकेनार्थेन सुगतज्ञानमुत्पाद्यते तेनैव
[illegible] । सुगतविज्ञानस्य वा तदेकपदार्थजन्यत्वमिति [illegible]
[illegible] । अथान्येन स्वभावेनार्थः सुगतज्ञानमुत्पादयति पदार्थ[illegible]
[illegible] इति मतिर्भवता तर्हि सुगतज्ञानमनेकस्वभावमेकमापन्नं । तद्वत्
[illegible] विरुध्यते । एकस्यानेकस्वभावाविरोधाद्[illegible]
[illegible] । यदि पुनर[illegible]
[illegible] । तदा न [illegible]
[illegible] । ततः सुगतविज्ञानस्यापि [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

कथंचित् तत्प्रमाणमिष्टं, स्वपरव्यवसायात्मकत्वात् । तस्माद्विज्ञानात्मकत्वे सत्यपि प्रमाणस्य व्यवसायात्मकत्वमेव प्रतिपत्तव्यम् । प्रत्यक्षे च व्यवसायात्मके प्रवृत्तिरभ्युपगता । तस्मादर्थव्यवसायात्मकं प्रत्यक्षमभ्युपगन्तव्यं । विवादापन्नं प्रवृत्तिरौत्सर्गिकी इति चेन्न तस्याः प्रवृत्त्यभाव-प्रसंगात्, स्वरूपसंवेदनमात्रेण तदभावात् । व्यवसायात्मके प्रवृत्तिर्यदि हि स्यात् प्रवृत्तिः सा च विसंवा-दाभावादिति न व्यभिचारः । तदर्थव्यवसायात्मकत्वमनुमानेन यदर्थे व्यवसायि ना न वा ? प्रथमविकल्पे तेनैवानैकांतिकं साधनमनुमानं तस्य ज्ञाने व्यवसायात्मकत्वेऽपि स्वार्थव्यवसायात्मकत्वसिद्धेः । द्वितीयविकल्पेऽपि नातोऽनुमानात्सिद्धिरिति स्वार्थव्यवसायात्मकत्वाभावात् अनु-मानाभासत्वं । तत् किं बहुना सर्वस्य किंचिदिह साधयतः दूषयतो वा दूषणं कुतश्चित्प्रमाणात् स्वार्थव्यवसायात्मकादप्यनुमानमभ्युपगच्छन्नपि तस्यार्थव्यवसायात्मकत्वे निरालंबनत्वदूषणानुषंगः । पर-प्रतिपत्त्यर्थं व्यवसायिनः प्रमाणस्याप्यनुमानादयोऽपि इति चेत् ? तर्हि परं प्रतिपाद्यते वा न वा ? यदि न प्रतिपाद्यते कथं परप्रतिपत्त्यर्थं किंचिदप्यनुमानं ? न न प्रतिपाद्यते तत्प्रतिपत्ति च किंचिदप्यनुमानमिति कथमनुमानं ? । अथ परः प्रतिपाद्यते तर्हि तत्र प्रमाणात्प्रतिपत्तिः तस्य स्वार्थव्यवसायात्मकं सिद्ध तस्मात्स्वार्थव्यवसायात्मकत्वं तेन परप्रतिपत्तेरयोगात् । यदि पुनः परोपगमादनुमानप्रतिपत्तिरिति मत तदप्य-निष्टः पर्यनुयोगः तस्यापि पराभ्युपगमांतरस्य प्रतिपाद्यप्रतिपत्तिपूर्वकत्वे पूर्वोक्तदूषणानतिक्रमात् ।

स्यान्मतं न बहिरर्थो परमार्थतः संति तत्प्रत्ययानां निरालंबनत्वात् स्वप्नप्रत्ययवत् संतानांतरवि-ज्ञानानामपि असत्त्वात् । तत्र स्वरूपमात्रव्यवसायात्मकमेव विज्ञानमिति तदप्यसारं तथाहि—सर्वप्रत्य-यानां निरालंबनत्वं न तावत्प्रत्यक्षतः सिद्ध्यति तस्य तद्विषयत्वात् । विवादापन्ना प्रत्यया निरालंबना एव प्रत्ययत्वात् स्वप्नेंद्रजालादिवदिति अनुमानान्निरालंबनत्वसिद्धिरिति मिथ्या स्वसंतानप्रत्ययेन व्यभिचारात् । तस्यापि संतानांतरप्रत्ययवत्पक्षीकरणे किंचिदनुमानज्ञानं स्वसाध्यार्थालंबनं निरालंबनं वा ? प्रथमपक्षे तेनैवा-नैकांतिकत्वं प्रत्ययत्वं । द्वितीयकल्पनायां नातो निरालंबनत्वसिद्धिः । परमार्थतस्तत्सिद्धिरेव सकलभेदप्रत्ययानां निरालंबनत्वसिद्धिः ! इत्यपि न व्यवतिष्ठते परब्रह्मण एवाप्रसिद्धेः । तद्धि स्वतो वा सिद्ध्येत् परतो वा ? न तावत्स्वत एव विप्रतिपत्त्यभावप्रसंगात् । परतश्चेदनुमानादागमाद्वा ? यद्यनुमानात् किमत्रानुमानमिति अभि-धीयतां । विवादापन्नोऽर्थः प्रतिभासांतः प्रविष्ट एव प्रतिभासमानत्वात् । यो यः प्रतिभासमानः स स प्रति-भासांतःप्रविष्ट एव दृष्टः यथा प्रतिभासस्वात्मा प्रतिभासमानश्च सकलोऽर्थश्चेतनाचेतनात्मको विवादापन्नः तस्मात्प्रतिभासांतःप्रविष्ट एवेत्यनुमानं न सम्यक् धर्मि हेतु-दृष्टांतानां प्रतिभासांतःप्रविष्टत्वे साध्यांतःपाति-त्वेन अनुमानोत्थानायोगात् । प्रतिभासांतः प्रविष्टत्वाभावे तैरेवेति हेतोर्व्यभिचारात् । यदि पुनरनाद्यवि-द्यावासनाबलाद्धर्मि-हेतु-दृष्टांताः प्रतिभासबहिर्भूता इव निर्धार्यंते प्रतिपाद्यप्रतिपादकसभ्यसभापतिजनवत् । ततोऽनुमानमपि सकलस्यैव सकलानाद्यविद्याविलासरहितत्वे तु प्रतिभासांतःप्रविष्टत्वमिति प्रतिभासमेवेति विप्र-तिपत्त्यसंभवात् । प्रतिपाद्यप्रतिपादकभावाभावात् साध्यसाधनभावानुपपत्तेर्न किंचिदनुमानेनास्य फलं । स्व-यमनुभूयमाने परब्रह्मणि प्रतिभास एव देशकालाकारैरव्यवच्छिन्नस्वरूपे निर्व्यभिचारं सकलकालावस्थाव्यापि-नि अनुमानाप्रयोगात् इति समभिधीयते तदा साध्यसाधनविकल्पा यदि प्रतिभासांतःप्रविष्टा तदाविद्यैव कथमसंत धर्मिदृष्टांतादिकमनुपकरणीयं । अथ प्रतिभासबहिर्भूतास्तदा तेऽप्रतिभासमाना प्रतिभासमाना वा ? न ताव-दप्रतिभासमाना सदप्रतिभासकत्वात् तथा । प्रतिभासमाना चेत् तैरेव हेतोर्व्यभिचारः प्रतिभास-बहिर्भूतत्वेऽपि तेषां प्रतिभासमानत्वात् ।

तद्रूपत्वात् । तथा सकलविचारातिक्रांततया किमसौ विचारगोचरा अविचारगोचरा वा स्यात् ? प्रथमकल्पनायां सकलविचारातिक्रांततया विचारानतिक्रांतत्वाभ्युपगमव्याघातः । द्वितीयकल्पनायां न सकलविचारातिक्रांतता व्यवतिष्ठते सकलविचारातिक्रांततायामपि तस्यास्तया व्यवस्थाने सर्वथैकानेकत्वकल्पनाया अपि व्यवस्थानप्रसंगात् । तस्मात्सत्स्वभावैवाविद्याभ्युपगंतव्या विद्यावत् । तथा च विद्याऽविद्याद्वैतप्रसिद्धेः कुतः परमब्रह्मणोऽनुमानात्सिद्धिः ? । एतेनोपनिषद्वाक्यात्परमपुरुषसिद्धिः प्रत्याख्याता । सर्वं वै खल्विदं ब्रह्मेत्यादिवाक्यस्य परमात्मनोऽर्थांतरभावे द्वैतप्रसक्तेरविशेषात् । तस्यानाद्यविद्यात्मकत्वेऽपि पूर्वोदितदूषणप्रसंगात् ततो न परमपुरुषाद्वैतसिद्धिः स्वतः परतो वा येन सम्यग्ज्ञानं स्वव्यवसायात्मकमेव न पुनरर्थव्यवसायात्मकं–अर्थाभावादिति वदन् अवधेयवचनः स्यात् ।

यत्तु स्वप्नज्ञानं स्वव्यवसायात्मकमेवेत्युक्तं तदपि न संगतं तस्य साक्षात्परंपरया वार्थव्यवसायात्मकत्वाघटनात् । द्विविधो हि स्वप्नः सत्योऽसत्यश्च तत्र सत्यो देवताकृतः स्यात् धर्माधर्मकृतो वा कस्यचित्साक्षाद्व्यवसायात्मकः प्रसिद्धः स्वप्नदशायां यद्देशकालाकारतयार्थः प्रतिपन्नः पुनर्जागृद्दशायामपि तद्देशकालाकारतयैव तस्य व्यवसीयमानत्वात् । कश्चित्सत्यः स्वप्नः परंपरयार्थ–व्यवसायी स्वप्नाध्यायनिगदितार्थप्रापकत्वात् । तदुक्तं—

यस्तु पश्यति रात्र्यंते राजानं कुंजरं हयं ।
सुवर्णं वृषभं गां च कुटुंबं तस्य वर्धते ॥ १ ॥

इति कुटुंबवर्धनाविनाभाविनः स्वप्ने राजादिदर्शनस्य कथमर्थनिश्चायकता न स्यात् ? पावकाविनाभाविधूमदर्शनवत् । दृष्टार्थाव्यवसायात्मकत्वात् स्वप्नबोधोऽर्थव्यवसायी इति वचने लैंगिकोऽपि बोधोऽर्थव्यवसायी माभूत । तत एव तद्वत् । अनुमानबोधोऽनुमितार्थव्यवसायी समस्तीति वचने स्वप्नागमगम्यार्थव्यवसायी स्वप्नबोधोऽपि कथं नाभ्यनुज्ञायते ? । कदाचिद्व्यभिचारदर्शनान्नैरभ्युपगमः कर्तुं युक्त इति चेन्न देशकालाकारविशेषं यथार्थागमोदितमपेक्ष्यमाणस्य कचित्कदाचित्कथंचिद्व्यभिचाराभावात् । तद्देशादिरूपस्तु न समीचीनः स्वप्नः तस्य स्वप्नाभासत्वात् । प्रतिपत्तुरपराधाच्च व्यभिचार संभवत्वे न पुनरनपराधात् यथा चाधूमः धूमबुद्ध्या प्रतिपद्यमानस्य तत पावकानुमानं व्यभिचारीति प्रतिपत्तुरेवापराधो न धूमस्य धीमद्भिरभिधीयते । तथैवास्वप्नं स्वप्नबुद्ध्या प्रपद्यस्य तत्रास्वप्नाद्विसंवाद्यमानो न व्यभिचरतीति न स्वप्नागमस्यापराधः प्रतिपत्तुरेवापराधात् । यः पुनरसत्य स्वप्नः पित्तादुद्रेकजनित स किमर्थसामान्यं व्यभिचरति अर्थविशेषं वा ? न तावदर्थसामान्यं देशकालाकारविशेषाणामेव व्यभिचारात् [illegible] [illegible] रर्थसामान्यस्य सद्भावात् । तदभावेऽर्थविशेषेषु संशयविपर्ययानध्यवसायाधिज्ञानानामनुत्पत्तेः न हि [illegible] [illegible] सत्तामात्रं व्यभिचरति तस्यानुपलब्धिप्रसक्तेः [illegible] [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] । विशेष तु यत्र एव व्यभिचरति तत्र एव असत्यः कथमन्यथा [illegible] [illegible] स्यात् ? [illegible] स्वार्थविशेषव्यभिचारी [illegible] [illegible] प्रयोगेन [illegible] [illegible] [illegible] ।

[illegible] [illegible] —सम्यग्ज्ञानमर्थ[illegible] न [illegible] [illegible] [illegible] [illegible] [illegible] । न हि [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । न हि [illegible]

इत्यनिष्टरा: पर्यनुयोगः—अनवस्था च महीयसी । कथंचिद्भेदः कथंचिदभेदः इत्युभयपक्षावलंबनमपि अनेनैवापास्तं पक्षद्वयनिक्षिप्तदोषानुषंगात् पक्षान्तराऽसंभवाच्चेति सोऽपि न न्यायकुशलः प्रतीत्यतिलंघनात् । लोके हि ज्ञानस्य स्वव्यवसायिन एवार्थव्यवसायित्वेन प्रतीतिः सिद्धा । नचेयं मिथ्या बाधकाभावात् । स्वात्मनि क्रियाविरोधो बाधक इति चेत् का पुनःक्रिया ? किमुत्पत्तिर्ज्ञप्तिर्वा ? यद्युत्पत्तिः सा स्वात्मनि विरुध्यते । न हि वयमप्यनुजानीमहे ज्ञानमात्मानमुत्पादयति इति ।

नैकं स्वस्मात्प्रजायते

इति समन्तभद्रस्वामिभिरभिधानात् । अथ ज्ञप्तिः क्रिया सा स्वात्मनि विरुद्धा तदात्मनैव ज्ञानस्य स्वकारणकलापादुत्पादात् । प्रकाशात्मनैव प्रकाशस्य प्रदीपादेः । न हि स्वकारणसामग्रीतः प्रदीपादिप्रकाशः समुपजायमानः स्वप्रकाशात्मना नोत्पद्यत इति प्रातीतिकं तत्स्वरूपप्रकाशने प्रकाशान्तरापेक्षाप्रसंगात् । नचायं प्रदीपालोकः कलशादिज्ञानं स्वरूपज्ञानं च चक्षुरिव जनयतः सहकारित्वं नात्मसात्कुरुते येन स्वप्रकाशको न स्यात् । चक्षुषः सहकारित्वं हि प्रदीपादेः प्रकाशत्वं तच्च कलशादाविव स्वात्मन्यपि दीपादेर्विद्यत एवेति सिद्धा स्वात्मनि प्रकाशनक्रिया । तद्वद्विज्ञानस्यार्थप्रकाशनमिव स्वप्रकाशनमप्यविरुद्धमवबुध्यताम् । एतेन 'ज्ञानं न स्वप्रकाशकं, अर्थप्रकाशकत्वात्' इत्यनुमानमपास्तं प्रदीपादिना हेतोरनैकान्तात् । प्रदीपादिः उपचारात् प्रकाशको न परमार्थत इति तेनाव्यभिचारे चक्षुरादेरपि परमार्थतोऽर्थाऽप्रकाशकत्वात् साधनशून्यो दृष्टान्तः ज्ञानस्यैव परमार्थतोऽर्थप्रकाशनोपपत्तेः । ततो 'ज्ञानं स्वप्रकाशकं, अर्थप्रकाशकत्वात्, यत्तु न स्वप्रकाशकं तन्नार्थप्रकाशकं दृष्टं यथा कुड्यादिकं । अर्थप्रकाशकं च ज्ञानं तस्मात्स्वप्रकाशकमिति' केवलव्यतिरेक्यनुमानमविनाभावनियमनिश्चयलक्षणाद्धेतोरुत्पद्यमानं निरवद्यमेवेति बुध्यामहे । चक्षुरादिभिः परमार्थतोऽर्थप्रकाशकत्वानुमानवत् । कुड्यादेरपि स्वाविनाभाविपदार्थान्तरप्रकाशकत्वप्रसिद्धेः अन्यथा तज्जनिता- [illegible] पक्षाभिद्धेन साधनस्यानैकान्तिकतानुपपत्तेः । तस्याप्युपचारादर्थप्रकाशकत्वपरिकल्पनायामनवस्थादिदोषा- [illegible] साधनाव्यतिरेको दृष्टान्त इत्यपि समुत्सारितमनेन । चक्षुर्ज्ञानमात्मानमात्मना जानातीति कर्मकरणाकारद्वयपरिकल्पनायां तयोर्भेदाभेदपक्षे प्रत्यने- [illegible] ज्ञानवैयर्थ्यापत्तेः । [illegible] भेदाभेदपक्षोक्तदोषानुयोगो बाधक इति मतं तदपि न सुन्दरं तथाप्रतीतिसिद्धत्वात् । कथंचिद्भेदः कथंचिदभेदः इति नैकान्तेन [illegible] कान्तात् । कर्मकरणाकारयोर्ज्ञानात् कथंचिद्भेदः । नच कथंचिदित्यव्ययपदमात्र ज्ञानात्मना तदभेदस्य [illegible] पर्यायनिपातः स्याद्वादिना संस्मर्यते । नच कथंचिदिति [illegible] दर्शितत्वात् । तथा च ज्ञानात्मना तद- [illegible] नाभिधानात् । कर्मकरणात्मना च भेद इति कर्मकरण- [illegible] भेद इति ज्ञानभेदाभेदस्य [illegible] कारणेव भेदस्य [illegible] येन च भेदस्तौ ज्ञानात्मना भिन्नौ [illegible] स्थान । नच [illegible] कर्मकरणाभ्यां [illegible] भिन्नकर्तृकरणकं । यथैव हि देवदत्तः [illegible] गुणत्यते । [illegible] पुण्यगुणः [illegible]

[illegible] एव । न हि प्रदीपस्य प्रदीपादिव एव प्रदीपस्याप्रदीपत्वप्रसंगात् घटवत् । [illegible] प्रदीपत्वसिद्धिरिति चेन्न अप्रदीपोऽपि घटादौ तत्समवायप्रसंगात् । [illegible] प्रदीप एव समवायो नान्यत्रेति चेत् ? स प्रत्यासत्तिविशेषोऽत्र कोऽ[illegible] । तत्र प्रदीपात्मन्येव प्रदीपस्य कर्मेति सिद्धमभिन्नकर्तृकं कर्म । तथा च [illegible] ज्ञानात्मनो न स्वात्मनि ज्ञप्तिलक्षणायाः क्रियाया विरोधः सिद्धः, यत स्वव्यवसायात्मकं ज्ञानं न स्यात् ।

[illegible]—यर्थज्ञानं ज्ञानांतरवेद्यं प्रमेयत्वात् घटादिवदित्यनुमानं स्वार्थव्यवसायात्मकत्वप्रतीतेर्बाधितविषयं तथापि [illegible] महेश्वरार्थज्ञानेन हेतोर्व्यभिचारात् । तस्य ज्ञानांतरवेद्यत्वेऽपि प्रमेयत्वात् । यदि पुनरीश्वरार्थज्ञानमपि ज्ञानांतरप्रत्यक्षं-स्वसंवेदनात् इति मतिस्तदा तदप्यर्थज्ञानज्ञानमीश्वरस्य प्रत्यक्षमप्रत्यक्षं वा ? यदि प्रत्यक्षं तदा स्वतो ज्ञानांतराद्वा ? । स्वतश्चेत् प्रथममप्यर्थज्ञानं स्वतः प्रत्यक्षमस्तु किं ज्ञानांतरेण ? । यदि तु ज्ञानांतरप्रत्यक्षं तदर्थज्ञानं तदा तदपि ज्ञानांतरं किमीश्वरस्य प्रत्यक्षमप्रत्यक्षं वेति स एव पर्यनुयोगो ऽनवस्थानं च दुःशक्यं परिहर्तुं । यदि पुनरप्रत्यक्षमेवेश्वरार्थज्ञानज्ञानं तदेश्वरस्य सर्वज्ञत्वविरोधः स्वज्ञानस्याप्रत्यक्षत्वात् । तदप्रत्यक्षत्वे च प्रथमार्थज्ञानमपि न तेन प्रत्यक्षं स्वयमप्रत्यक्षेण ज्ञानांतरेण तस्यार्थज्ञानस्य साक्षात्करणविरोधात् । कथमन्यथा आत्मांतरज्ञानेनापि कस्यचित्साक्षात्करणं न स्यात् । तथा चानीश्वरस्यापि सकलस्य प्राणिनः स्वयमप्रत्यक्षेणापीश्वरज्ञानेन सर्वविषयेण सर्वार्थसाक्षात्करणसंभवेन ततः सर्वस्य सर्वार्थवेदित्वसिद्धेः–ईश्वरानीश्वरविभागाभावो भूयते । यदा चार्थज्ञानमपि प्रथममीश्वरस्याप्रत्यक्षमेव कक्षीक्रियते तदा तेनापि स्वयमप्रत्यक्षेण महेश्वरस्य सकलोऽर्थः प्रत्यक्षं कथं समर्थ्येत तेन सकलप्राणिगणस्य सर्वार्थसाक्षात्करणप्रसंगस्य तदवस्थत्वात् । तदनेन वादिना महेश्वरस्यापि किंचिज्ज्ञत्वं सर्वस्य वा सर्वज्ञत्वमनुज्ञातव्यं न्यायबलायातत्वात् । तथाप्यनुज्ञाने वा नैयायिकस्य नैयायिकत्वविरोधः केनास्य वार्येत । यदि पुनरीश्वरस्य ज्ञानं सकलार्थवदात्मानमपि साक्षात्कुरुते नित्यैकरूपत्वात्, क्रमभाव्यनेकानित्यज्ञानोपगमे महेश्वरस्य 'सकृत्सर्वार्थसाक्षात्करणविधानात् सर्वज्ञत्वाव्यवस्थितेरिति मतं तदा कथमनेनैवानैकांतिको हेतुर्न स्यात् । स्यान्मतिरेषा युष्माकमस्मदादिज्ञानापेक्षयार्थज्ञानस्य ज्ञानांतरवेद्यत्वं प्रमेयत्वेन हेतुना साध्यते ततो नेश्वरज्ञानेन व्यभिचारः तस्यास्मदादिज्ञानाद्विशिष्टत्वात् । न हि विशिष्टे दृष्टधर्ममविशिष्टेऽपि घटयन् प्रेक्षावत्तां लभते इति सापि न परीक्षामहा ज्ञानांतरस्यापि प्रज्ञानेन वेद्यत्वेऽनवस्थानुषंगात् । तस्य ज्ञानांतरेण वेद्यत्वे तेनैव हेतोर्व्यभिचारः । न च तदप्रमेयमेव सर्वस्येति वक्तुं शक्यं प्रतिपत्तुः प्रमाणबलात्तद्व्यवस्थानविरोधात् । सर्वज्ञज्ञानेनापि तस्याप्रमेयत्वे सर्वज्ञस्य सर्वज्ञत्वव्याघातात् । ततोऽस्मदादिज्ञानापेक्षयापि न ज्ञानं ज्ञानांतरप्रत्यक्षं प्रमेयत्वाद्धेतोः साधयितुं शक्यं, ज्ञानस्य स्वार्थव्यवसायात्मनः प्रत्यक्षसिद्धत्वाच्च । प्रत्यक्षबाधितपक्षतया हेतोः कालात्ययापदिष्टत्वप्रसंगाच्च । एतेनार्थज्ञानेन ज्ञानांतरवेद्ये साध्ये कालत्रयत्रिलोकवर्तिपुरुषपरिषत्संप्रयुक्तसकलहेतुनिकरस्य कालात्ययापदिष्टत्वं व्यवस्थितं । तदनेन यदुक्तमेकात्मसमवेतानंतरविज्ञानग्राह्यमर्थज्ञानमिति तत्समुत्सारितं ।

योऽप्याह न स्वार्थव्यवसायात्मकं ज्ञानं परोक्षत्वात् अर्थस्यैव प्रत्यक्षत्वात् । अप्रत्यक्षा नो बुद्धिः प्रत्यक्षोऽर्थः । स हि बहिर्देशसम्बद्धः प्रत्यक्षमनुभूयते । ज्ञाते त्वर्थे अनुमानादवगच्छति बुद्धिमिति शावरभाष्ये श्रवणात् । तथा ज्ञानस्यार्थवत् प्रत्यक्षत्वे कर्मत्वप्रसंगात् ज्ञानांतरस्य करणस्यावश्यं परिकल्पनीयत्वात् । तस्य चाप्रत्यक्षत्वे प्रथमे कोऽपरितोषः ? । प्रत्यक्षत्वे तस्यापि पूर्ववत्कर्मतापत्तेः करणस्यान्यविज्ञानस्य परिकल्पनायामनवस्थाया दुर्निवारत्वात् । तथैकस्य ज्ञानस्य कर्मकरणव्यापारप्रतीतिविरोधाच्च न ज्ञानं प्रत्यक्षं परीक्षकैरनुमन्तव्यमिति सोऽपि न यथार्थमीमांसकतामनुगन्तुमुत्सहते ज्ञानस्याप्रत्यक्षत्वे सर्वथैव [illegible] सर्वस्यार्थस्य प्रत्यक्षत्वप्रसंगात् । तथा च न [illegible]

यत्नादि रूपतया प्रत्यक्षोऽर्थो परिच्छित्तिः प्रादुर्भवति तस्य ज्ञानेन सोऽर्थः प्रतीयते न सर्वथा ज्ञानेनार्थोऽयं प्रत्यक्ष तथैव प्रमातुः स्वार्थे परिच्छित्तिरसंभवात् इति मतमपि स्वगृह्यमाणं मीमांसकानां बहिरर्थपरिच्छित्तेः प्रत्यक्षताप्रत्यक्षताविकल्पानतिक्रमात् । सा हि न तावदप्रत्यक्षा ज्ञानधर्मकत्वात् । कर्मत्वेनाप्रतीतेश्च करणज्ञानवत् । तस्याः कर्मत्वेनाप्रतीतावपि क्रियात्वेन प्रतीतेः । प्रत्यक्षत्वे करणज्ञानस्य कर्मत्वेनाप्रतीयमानस्यापि करणत्वेन प्रतीयमानत्वात् । प्रत्यक्षत्वमस्तु करणत्वेन प्रतीयमानं करणज्ञानं प्रत्यक्षमेव स्यात् । न प्रत्यक्षं कर्मत्वलक्षणमिति चेत् तर्हि पदार्थपरिच्छित्तिरपि क्रियात्वेन प्रतिभासमाना कथं प्रत्यक्षा स्यात् न प्रत्यक्षा कर्मत्वाभावादिति प्रतिपत्तव्यं । यदि पुनरर्थधर्मत्वादर्थपरिच्छित्तेः प्रत्यक्षतेष्यते तदा सार्थप्राकट्यमुच्यते । न चैतदर्थग्रहणविज्ञानस्य प्राकट्याभावे घटामटति अतिप्रसंगात् । न ह्यप्रकटे ऽर्थज्ञाने संतानान्तरवर्तिविज्ञानस्य विषयस्य प्राकट्यं घटते प्रमातुरात्मनः स्वयं प्रकाशमानस्य प्रत्यक्षस्यार्थपरिच्छेदकस्य प्राकट्याद्धि प्राकट्यं परिच्छित्तिलक्षणं संलक्ष्यते । परिच्छित्तेः परिच्छेदफलरूपायाः कर्तृस्थायाः क्रियायाः कर्तृधर्मत्वादुपचारादर्थधर्मत्ववचनात् परिच्छिद्यमानतारूपायाः परिच्छित्तेः कर्मस्थायाः क्रियाया एव परमार्थतोऽर्थधर्मत्वसिद्धेः । करणज्ञानधर्मतानुच्छित्तेर्नेष्यते एव चक्षुषा रूपं पश्यति देवदत्त इत्यत्र चक्षुषः प्राकट्याभावेऽपि अर्थप्राकट्यं सुघटमेव लोकेऽतीन्द्रियस्यापि करणत्वसिद्धेः इति केचित् समभ्यमंसत मीमांसकाः, तेऽप्यंधसर्पबिलप्रवेशन्यायेन स्याद्वादिमतमेवानुप्रविशन्ति, स्याद्वादिभिरपि स्वार्थपरिच्छेदकस्य प्रत्यक्षस्यात्मनः कर्तृसाधनज्ञानशब्देनाभिधानात् । स्वार्थज्ञानपरिणतस्यात्मन एव सर्वस्य ज्ञानत्वोपपत्तेः, स हि जानातीति ज्ञानमिति व्यपदिश्यते । तद्धर्मस्तु परिच्छित्तिः फलज्ञानं कथंचित् प्रमाणादभिन्नमभिधीयते । यत्तु परोक्षमतीन्द्रियतया करणज्ञानं परैरुक्तं तदपि स्याद्वादिभिर्भावेन्द्रियतया करणमुपयोगलक्षणं प्रोच्यते 'लब्ध्युपयोगौ भावेन्द्रियं' इति वचनात् । तत्रार्थग्रहणशक्तिर्लब्धिः । अर्थग्रहणव्यापार उपयोगः इति व्याख्यानात् केवलं तस्य कथंचिदात्मनोऽनर्थान्तरभावादात्मवत्तया प्रत्यक्षत्वोपपत्तेः अप्रत्यक्षतैकान्तो निरस्यते इति प्रातीतिकं परीक्षकैरनुमन्तव्यं । ये तु मन्यन्ते नात्मा प्रत्यक्षः कर्मत्वेनाप्रतीयमानत्वात् करणज्ञानवदिति तेषां फलज्ञानहेतोर्व्यभिचारः कर्मत्वेनाप्रतीयमानस्यापि फलज्ञानस्य प्राभाकरैः प्रत्यक्षत्ववचनात् । तस्य क्रियात्वेन प्रतिभासमानात् प्रत्यक्षत्वे प्रमातुरप्यात्मनः कर्तृत्वेन प्रतिभासमानत्वात् प्रत्यक्षत्वमस्तु । तच्च फलज्ञानं–आत्मनोऽर्थान्तरभूतमनर्थान्तरभूतमुभयं वा ? न तावदर्थान्तरभूतमनर्थान्तरभूतं वा मतान्तरप्रवेशानुषंगात् । नाप्युभय पक्षद्वयनिगदितदूषणानुषक्तेः । कथंचिदनर्थान्तरत्वे तु फलज्ञानादात्मनः कथंचित्प्रत्यक्षत्वमनिवार्यं प्रत्यक्षादभिन्नस्य कथंचिदप्रत्यक्षत्वैकान्तविरोधात् । एतेनाप्रत्यक्ष एवात्मेति प्रभाकरमतमपास्तं । यस्य तु करणज्ञानवत्फलज्ञानमपि परोक्षं पुरुषः प्रत्यक्ष इति मतं तस्यापि पुरुषात्प्रत्यक्षात् कथंचिदभिन्नस्य फलज्ञानस्य करणज्ञानस्य च प्रत्यक्षतापत्तिः कथंचित्कथमपाक्रियते ? ततो न भट्टमतमपि विचारणां प्रांचति इति स्वव्यवसायात्मकं सम्यग्ज्ञानं, अर्थपरिच्छित्तिनिमित्तत्वात् आत्मवदिति व्यवतिष्ठते । नेत्रालोकादिभिर्व्यभिचारः साधनस्येति न मन्तव्यं तेषामुपचारतोऽर्थपरिच्छित्तिनिमित्तत्ववचनात्, परमार्थतः प्रमातुः प्रमाणस्य च तन्निमित्तत्वघटनात् ।

अत्रापरः कापिलमतानुसारी प्राह—न सम्यग्ज्ञानं स्वव्यवसायात्मकं, अचेतनत्वात् घटादिवत् न तथेन नयानित्यत्वात् । तदचेतनं चोत्पत्तिनिमित्तत्वात् विद्युदादिवत् । यत्तु स्वसंवेद्यं तच्चेतनं नित्यमनुत्पत्तिधर्मकं च सिद्धं यथा पुरुषतत्त्वमिति सोऽपि न न्यायवेदी व्यभिचारिसाधनाभिधानात् । उत्पत्तिमत्त्वं हि तावद् नित्यता व्यभिचरति निर्वाणादानस्याप्युत्पत्तिमत्त्वात् । तथैवानित्यत्वमचेतनत्वं व्यभिचरति पुरुषभोगस्य कादाचित्कत्वस्य पुरुषस्यवाचितार्थविषयस्य चेतनत्वेऽप्यनित्यत्वसमर्थनात् । अचेतनत्वं तु सम्यग्ज्ञानस्यानुद्यमेव तस्मात्स्वेतनाद्विवेकप्रख्यातिविरोधात् । चेतनसंसर्गाच्चेतनं ज्ञानमित्यपि वार्तं [illegible] । ज्ञानस्य चेतनसंसर्गो विशिष्ट इति चेत् स कोऽन्यः कथंचित्तादात्म्यात् । तदचेतनत्वमसिद्धं [illegible]

* अचेतनमसिद्धं ।

[illegible] इति तुल्ययोः पृथगपि

इति वचनात् सर्वस्य [illegible] न किंचन प्रमाणमेव । [illegible] प्रा-
[illegible] प्रमाणसंविदितेयाभावे संदेहाभावात् परार्थतुपोगायोगात् ।

[illegible] प्रमाणान्तरनिर्णयेऽपि [illegible] प्रश्नः, तथाहि-मीमांसकाभ्युपगमात्
[illegible] निर्णीतं [illegible] । तदुक्तं—

तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम् ।
अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम् ॥ १ ॥ इति

तथा प्रकृतिमत्कर्तृमतेऽपि नैयायिकाभ्युपगमाभिनिर्णीतं—

प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणं

इति वचनात् । तथार्थक्रियाप्राप्तिनिमित्तत्वमविसंवादित्वलक्षणं सौगताभ्युपगमाभिनिर्णीतमेव प्रमाण-
मविसंवादिज्ञानं अर्थक्रियास्थितिः अविसंवादनं शब्दोऽप्यभिप्रायनिवेदनादिति वचनात् । तदिदानीं चार्वाक-
मतानुसरणेन संशीत परीक्षायुज्यमानं न किंचिदुपालम्भमर्हति इति तदेतदपि न व्यवस्थां प्रतिपद्यते पराभ्यु-
पगमस्य प्रमाणप्रमाणपूर्वकत्वे संशयाप्रवृत्तेः तथाहि यदि परेषामभ्युपगमः प्रमाणपूर्वकः तदा कथं संदेहः ?
प्रमाणार्थस्य निर्णीतत्वात् । निर्णीते संशयविरोधात् । अथाप्रमाणपूर्वकः तथापि न संदेहः प्रवर्तते तस्य
कथंचिदविसंवादित्वंचित् निर्णयपूर्वकत्वात् । तन्निर्णयस्यापि प्रमाणपूर्वकत्वात् । प्रमाणाभावे प्रामाण्यनिश्चयात्
तन्निश्चयनिमित्तस्य च प्रमाणान्तरस्याभ्यस्तविषयत्वे सर्वथा तदनुपपत्तेरित्यलं प्रसंगेन सर्वस्येष्टस्य संसिद्धेः
प्रमाणनिबन्धनात् अन्यथातिप्रसंगसमर्थनादिति । एतेन सर्वथा शून्यं संविदद्वैतं पुरुषाद्वैतं शब्दाद्वैतं
वा समाश्रित्य प्रमाणप्रमेयभावं निराकुर्वाणाः प्रत्याख्याताः तथाश्रितस्य सर्वथा शून्यस्य संविदद्वैतादेर्वा
कथंचिदपि प्रमाणमन्तरेणैव व्यवस्थापनात् । तस्याप्यनिष्टत्वे तद्वादित्वविरोधात् । प्रलापमात्रानुसरणापत्तेः
परीक्षकत्वव्याघातात् इति । तदेवं प्रमाणतत्त्वनिर्णीतौ प्रमेयतत्त्वसिद्धिर्निर्बाधा व्यवतिष्ठत एव ।

ननु चैव प्रमाणमिदमपि किं स्वतः प्रमाणत्वमात्मसात्कुर्वीत परतो वा ? न तावत्स्वतः सर्वत्र सर्वदा
सर्वस्य तद्विप्रतिपत्त्यभावप्रसंगात् । नापि परतः—अनवस्थानुषंगात् परापरप्रमाणान्वेषणात् क्वचिदवस्थितेरयो-
गात् । प्रथमप्रमाणाद्द्वितीयस्य प्रामाण्यसाधने द्वितीयाच्च प्रथमस्य परस्पराश्रयणापत्तेः प्रकारान्तराभावादिति
केचित्तेऽप्यसमीक्षितवचनाः, अभ्यस्ते स्वविषयेऽभ्यस्तविषये प्रमाणस्य स्वतः प्रामाण्यसिद्धेः सकलविप्रतिपत्ती-
नामपि प्रतिपत्तुरभावात् अन्यथा तस्य प्रमेये निस्संशयं प्रवृत्त्ययोगात् । तथानभ्यस्तविषये परतः प्रमाणस्य
प्रामाण्यनिश्चयात् तन्निश्चयनिमित्तस्य च प्रमाणान्तरस्याभ्यस्तविषयत्वे स्वतः प्रमाणत्वसिद्धेः अनवस्थाप-
रस्पराश्रयणयोरनवकाशात् । तस्याप्यनभ्यस्तविषयत्वे परतः प्रमाणादभ्यस्तविषयात् स्वतःसिद्धप्रामाण्यात्
प्रमाणत्वनिश्चयात् सुदूरमपि गत्वा कस्यचिदभ्यस्तविषयस्य प्रमाणस्यावश्यंभावित्वात् अन्यथा प्रमाणतदा-
भासव्यवस्थानुपपत्तेः तदभावव्यवस्थानुपपत्तिवत् । कुतः पुनः प्रतिपत्तुः क्वचिद्विषयेऽभ्यासः क्वचिदन-
भ्यासः स्यात् ? इति चेत् तत्प्रतिबन्धकदृष्टादृष्टविशेषविगमाभ्यां क्वचिदभ्यासानभ्यासौ स्यातां इति ब्रूमहे
परिदृष्टकारणव्यभिचारादृष्टस्य कारणस्य सिद्धेः तत्र कर्म ज्ञानावरणवीर्यान्तरायाख्यं सिद्धं तस्य क्षयोपशमा-
त्तस्य चित् क्वचित्स्य सम्यग्ज्ञान तद्भावाभावे वा ऽनभ्यासज्ञानमिति सुव्यवस्थितं प्रमाणस्य प्रामाण्यं
सुनिश्चितासंभवद्बाधकप्रमाणत्वात्, स्वयमिष्टवस्तुवत् सर्वेष्टसिद्धेस्तन्मात्रनिबन्धनत्वादन्यथा सर्वस्य तत्त्व-
परीक्षायामनधिकारादिति स्थितमेतत्—

प्रामाण्यादिष्टसंसिद्धिरन्यथातिप्रसंगतः ।
प्रामाण्यं तु स्वतःसिद्धमभ्यासात्परतोऽन्यथा ॥ १ ॥ इति

एवं प्रमाणलक्षणं व्यवसायात्मकं सम्यग्ज्ञानं परीक्षितं तत्प्रत्यक्षं परोक्षं चेति संक्षेपाद् द्वितयमेव व्यवतिष्ठते

ततः प्रत्यक्षमनुमानमिति द्वे एव प्रमाणे प्रमेयद्वैविध्यात् । न ह्याभ्यामर्थं परिछिद्य प्रवर्तमानोऽर्थक्रियायां विसंवाद्यत इति प्रमाणसंख्यानियमं सौगताः प्रतिपद्यंते तेषामागमोपमानादीनां प्रमाणभेदानाम- संभव एव तेषां प्रत्यक्षानुमानयोरंतर्भावयितुमशक्तेः ।

स्यान्मतिरेषा भवतां तदर्थस्य द्वैविध्यात् द्वयोरंतर्भावः स्यात् । द्विविधो ह्यर्थः प्रत्यक्षः परोक्षश्च । तत्र प्रत्यक्षविषयः साक्षात्क्रियमाणः प्रत्यक्षः । परोक्षः पुनरसाक्षात्परिच्छिद्यमानोऽनुमेयत्वादनुमानविषयः स हि पदार्थांतरात्साक्षात्क्रियमाणात् प्रतिपद्यते तत्र पदार्थांतरं तेन परोक्षेणार्थेन संबद्धं प्रत्याययितुं समर्थं नासंबद्धं गवादेरश्वादेः प्रतीतिप्रसंगात् । संबद्धं चार्थांतरं लिंगमेव शब्दादि तज्जनितं च ज्ञानमनुमानमेव ततो न परोक्षेऽर्थेऽनुमानादन्यत्प्रमाणमस्ति शब्दोपमानादीनामपि तथानुमानत्वसिद्धेः । अन्यथा ततोऽर्थप्रतिपत्तौ अतिप्रसंगात् इति तदेतदपि न परीक्षाक्षमं प्रत्यक्षस्यापि तथानुमानत्वप्रसंगात् । प्रत्यक्षमपि हि स्वविषये संबद्धं तत्प्रत्यायनसमर्थं । तत्रासंबद्धस्यापि तत्प्रत्यायनसामर्थ्ये सर्वप्रत्यक्षं सर्वस्य नुः सर्वार्थप्रत्यायनसमर्थं स्यादिति कथमतिप्रसंगो न स्यात् ? । यदि पुनः संबंधाधीनत्वाविशेषेऽपि प्रत्यक्षपरोक्षार्थप्रतिपत्तेः साक्षादसाक्षात्प्रतिभासभेदात् भेदोऽभ्युपगम्यते प्रमाणांतरत्वेन तदेंद्रियस्वसंवेदनमानसयोगिप्रत्यक्षाणामपि प्रमाणांतरत्वानुषंगः प्रतिभासभेदाविशेषात् । न हि यादृशः प्रतिभासो योगिप्रत्यक्षस्य विगलितमलस्य तादृशोऽक्षज्ञानस्यास्ति स्वसंवेदनस्य मनोविज्ञानस्य वा ? यथाभूतश्च स्वसंवेदनप्रत्यक्षस्यांतर्मुखो विशदः न तथाभूतोऽक्षज्ञानस्य । यादृशश्चाक्षज्ञानस्य बहिर्मुखः स्फुटः प्रतिभासो न तादृशो मनोविज्ञानस्येति कथं प्रमाणांतरता न भवेत् ? अथ प्रतिभासविशेषेऽपि सचतुर्विधमपि प्रत्यक्षमेव न प्रमाणांतरं माभूत् । यदि प्रतिभासभेदेऽपि स्वविषयसंबद्धत्वाविशेषात् प्रमाणांतरमुररीक्रियते तदा शाब्दोपमानादीनां प्रमाणांतरं तर्हि प्रत्यक्षानुमानयोः प्रतिभासभेदेऽपि प्रत्यक्षानुमानयोः सामग्रीभेदात् प्रमाणांतरत्वमुररीक्रियते । यथैव हि अक्षादिसामग्रीतः प्रत्यक्षं, लिंगसामग्रीतोऽनुमानं प्रभवतीति तयोः सामग्रीभेदः । तथागमः शब्दसामग्रीतः प्रभवति । उपमानं सादृश्यसामग्रीतः । अर्थापत्तिश्च परोक्षार्थाविनाभूतार्थसामग्रीतः । प्रतिषेध्याधारवस्तुग्रहणप्रतिषेध्यस्मरणसामग्रीतोऽभावप्रमाणमिति प्रसिद्धः शाब्दादीनामपि सामग्रीभेदः । तत एवाक्षज्ञानादिप्रत्यक्षचतुष्टयस्य लिंगशब्दादिसामग्रीभेदाभावात् प्रमाणांतरत्वाप्रसिद्धिः नहि तस्यार्थभेदोऽस्ति साक्षात्क्रियमाणस्यार्थस्याविशेषात् नानुमानेऽन्तर्भावः संभवति । तथा साध्यसाधनसंबंधव्याप्तिप्रतिपत्तौ न प्रत्यक्षं समर्थं । यावान् कश्चिद्धूमः स सर्वः कालान्तरे देशान्तरे च पावकजन्मा, अन्यजन्मा वा न भवतीति इयतो व्यापारान् कर्तुमसमर्थत्वात् । सन्निहितार्थमात्रग्राहित्वात् । देशयोगिन प्रत्यक्षं [illegible] योगिप्रत्यक्षं तत्र समर्थमिति चेत् न देशकालयोगिप्रत्यक्षस्यानतिक्रमात् । न हि योगिप्रत्यक्षेण [illegible] इति चेत् [illegible] प्रतिपत्तौ समर्थमपि युक्तं तत्रानुमानवैयर्थ्यात् । अथ सकलयोगिप्रत्यक्षेण व्याप्तिप्रतिपत्तावपि [illegible] अशेषेषु कस्यचिदनुमानं । अथ सकलयोगिप्रत्यक्षेण व्याप्तिप्रतिपत्तावपि न तस्य स्वार्थानुमानपूर्वकत्वात् । स्वार्थानुमानाभावे च [illegible] परार्थमनुमानमिति चेत् ! न तस्य स्वार्थानुमानपूर्वकत्वात् [illegible] कथं परार्थानुमानं नाम । यदि पुनः सकलयोगिनः परानुग्रहाय प्रवृत्तत्वात् परार्थानुमानसिद्धिः [illegible] परार्थानुमानमंतरेण कर्तुमशक्तेः परार्थानुमानसिद्धिः [illegible] स्वार्थानुमानसिद्धिरिति [illegible] परार्थानुमानेन पर प्रतिपादयन् [illegible] सामान्यं निश्चित्य परार्थानुमानेन गृहीतां व्याप्तिं [illegible] गृहीतव्याप्तिकं तदा पुनरनेन गृहीता व्याप्तिः [illegible]

[illegible]

संवेदनसिद्धिः तद्वेदनान्तरस्यापि स्वविषयसंबंधितवेदकत्वात् तस्य ज्ञानान्तरेण वेदनादनवस्था । प्रमा-णान्तरासिद्धौ च स एव पर्यनुयोगः परापरप्रमाणान्तरपरिकल्पनानुषंगात् केषांचित् प्रमाणसंख्याव्याघातेति केचित् तेषामपि प्रत्यक्षं स्वविषयं प्रतिबोधयत् न संबंधं कदाचनापि सिद्धयति तस्य तद्विषयत्वात् । प्रमाणान्तरतस्सिद्धौ तथापि प्रकृतपर्यनुयोगानिवृत्तेः कथमनवस्था न स्यात् यतः प्रत्यक्षं प्रमाणमनुमान-मीयमिति प्रतिपद्यामहे ।

स्यान्मतिरेषा प्रत्यक्षं स्वविषयसंबंधावबोधनिबंधनं प्रमाणमनुमानाद्युत्पत्तौ तस्य स्वविषये स्वयोग्यता-वशादेव प्रमाणत्वव्यवस्थितेः अन्यथा क्वचिदपूर्वार्थग्राहिणः प्रत्यक्षस्याप्रमाणत्वानुषंगात् इति सापि न साधीयसी तर्कस्यापि स्वयोग्यताविशेषादेव स्वविषयव्यवस्थापनसामर्थ्यादिव स्वविषयप्रत्यक्षनिबंधनेऽपि व्यव-स्थानात् । योग्यताविशेषः पुनः प्रत्यक्षस्येव स्वविषयज्ञानावरणवीर्यान्तरायक्षयोपशमविशेष एवोहस्यापि प्रति-पत्तव्यः सकलबाधकवैधुर्यात् । यथा च प्रत्यक्षस्योत्पत्तौ मनोऽक्षादिसामग्री योग्यतायाः सहकारिणी बहि-रंगनिमित्तत्वात् तथोहस्यापि समुद्भूतौ भूयः प्रत्यक्षानुपलंभसामग्रीबहिरंगनिमित्तमूलानुपलम्भेन तदन्वय-व्यतिरेकानुविधायित्वादूहस्येति सर्वनिरवद्यसिद्धं चानुमानप्रमाणान्यथानुपपत्त्या तर्कस्य प्रमाणत्वं–प्रत्यभि-ज्ञानं प्रमाणं तर्कप्रमाणत्वान्यथानुपपत्तेः न ह्यप्रत्यभिज्ञाने विषये तर्कः प्रवर्तते अतिप्रसंगात् । न च गृहीत-ग्रहणात्प्रत्यभिज्ञानस्याप्रमाणत्वं शकनीयं तद्विषयस्यासर्वथागृहीतपूर्वापरपर्यायव्याप्येकद्रव्यस्य स्मरणप्रत्य-क्षागोचरत्वात् अपूर्वार्थग्राहित्वसिद्धेः । नचेदं प्रत्यक्षेऽन्तर्भवति प्रत्यक्षस्य वर्तमानपर्यायविषयत्वात् । नाप्यनुमाने लिंगानपेक्षत्वात् । न शाब्दे शब्दनिरपेक्षत्वात् । नोपमाने सादृश्यमन्तरेणापि भावात् । नार्था-पत्तौ प्रत्यक्षादिप्रमाणषट्कविज्ञातार्थप्रतिपत्तिमन्तरेणापि प्रादुर्भावात् । नाभावे निषेध्याधारवस्तुग्रहणेन निषेध्यस्मरणेन च विनैवोत्पादादिति सर्वेषामेकद्वित्रिचतुःपंचषट्प्रमाणसंख्यानियमं विघटयति । एतेन स्मृतिः प्रमाणान्तरमुक्तं तस्याश्च प्रत्यक्षादिष्वन्तर्भावयितुमशक्तेः । न चाप्रमाणमेव संवादकत्वात् कथं-चिदपूर्वार्थग्राहित्वात् बाधावर्जितत्वाच्चानुमानवदिति । येषां तु स्मरणमप्रमाणं तेषां पूर्वप्रतिपन्नस्य सा-ध्यसाधनसंबंधस्य वाच्यवाचकसंबंधस्य च स्मरणसामर्थ्यादव्यवस्थितेः कुतोऽनुमानं शाब्दं वा प्रमाणं सिद्धयेत् । तदप्रसिद्धौ च न संवादकत्वासंवादकत्वाभ्यां प्रत्यक्षतदाभासव्यवस्थितिरिति सकलप्रमाण-विलोपापत्तिः ततः प्रमाणव्यवस्थामभ्यनुजानता स्मृतिरपि प्रमाणमितव्या इति न परेषां संख्या-नियमः सिद्धयेत् । स्याद्वादिनां तु संक्षेपात्प्रत्यक्षपरोक्षविकल्पात् प्रमाणद्वयं सिद्धमेव तत्र सकलप्रमाण-भेदानां संग्रहादिति सूक्तं ।

किं पुनः प्रत्यक्षमित्युच्यते विशदज्ञानात्मकं प्रत्यक्षं प्रत्यक्षत्वात् यत्तु न विशदज्ञानात्मकं तन्न प्रत्यक्षं यथानुमानादिज्ञानं प्रत्यक्षं च विवादाध्यासितं तस्माद्विशदज्ञानात्मकं । न तावदत्राप्रसिद्धो धर्मी प्रत्यक्षधर्मिणि केषांचित् प्रत्यक्षवादिनामविप्रतिपत्तेः । शून्यसंवेदनाद्वैतवादिनामपि स्वरूपप्रत्यक्षस्य प्रत्यक्षत्वधर्मसिद्धेः । प्रत्यक्षत्वस्य हेतोरसिद्धतापि अनेन समुत्सारिता प्रत्यक्षधर्मिसिद्धिः प्रत्यक्षत्वस्य तद्धर्मस्य व्यपदिश्यत्वात् । प्रतिज्ञार्थैकदेशासिद्धत्वं साधनस्य स्यादिति चेत् का पुनः प्रतिज्ञा तदेकदेशो वा यस्या-सिद्धत्वं साधनं । धर्मधर्मिसमुदायः प्रतिज्ञा तदेकदेशो धर्मी हेतुर्यथा नश्वरः शब्दः शब्दत्वादिति तथा साध्यधर्मः प्रतिज्ञैकदेशो यथा नश्वरः शब्दो नश्वरत्वात् सोऽयं द्विविधः प्रतिज्ञार्थैकदेशासिद्धो हेतुः स्यादिति चेत् ? न धर्मिणो हेतुत्वे कस्यचिदसिद्धत्वानुपपत्तेः । यथैव हि प्रत्यक्षप्रयोगकाले वादिप्रतिवादि-प्रसिद्धो धर्मी तथा तस्य हेतुत्वप्रयोगेऽप्यविशेषात् । साध्यधर्मस्तु हेतुत्वेनोपादीयमानो न प्रतिज्ञार्थैक-देशासिद्धो धर्मिणोऽप्यसिद्धिप्रसंगात् । किं तर्हि ? स्वरूपेण वासिद्ध इति न प्रतिज्ञार्थैकदेशासिद्धो नाम हेत्वाभासः संभवतीति कथं प्रकृतहेतोः प्रतिज्ञार्थैकदेशासिद्धत्वं समुद्भावयन् भाविकानुमानस्वभावः ? । धर्मिणो हेतोऽनन्वयत्वमिति चेत् न विशेषं धर्मिणं कृत्वा सामान्यं हेतुं ब्रुवतां दोषासंभवात् । प्रत्यक्ष-

१ ई व्यक्तिप्रत्यक्षव्यापकस्य हेतुः स वचनान्वय स्यात् सकलप्रत्यक्षाविशेषस्य व्यापित्वात् । दृष्टान्ते तस्यैव इति चेत् न सर्वे भवाः प्रसिद्धाः स्यात् इत्यत्रापि हेतोरनन्वयत्वप्रसक्तेः ।

मुख्यमपि त्रेधा । तत्र अवधिज्ञानं रूपिद्रव्यविषयं [illegible] । तदपि भावात् [illegible] [illegible] देशावधिज्ञानमेव । मुख्यमपि तु [illegible] गुणनिमित्त [illegible] । संयमगुण- [illegible] । संयमगुणनिमित्तं [illegible] [illegible] मुख्यप्रत्यक्षं भावात् । [illegible] । तथा मनःपर्ययज्ञानं [illegible] द्वेधा ऋजुमतिविपुलमतिभेदात् । तत्र ऋजुमति- मनःपर्ययज्ञानं [illegible] । विपुलमतिमनः- [illegible] निर्देशनिर्देशविशिष्टगुणमयगुणात् [illegible] प्रत्यक्षं [illegible] स्फुटतरमवैशद्यसद्भावात् । तथाविधमनःपर्ययज्ञानावरण [illegible] प्रादुर्भूतत्वात् । सकलमतीन्द्रिय- प्रत्यक्षं केवलज्ञानं सकलगोचरत्वात्, सकलज्ञानदर्शनावरणवीर्यान्तरायक्षयात् समुद्भूतत्वात् सकलवैशद्य- [illegible] सकलविषयत्वाच । तस्मात् कश्चित् पुरुषविशेषो भगवानेव मुनिर्गौतमबुद्धादिनिराकरणात् । तथा सकलज्ञानेन सह अनुभयवादिसिद्धेः । नन्वतीन्द्रियसाधनं सर्वातीन्द्रियप्रत्यक्षं पुरुषस्य प्रत्यक्षादिप्रमा- णैरसम्भवात् सकलदेशकालपुरुषान्तरापेक्षयापि सिद्धत्वात् सुखादिसंवेदनस्यापि तथैव प्रमाणगोचरत्वे । अन्यथा कस्यचिदीदृशविशेषासम्भवात् । इति संक्षेपतो विशदं ज्ञानं सांव्यवहारिकं मुख्यं च प्रत्यक्षं विस्त- रतस्तु तत्त्वार्थालंकारे परीक्षितमिह द्रष्टव्यं ।

सम्प्रति परोक्षमुच्यते—परोक्षमविशदज्ञानात्मकं परोक्षत्वात्, यन्नाविशदज्ञानात्मकं तन्न परोक्षं यथा- तीन्द्रियप्रत्यक्षं परोक्षं च विवादापन्नं ज्ञानं तस्मादविशदज्ञानात्मकं । न चास्य परोक्षत्वमसिद्धं—अक्षेभ्यः परावृत्तत्वात् । अक्षोपाधानुपात्तपरप्रत्ययापेक्षं परोक्षमिति तत्त्वार्थवार्तिककारैरभिधानात् । उपात्तो हि प्रत्ययः कर्मवशादात्मना करणत्वेन गृहीतः स्पर्शनादिः । ततोऽन्यः पुनर्बहिरंगः सहकारी प्रत्ययोऽनु- पात्तः शब्दलिंगादिः तदपेक्षं ज्ञानं परोक्षमित्यभिधीयते । तदपि संक्षेपतो द्वेधा मतिज्ञानं श्रुतज्ञानं चेति आद्ये परोक्षं इति वचनात् । मतिश्रुतावधिमनःपर्ययकेवलानि हि ज्ञानं । तत्राद्ये मतिश्रुते सूत्रपाठापे- क्षया इष्येते ते च परापेक्षतया परोक्षे प्रतिपादिते । परानपेक्षाण्यवधिमनःपर्ययकेवलानि यथा प्रत्यक्षा- णीति । तत्रावग्रहादिधारणापर्यंतं मतिज्ञानमपि देशतो वैशद्यसद्भावात्सांव्यवहारिकं, इन्द्रियप्रत्यक्षमतीन्द्रियप्र- त्यक्षं चाभिधीयमानं न विरुध्यते यतः शेषस्य मतिज्ञानस्य स्मृतिसंज्ञाचिंताभिनिबोधलक्षणस्य श्रुतस्य च परोक्षत्वव्यवस्थितेः । तदुक्तमकलंकदेवैः—

प्रत्यक्षं विशदं ज्ञानं मुख्यसंव्यवहारतः ।
परोक्षं शेषविज्ञानं प्रमाणमिति संग्रहः ॥ १ ॥

तत्र तदित्याकारानुभूतार्थविषया स्मृतिः अनिन्द्रियप्रत्यक्षं विशदत्वात् सुखादिसंवेदनवदित्येके तद- सत् । तस्यास्तत्र वैशद्यासिद्धेः पुनर्भावयतो वैशद्यप्रतीतेर्भावनाज्ञानत्वात् तस्य च भ्रांतत्वात् स्वप्नज्ञा- नवत् । पूर्वानुभूतेऽप्यतीतेऽर्थे वैशद्यासम्भवात् स्मृतिः परोक्षमेव श्रुतानुमितस्मृतिवत् इत्यपरे तदित्युल्लेखस्य सर्वस्यां स्मृतौ सद्भावात् । सा च प्रमाणमर्थसंवादकत्वात् प्रत्यक्षवत्, यत्र तु विसंवादः सा स्मृत्याभासा प्रत्यक्षाभासवत् । तथा तदेवेदमित्याकारं ज्ञानं संज्ञा प्रत्यभिज्ञा तादृशमेवेदमित्याकारं वा विज्ञानं संज्ञोच्यते । तस्या एकत्वसादृश्यविषयत्वाद्वैविध्योपपत्तेः । द्विविधं हि प्रत्यभिज्ञानं तदेवेदमित्येकत्वनि- बंधनं । तादृशमेवेदमिति सादृश्यनिबंधनं च । ननु च तदेवेत्यतीतप्रतिभासस्य स्मरणरूपत्वात् इद- मिति संवेदनस्य प्रत्यक्षरूपत्वात् संवेदनद्वितयमेवैतत् तादृशमेवेदमिति स्मरणप्रत्यक्षसंवेदनद्वितयवत् ततो नैकं ज्ञानं प्रत्यभिज्ञाख्यं प्रतिपद्यमानं सम्भवतीति काश्चित् सोऽपि न संवेदनविशेषविपश्चित् । न हि स्मरणप्रत्यक्षजन्यस्य पूर्वोत्तरविवर्तवर्त्येकद्रव्यविषयस्य प्रत्यभिज्ञानस्यैकस्य सुप्रतीतत्वात् । नापीदमिति संवेदनं तस्य व- तदिति स्मरणं तथाविधद्रव्यव्यवसायात्मकं तस्यातीतविवर्तमात्रगोचरत्वात् । नापीदमिति संवेदनं तस्य व- र्तमानविवर्तमात्रविषयत्वात् । ताभ्यामुपजन्यं तु सकलज्ञानं तदनवादपुरस्सरं द्रव्यं प्रत्यव——। तस्य

गुणप्रत्ययं चेति । तत्र भवप्रत्ययं प्रतिनियतदेवभवनारकभवप्रत्ययनिमित्तत्वात् । तद्भावे भावात् तदभावेऽभावात् तत्तु देशावधिज्ञानमेव । गुणप्रत्ययं तु सम्यग्दर्शनगुणनिमित्तमवगन्तव्यमपरहेतो । संयमासंयमगुणहेतुकं देशावधिज्ञानं । संयमगुणनिबन्धनं सर्वावधि । सर्वावधिपरमावधी चारित्रस्य गुणप्रत्ययस्य भावे भावात् । तदभावे चाभावात् । तथा मनःपर्ययज्ञानं विकलमतीन्द्रियप्रत्यक्षं द्वेधा ऋजुमतिविपुलमतिविकल्पात् । तत्रर्जुमतिमनःपर्ययज्ञानं निर्वर्तितप्रगुणवाक्कायमनस्कृतार्थस्य परमनोगतस्य परिच्छेदकत्वात्त्रिविधं । विपुलमतिमनःपर्ययज्ञानं तु निर्वर्तितानिर्वर्तितप्रगुणाप्रगुणवाक्कायमनस्कृतार्थस्य परमनसि स्थितस्य स्फुटतरमवबोधकत्वात् षट्प्रकारं, तथाविधमनःपर्ययज्ञानावरणवीर्यान्तरायक्षयोपशमविशेषवशात् प्रादुर्भूतत्वात् । सकलमतीन्द्रियप्रत्यक्षं केवलज्ञानं सकलमोहक्षयात् सकलज्ञानदर्शनावरणवीर्यान्तरायक्षयाच्च समुद्भूतत्वात् सकलवेद्यसद्भावात् सकलविषयत्वाच्च । तद्वान् कश्चित्पुरुषविशेषो भवत्येव सुनिर्णीतासम्भवद्बाधकप्रमाणत्वात् । तथा स्वसंवेदनेन सुखानुभवनादिप्रसिद्धः । न चायमसिद्धं साधनं सर्वातीन्द्रियप्रत्यक्षवतः पुरुषस्य प्रत्यक्षादिप्रमाणैर्बाधकप्रमाणस्य सकलदेशकालपुरुषपरिषदपेक्षयापि सिद्धत्वात् सुखादिसंवेदनस्यापि तथैव प्रमाणतोपपत्तेः । अन्यथा कस्यचिदिष्टसिद्धेरसंभवात् । इति संक्षेपतो विशदं ज्ञानं सांव्यवहारिकं मुख्यं च प्ररूपितं विस्तरतस्तु तत्त्वार्थालंकारे परीक्षितमिह द्रष्टव्यं ।

संप्रति परोक्षमुच्यते—परोक्षमविशदज्ञानात्मकं परोक्षत्वात् यन्नाविशदज्ञानात्मकं तन्न परोक्षं यथातीन्द्रियप्रत्यक्षं परोक्षं च विवादाध्यासितं ज्ञानं तस्मादविशदज्ञानात्मकं । न चास्य परोक्षत्वमसिद्धं—अक्षेभ्यः परावृत्तत्वात् । **उपात्तानुपात्तपरप्रत्ययापेक्षं परोक्षमिति** तत्त्वार्थवार्तिककारैरभिधानात् । उपात्तो हि प्रत्ययः कर्मवशादात्मना करणत्वेन गृहीतः स्पर्शनादिः । ततोऽन्यः पुनर्बहिरंगः सहकारी प्रत्ययोऽनुपात्तः शब्दलिङ्गादिः तदपेक्षं ज्ञानं परोक्षमित्यभिधीयते । तदपि संक्षेपतो द्वेधा मतिज्ञानं श्रुतज्ञानं चेति **आद्ये परोक्षं** इति वचनात् । मतिश्रुतावधिमनःपर्ययकेवलानि हि ज्ञानं । तत्राद्ये मतिश्रुते सूत्रपाठापेक्षया उच्येते ते च परापेक्षतया परोक्षे प्रतिपादिते । परानपेक्षाण्यवधिमनःपर्ययकेवलानि यथा प्रत्यक्षाणीति । तत्रावग्रहादिधारणापर्यंतं मतिज्ञानमपि देशतो वैशद्यसद्भावात्सांव्यवहारिकं, इंद्रियप्रत्यक्षमनींद्रियप्रत्यक्षं चाभिधीयमानं न विरुध्यते ततः शेषस्य मतिज्ञानस्य स्मृतिसंज्ञाचिंताभिनिबोधलक्षणस्य श्रुतस्य च परोक्षत्वव्यवस्थितिः । तदुक्तमकलंकदेवैः—

प्रत्यक्षं विशदं ज्ञानं मुख्यसंव्यवहारतः ।
परोक्षं शेषविज्ञानं प्रमाणमिति संग्रहः ॥ १ ॥

ऽन्यदेव प्रत्यभिज्ञानमेकत्वविषयं तदपह्नवे क्वचिदेकान्वयाव्यवस्थानात् संतानैकत्वसिद्धिरपि न स्यात्। नचै तद्गृहीतग्रहणादप्रमाणमिति शंकनीयं तस्य कथंचिदपूर्वार्थत्वात्। न हि तद्विषयभूतमेकं द्रव्यं स्मृतिप्रत्यक्षग्राह्यं येन तत्र प्रवर्तमानं प्रत्यभिज्ञानं गृहीतग्राहि मन्येत तद्गृहीतातीतवर्तमानविवर्ततादात्म्यात्। द्रव्यस्य कथंचिदपूर्वार्थत्वेऽपि प्रत्यभिज्ञानस्य तद्विषयस्य नाप्रमाणत्वं लैंगिकादेरप्यप्रमाणत्वप्रसंगात् तस्यापि सर्वथैवापूर्वार्थत्वासिद्धेः। संबंधग्राहिविज्ञानविषयात् साध्यादिसामान्यात् कथंचिदभिन्नस्यानुमेयस्य देशकालविशिष्टस्य तद्विषयत्वात् कथंचिदपूर्वार्थत्वासिद्धेः बाधकप्रमाणान्न प्रमाणं प्रत्यभिज्ञानमिति चायुक्तं तद्बाधकस्यासंभवात्। नहि प्रत्यक्षं तद्बाधकं तस्य तद्विषये प्रवृत्त्यसंभवात्। साधकत्ववद्बाधकत्वविरोधात्। यद्धि यत्र विषये न प्रवर्तते न तत्तस्य साधकं बाधकं वा यथा रूपज्ञानस्य रसज्ञानं न प्रवर्तते च प्रत्यभिज्ञानस्य विषये प्रत्यक्षं तस्मान्न तद्बाधकं। प्रत्यक्षं हि न प्रत्यभिज्ञानविषये पूर्वदृष्टदृश्यमानपर्यायव्यापिनि द्रव्ये प्रवर्तते तस्य दृश्यमानपर्यायविषयत्वात् इति नासिद्धं साधनं। एतेनानुमानं प्रत्यभिज्ञानस्य बाधकं प्रत्युक्तं तस्यापि प्रत्यभिज्ञानविषये प्रवृत्त्ययोगात्, क्वचिदनुमेयमात्रे प्रवृत्तिसिद्धेः। तस्य तद्विषये प्रवृत्तौ वा सर्वथा बाधकत्वविरोधात्। ततः प्रत्यभिज्ञानं स्वविषये द्रव्ये प्रमाणं सकलबाधारहितत्वात् प्रत्यक्षवत् स्मृतिवत्। एतेन सादृश्यनिबंधनं प्रत्यभिज्ञानं प्रमाणमावेदितं बोद्धव्यं तस्यापि स्वविषये बाधकरहितत्वाविशेषात्। यथैव हि प्रत्यक्षं स्वविषये साक्षात्क्रियमाणे स्मरणं च स्मर्यमाणेऽर्थे बाधाविधुरं तथा प्रत्यभिज्ञानमेकत्र द्रव्ये सादृश्ये च स्वविषये न संभवद्बाधकमिति कथमप्रमाणमनुमन्येमहि। यत्पुनः स्वविषये बाध्यमानं तत्प्रत्यभिज्ञानाभासं यथा प्रत्यक्षाभासं स्मरणाभासं वा न च तस्याप्रमाणत्वे सर्वथा प्रमाणत्वं युक्तं प्रत्यक्षस्याप्यप्रमाणत्वप्रसंगात्। तस्माद्यथा शुक्ले शंखे पीताभासं प्रत्यक्षं तत्रैव शुक्लाभासेन प्रत्यक्षांतरेण बाध्यमानत्वात् अप्रमाणं न पुनः पीते कनकादौ पीताभासं प्रत्यक्षं। तथा तस्मिन्नेव स्वपुत्रादौ तादृशोऽयमिति प्रत्यभिज्ञानं सादृश्यनिबंधः स एवायमित्येकत्वनिबंधनेन प्रत्यभिज्ञानेन बाध्यमानमप्रमाणं सिद्धं न पुनः सादृश्य एव प्रवर्तमानं स्वपुत्रादिना सादृश्येऽन्यपुत्रादौ तादृशोऽयमिति प्रत्यभिज्ञानं तस्याबाध्यत्वेन प्रमाणत्वात्। एवं पुनर्जातनखकेशादिरिति सादृश्यपरामर्शिप्रत्यभिज्ञानं तत्र तस्याबाध्यमानतया प्रमाणत्वसिद्धेः। तथैव पूर्वानुभूते हि हिरण्यादौ प्रदेशविशेषविशिष्टे स्मरणं विपरीतदेशतया तत्स्मरणस्य बाधकमिति न तत्र प्रमाणं। यथानुभूतप्रदेशे तु तथैव स्मरणं प्रमाणमिति बोद्धव्यं। तत इदमभिधीयते यतो यतोऽर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां न विसंवाद्यते तत्तत्प्रमाणं यथा प्रत्यक्षमनुमानं वा। स्मरणात् प्रत्यभिज्ञानाच्चार्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां न विसंवाद्यते च तस्मात्प्रमाणं स्मरणं प्रत्यभिज्ञानं चेति। तथा तर्कः प्रमाणं संवादित्वात्। अनुमानवत्। साध्यसाधनसंबंधव्याप्तिकरोहा विशदस्य भावनाज्ञानरूपात्। यावान् कश्चिद्धूमः स सर्वः पावकजन्मैव अपावकजन्मा वा न भवतीति सकलदेशकालव्याप्त्या साध्यसाधनसंबंधोहापोहलक्षणो हि तर्कः प्रमाणविषयः तस्य कथंचिदपूर्वार्थत्वात्। प्रत्यक्षानुपलम्भगृहीतप्रतिनियतदेशकालाव्याप्ता [illegible] गृहीतग्रहणात्मकत्वात् बाधकवर्जितत्वाच्च। नहि तर्कस्य प्रत्यक्षं बाधकं तद्विषये तस्याप्रवृत्तेः अनुमानवत् [illegible] सर्वथा तद्बाधकत्वविरोधात् [illegible]। यच्च तु [illegible] स तर्कप्रमाणं न प्रमाणमिति [illegible] सिद्धिः स्मरणप्रत्यभिज्ञानाभावात्। प्रत्यक्षानुमानवत्। तथा प्रमाणं तर्कस्तु [illegible] प्रवर्तमानस्यार्थक्रियायां विसंवादाभावात् प्रत्यक्षानुमानवदिति [illegible]। [illegible] अविसंवादकत्वात् अनुमानवत्। किं पुनरनुमानं नाम ?

साधनात्साध्यविज्ञानमनुमानं।

संभवात् त्रैरूप्यं तल्लक्षणं सकलमेव । तदुक्तं—

हेतोस्त्रिष्वपि रूपेषु निर्णयस्तेन वर्णितः ।
असिद्धविपरीतार्थव्यभिचारिविपक्षतः इति ॥ १ ॥

तदप्यपरीक्षिताभिधानं सौगतस्य हेतोरन्यथानुपपत्तिनियमनिश्चयादेव दोषत्रयपरिहारसिद्धेः ।
सिद्धस्यान्यथानुपपत्तिनियमनिश्चयासंभवात् । अनैकांतिकविपरीतार्थवत् तस्य तथोपपत्तिनियम-
रूपत्वात् । तस्य चासिद्धव्यभिचारिणि विरुद्धे च हेतावसंभावनीयत्वात् । रूपत्रयस्याविना-
नियमप्रपंचत्वात् साधनलक्षणत्वे तत एव रूपप्रपंचकस्य साधनलक्षणत्वमस्तु । पक्षव्यापकत्वान्व-
तिरेकाबाधितविषयत्वासत्प्रतिपक्षरूपाणि हि पंचाप्यविनाभावनियमप्रपंच एव बाधितविषयस्य
तिपक्षितस्य चाविनाभावनियमानिश्चयात् पक्षाव्यापकानन्वयाव्यतिरेकवत् । न पक्षधर्मत्वे सत्येव
धनस्य सिद्धत्वं येनासिद्धविवेकतस्तत्तस्य लक्षणं, अपक्षधर्मस्यापि सिद्धत्वसमर्थनात् । नापि
सत्त्वे एव विपरीतार्थविवेकः सर्वानेकांतात्मकत्वसाधने सत्त्वादेः सपक्षे सत्त्वाभावेऽपि विरुद्धत्व-
वात् परस्य सर्वानित्यत्वसाधनवत् । नच व्यतिरेकमात्रे सत्यपि व्यभिचारिविवेके श्यामत्वे स
तत्पुत्रत्वादेर्व्यभिचारसाधनात् व्यतिरेकविशेषस्तु तदेवान्यथानुपपन्नत्वमिति न त्रीणि रूपाण्य-
भावनियमप्रपंचः तेषु सत्सु हेतोरन्यथानुपपत्तिदर्शनात् । तेषां तत्प्रपंचत्वे कालाकाशादीनामपि त
पंचत्वप्रसक्तिस्तेष्वपि सत्सु तद्दर्शनात् । तेषां सर्वसाधरणत्वान्न हेतुरूपत्वमित्यपि पक्षधर्मत्वादिषु स
तेषामपि साधारणत्वाद्धेत्वाभासेष्वपि भावात् । ततोऽसाधारणं लक्षणमाचक्षाणैरन्यथानुपपन्नत्वमेव ति
हेतुलक्षणं पक्षीकर्तव्यं । तथोक्तं—

अन्यथानुपपन्नत्वं यत्र तत्र त्रयेण किं
नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किं ॥ १ ॥ इति

एतेन पंचरूपाणि हेतोरविनाभावनियमप्रपंच एव इत्येतदपास्तं सत्यप्यबाधितविषयत्वे सत्प्रति-
चाविनाभावनियमानवलोकात् । पक्षव्यापकत्वान्वयव्यतिरेकवत् । स श्यामस्तत्पुत्रत्वादितरतत्पुत्र-
इत्यत्र तत्पुत्रत्वस्य हेतोर्विषये श्यामत्वे बाधकस्य प्रत्यक्षादेरभावात् अबाधितविषयत्वसिद्धावपि अविना-
भावनियमासत्त्वात् अश्यामेन तत्पुत्रेण व्यभिचारात् । तथा तस्य श्यामत्वसाधनानुमानस्य प्रतिपक्षस्याभा-
स्वात् असत्प्रतिपक्षत्वे सत्यपि व्यभिचारात्साधनस्य तदभावः प्रतिपत्तव्यः । तदत्रैव वक्तव्यं—

अन्यथानुपपन्नत्वं रूपैः किं पंचभिः कृत
नान्यथानुपपन्नत्वं रूपैः किं पंचभिः कृतं ॥ १ ॥ इति

तदेवमन्यथानुपपत्तिनियमनिश्चय एवैकं साधनस्य लक्षणं प्रधानं तस्मिन्सति त्रिलक्षणस्य पंचल-
क्षणस्य प्रयोगो निवार्यते एवेति प्रयोगपारिपाट्याः प्रतिपाद्यानुरोधतः परानुग्रहप्रवृत्तैरभ्युपगमात् । तथा चा-
भ्यधायि कुमारनंदिभट्टारकैः—

अन्यथानुपपत्त्येकलक्षणं लिंगमुच्यते
प्रयोगपरिपाटी तु प्रतिपाद्यानुरोधतः ॥ १ ॥ इति

तच्च साधनं एकलक्षणं सामान्यादेकमपि विशेषतोऽनेकधा भिद्यते । विधिसाधनं संयोगादिविधे-
[illegible] कार्यं कारणस्य, कारणं कार्यस्य, अकार्यकारणमकार्यकारणस्येति [illegible] ।
तत्र कार्यं हेतुः, अग्निरत्र धूमात् इति कार्यकार्यविरोधसंभवात् । कारणं हेतुः—अस्त्यत्र छाया छत्रात्
इति कारणकारणयोरनुमानसमर्थनात् । न चानुकूलमात्रमप्रतिबंधं वा कारणं लिंगमुच्यते येन
[illegible] स्यात् । किं तर्हि [illegible] वा कार्यविना-
[illegible] । अकार्यकारणं यथा—
[illegible] । तत्र [illegible]
[illegible] —

उत्पादव्ययध्रौव्ययुक्तं सत्

